From what has been stated above, it is abundantly clear that the arguments against Kālidāsa's authorship far outweigh and outnumber those in favour of the theory. As regards the evidence of the Mandasor Inscription, it prove nothing conclusively. The similarity of expressions in two pieces of composition might be quite accidental. Even if the theory of borrowing be accepted, it only establishes the fact that the *Ṛtusaṃhāra* is an ancient work of note so that it might be utilised in such an important document as the inscription. Kālidāsa's authorship is not proved by it. If, as pointed out by some, there are echoes of Kālidāsa's phrases and ideas in the lyric (e.g. in II. 10), it only shows the imitative nature of the work, and tends to speak against the authorship of Kālidāsa. A marked unKālidāsan feature of the *Ṛtusaṃhāra* is this. In it we often come across repetitions of words and phrases; such repetitions are absent in the undisputed works of Kālidāsa. A few examples of the repetitions may be cited here—*pracaṇḍa-sūrya* (I. 1, 10) *tṛṣā mahatya* (I. 11, 14), *raver-mayūkhair-abhitāpito bhṛśam* (I. 13, 17), *śaśikarāmbhodhara* (II. 1, 17), etc. These repetitions testify to the intellectual poverty of which Kālidāsa has never been accused. Those who believe in Kālidāsa's authorship of the lyric may, however, ascribe this feature to the immature age of the poet. The theory that the work was a youthful production of Kālidāsa is based on mere conjecture. By comparing the description of the seasons, contained in the *Ṛtusaṃhāra,* with the descriptions found in the undisputed works of the master-poet, Keith concludes that both appear to be written by the same hand, the only difference being that the *Ṛtusaṃhāra* reveals the hand of a novice while the other works bear the stamp of maturity. This view is obviously based on personal predilection, and does not help us materially in solving the question of authorship.

Thus, a comparative examination of the arguments for and against Kālidāsa's authorship leads to the only con-

clusion that the problem is as yet unsolved, although the weight of evidence appears to run counter to the tradition.

The *Śṛṅgāra-rasāṣṭaka*[1] is an octad on eroticism. It deals with the sentiment of love not only in human beings, but also in lower animals.

In the first verse, the poet holds that salvation really consists in the enjoyment of women, and not in anything else advocated by philosophers. The second verse describes the pleasure of enjoying a woman in a particular way. In the next verse is poetically depicted the moon whose distressing influence on the wives of travellers has been stated. The fourth verse is a description of the pathetic condition and movements of the female *Cakravāka* cruelly estranged from its consort at night. The male *Cakravāka,* smarting under the illusion of night at the sight of lotuses covered by black bees, and abstaining from food and drink at the prospect of imminent separation from his beloved, forms the theme of the fifth verse. In the following verse is delineated the miserable condition of the bee that falls into the *Ketakī* flower mistaken for a lotus. With its wings cut off by the thorns, and with its eyes blinded by the pollens, it can neither remain nor fly away. In the pen-ultimate verse, which is exactly the same as *Kumāra-sambhava,* V. 85, is described the well-known posture of Pārvatī, profusely perspiring, in which, at the unexpected sight of Śiva, for whom she had been undergoing hard penance, she could neither stay nor proceed. In the concluding verse, there is the poetic fancy that, at dawn, the cawing of the crows is a signal to the women, sleeping in their lover's arms after amorous sports to go home.

In the colophon, the *Śṛṅgārarasāṣṭaka* is characterised as a *Kāvya*. But, as a matter of fact, it seems to be a collection of eight verses dealing with the sentiment of love in human beings and in lower animals. The fact that the

---

1. (i) Included in *Kālidāser Granthāvalī*, Calcutta, 1322 B. S.
(ii) Printed in Haeberlin's *Kāvya-saṃgraha,* p. 510 ff.

octad does not begin with a stanza by way of the usual salutation or benediction tends to support this conjecture.

The style of the verses is flowing, and their language easy. The pictures of the different erotic situations are, however, conventional. *Svabhāvokti* is the prevailing figure of speech in these verses, and the only case of a charming *Upamā* occurs in the seventh verse which is an obvious borrowing from the *Kumāra-sambhava,* as pointed out above.

The following metres have been used in the verses—*Mandākrāntā, Mālini, Śikhariṇī, Śārdūlavikrīḍita, Sragdharā* and *Vasantatilaka.*

Several Sanskrit works bear the title 'Śṛṅgāra-tilaka.' There is one attributed to Gāgābhaṭṭa. [1] A drama of this title is attributed to one Avināśisvāmin. [2] A *Śṛṅgāra-tilaka,* also called *Ayyābhāṇa,* "describes the amorous adventures of Bhujaṅgaśekhara of Madhurā". [3] A work on poetics, bearing this title, is ascribed to Rudra or Rudrabhaṭṭa. [4] A *Śṛṅgāra-tilaka-campū* is noticed in the *Bikaner Catalogue.*

The *Śṛṅgāra-tilaka,* [5] ascribed to Kālidāsa, consists of some detached verses dealing with the erotic sentiment. The majority of the stanzas deal with the gracefulness and charm

1. See Aufrecht, *Catalogus Catalogorum,* I. 660.
2. See Krishnamāchāriār, *History of Classical Sanskrit Literature,* p. 703. Viśvanātha, in his *Sāhityadarpaṇa* (VI) mentions *Śṛṅgāra-tilaka* as an instance of *Prasthāna,* a minor type of drama.
3. See Krishnamāchāriār, *op. cit.,* p. 243.
4. See S. K. De, *History of Skt. Poetics* (1960), pp. 86–87 (Vol. I).
5. Ed. (i) J. Vidyāsāgara in *Kāvya-saṃgraha,* Calcutta, 1872. (21 stanzs).
   (ii) Gildemeister, Bonn, 1841. (23 stanzas).
   (iii) in *Kālidāser Granthāvalī,* in Bengali characters, with Bengali trs., Calcutta, 1322 B. S. (26 stanzas).
   (iv) in Haeberlin's *Kāvya-saṃgraha,* 14 ff. (21 stanzas).
   (v) N. S. P., 1906 (31 stanzas)—appendix to ed. of the *Ṛtu-saṃhāra.*
   (vi) in *Kāvya-kalāpa,* Bombay, 1864 (21 stanzas).

There is a work on poetics, bearing the same title, by Rudrabhaṭṭa.

of women. Love in union, love in separation, appeasement of the indignant beloved and clandestine love form the themes of some of the verses.

The total number of stanzas in the different versions, consulted by us, is 34. Of these, only 18 are common to all the versions. Thus, we can feel reasonably certain that these 18 at least belonged to the original work. Of the remaining 16 verses, four may be taken to be spurious. Of these four, three occur only in a single manuscript, as a glance at the table of verses, appended to the constituted text, will show. One of these four occurs in a single manuscript which is, however, different from the one containing the above three verses.

The absence of the usual salutation or benediction at the commencement of the work raises the suspicion that it was not a poetical work composed by one poet. This suspicion is confirmed by the testimony of the Sanskrit anthologies. For example, verse 2 in our text is attributed to Indraśiva in the *Sadukti-karṇāmṛta* (742) of Śrīdharadāsa. Again, verse 3 has been anonymously quoted in the *Subhāṣitāvalī* (1610) of Vallabhadeva. Similar is the case with verse 18 (= *Subhāṣitāvalī*, 1495). Verse 19 has been ascribed to Śatānanda in the *Subhāṣita-ratnakoṣa* (671) of Vidyākara. The verse *kva prasthitāsi* etc., occurring in one MS., is found in the *Amaru-śataka*.

From the above facts, the conclusion is reasonable that the *Śṛṅgāra-tilaka* is a collection of floating erotic verses. It is ascribed to Kālidāsa presumably to impart to the work an importance which is not likely to be derived from the association of the name of any other poet.

While there is no definite evidence about the authorship of the work, there is nothing to preclude the possibility of Kālidāsa having composed it. In view of the possibility of the work having been a juvenile production of Kālidāsa, it is hard to agree with Keith that "it is quite illegitimate to accord it to Kālidāsa." The verses are well-turned, the diction is simple and is not affected like most poetical com-

positions of the age of decadence. The choice of words is happy, and sometimes appears to reveal the hand of the master-poet. For example, while describing the hard-heartedness of the beloved, the poet wonders (verse 3) how her heart was made of *Upala* (stone). Poets like Bhavabhūti would have perhaps used the word *grāvan* (granite) in this context; Kālidāsa's love for soft words is well-known. Commendable poetic imageries are not rare. The limbs of a beautiful woman being fashioned with petals of *Campaka* flowers (V. 3) call up an attractive picture. The trenchant reproof, hurled by the beloved, sick through wakefulness, to the lover, who enjoyed himself in the company of another woman overnight, is in the manner of a good poet; the aggrieved woman says that a bee has no concern for a worn-out garland (V. 10). Extremely pretty is the picture of the beloved acting as a hunter, her eye-brow serving as a bow, side-glances as arrows, and of the lover's mind behaving like a deer. Verses 11 and 12, purported to be covert signals for clandestine union, contain suggested sense which, according to rhetoricians in general, constitutes the essence of good *Kāvya*.

Of the figures of speech, used in the work, the most striking is *Rūpaka*, which is based on *Upamā*, the well-known forte of Kālidāsa. The metres, used in the work, are varied and charming. Besides the stately *Śārdūla-vikrīḍita*, we have the melodious *Mālinī* and *Mandākrāntā* among others.

In the text, reconstructed by us, we have included the 18 verses which are common to all the versions. The other 16 have been arranged alphabetically as additional verses. As regards the order of the verses, there is little uniformity as a glance at the Table, showing the order of verses, will reveal. We have, as far as practicable, followed the numbering given in the majority of the versions.

From a discussion on the Kālidāsa Apocrypha we cannot leave out a consideration of the allegedly spurious portions of the *Kumārasambhava*, the *Meghadūta*, and the *Raghuvaṃśa*.

The former, in its present form, consists of seventeen cantos.[1] Of these, the first seven bring the narrative down to the wedding of Śiva and Pārvatī; this marks the conclusion of the poem in many manuscripts. There is no doubt about Kālidāsa's authorship upto the end of the seventh canto. Canto eight[2] also appears to be from his pen, because quotations from it occur in some early anthologies and works on poetics, and it reveals a style in no way inferior to that of the earlier cantos.

There are good grounds to suspect the authenticity of the remaining nine cantos. In the first place, we have no early commentary on this portion; neither Mallinātha nor Aruṇagiri comments on these cantos. The absence of their commentary cannot be explained unless we assume that either they did not consider this portion to be the genuine work of Kālidāsa or that these cantos originated later than these commentators.

Secondly, no quotation from these cantos occurs in the works on poetics, and in the early anthologies of note.

Thirdly, literary considerations tend to speak against Kālidāsa's authorship of the last nine cantos. The title of the poem is *Kumāra-sambhava.* If we take *sambhava*' in the sense of birth, then we shall see that the latter portion of the poem takes the narrative far beyond the promise of the title. In the latter portion, not only Kumāra's birth is described but the story concludes with his victory over, and

1. For discussions on the allegedly spurious portion, see Weber, *ZDMG,* 27 and *Ind. Streifen,* III; S. P. Bhaṭṭācārya, *Pro. of 5th. Oriental Conf.,* Vol. I; Jacobi in *Verhandl. D. V. Orient. Kongress,* Berlin, 1881, II. 2.

2. Some have expressed doubt about the authenticity of this canto too, on the ground that the description of the amours of adored deities is highly improper, and, as such, unbecoming of a poet like Kālidāsa. But, the existence of commentaries on it by both Aruṇagiri and Mallinātha and reference to it as a composition of Kālidāsa, in the *Dhvanyāloka,* leave little room for doubt. For a summary of opinions on this question, see H. Śāstrī, *Kālidāsa et d' Art poetique de l' Inde,* Paris, 1917.

slaughter of, the demon Tāraka. A close study of the text reveals that, in the second canto (V. 51), the gods intimate to Brahman their desire to create the *Senānī* (=Kumāra) for curbing the demon Tāraka. In II. 54 the Supreme Lord assures the gods of the fulfilment of their desire, viz. the birth of Kumāra, and not the killing of the demon, which would be a matter of course. Thus, both the title and the contents require that the story should conclude with the birth of Kumāra. So, from this point of view, the latter portion of the poem would appear to be spurious. A comparative study of the earlier and latter portions of the work betrays the definitely inferior style and language of cantos IX–XVII. [1] In the latter portion, the narrative is rather loose, and betrays the hand of a poet of inferior calibre.

From what has been stated above, it would seem that cantos IX–XVII were tacked on to the genuine work in later times. It may be argued that the narrative, up to the end of canto VIII, does not fulfil the promise of the title, viz. the birth of Kumāra. To this our reply will be that the highly amorous pleasures of Śiva and Pārvatī, described in canto VIII, sufficiently suggest the birth of an offspring, and the poet need not tell us, in so many words, as to how Kumāra is born; Kālidāsa, as is well-known, suggests more than he expresses. We do not know what precisely the poet wanted to convey by the word '*Sambhava*'; it may also mean 'origin', 'possibility'. Had he intended to denote origin or possibility by the word '*Sambhava*', then the scope of the narrative up to the end of canto VIII is sufficient.

Some scholars are of the opinion that, if we are to think that the original *Kumāra-sambhava* extends upto the end of the eighth canto, then we must assume that Kālidāsa left it unfinished. The poet's sudden death is suggested as a possible cause, but it is rejected by others on the ground that this poem is earlier than the *Raghuvaṃśa*. It is also suggested

1. For a collection of the defects of language and expression, in cantos IX–XVII, see R. V. Krishnamāchārya in *Sahṛdaya* (Sanskrit Journal, Madras), IX.

that the last pages of a single manuscript of the poem were perhaps lost. An ingenious, albeit not plausible, argument seeking to explain the incomplete nature of the work is that Kālidāsa abandoned the work as he was deterred by contemporary criticism of his dealing with the divine pair in the manner in which he did. Equally lacking in plausibility is the conjecture that the poet was actuated, in refraining from writing the further cantos, by the sense that the legend of the birth, with its weirdness, was not a fit subject for poetry. All this is obviously hypothetical.

The only quotation from the latter portion of the *Kumārasambhava* occurs in Ujjvaladatta's commentary on the *Uṇādisūtra.*[1] The passage,[2] quoted with the remark *iti kumāraḥ,* is said also to occur in Kumāradāsa's *Jānakī-haraṇa* which is cited by Ujjvaladatta (III. 73). Thus, a confusion arises as to whether the *Jānakī-haraṇa* borrowed it from the sequel of the *Kumārasambhava* or the latter from the former. If Ujjvaladatta's reference is to the *Kumārasambhava,* which is rendered unlikely by his use of *Kumāraḥ* instead of *Kumāre,* then the sequel to this poem may be reasonably supposed to have originated before the 14th. century A. D., the date of Ujjvaladatta.

As regards the *Meghadūta,* there are divergent text-traditions[3] so far as the number of verses is concerned. In the matter of determining, however approximately, the genuine verses of the *Meghadūta* our chief guide is the commentators, besides the *Pārśvābhyudaya*[4] of the Jaina author Jinasena (8th. century). The number of stanzas varies from 110 to

1. Ed. T. Aufrecht, Bonn, 1859, *ad.* IV. 66.
2. *ravaḥ pragalbhāhata-bherī-sambhavaḥ.* (It occurs as a variant of *Kumāra* XIV. 32 (a) in the NSP ed.)
3. On the question of the text-problem of this work, see *Meghadūta,* ed. S. K. De, New Delhi, 1957.
4. This work, a biography of the Jaina saint Pārśvanātha, in the form of *Samasyā-pūraṇa,* quotes, in each verse, one or two *Pādas* of the stanzas of the *Meghadūta,* as known to it, and gives the rest of the *Pādas* composed by its author.

127. On a critical examination of the diverse text-traditions, it appears that 110 or 111 verses are the genuine work of Kālidāsa. The verses which appear to be spurious are, however, well-turned, and so ingeniously dovetailed into the text that it is difficut for the general reader to detect them. We shall quote the verses which appear to be interpolations, and give an English rendering of them.

C. K. Raja has tried [1] to establish that cantos IX to the end of the *Raghuvaṃśa* were not penned by Kālidāsa. His arguments, however, are not convincing. His theory has been refuted, with considerable degree of success, by V. Lakshminarayana. [2]

---

1. Studies in Kālidāsa, *Annals of Oriental Research,* University of Madras, V; Notes on Kālidāsa, *Ibid.,* VI.

2. See *Poona Orientalist,* VIII, pp. 188–201.

भ्रमराष्टकम्

Bhramarāṣṭaka

The text, presented here, is based on the following sources.

A — Devanāgarī transcript of Adyar Library (Madras) Bengali MS. No. TR 1084.

C — MS. No. 861 belonging to Calcutta University.

K — Text printed in *Kāvyakalāpa*, Bombay, 1864.

भ्रमराष्टकम्

मन्दाक्रान्ता

दृष्ट्वा स्फीतोऽभवदलिरसौ लेख्यपद्मं विशालं
चित्रं चित्रं किमिति किमिति व्याहरन्निष्पपात।
नासीद्गन्धो न च मधुकणा नापि तत्सौकुमार्यं
घूर्णन् मूर्ध्ना बत नतमुखो व्रीडया निर्जगाम ॥ १ ॥

गन्धाढ्यासौ भुवनविदिता केतकी स्वर्णवर्णा
पद्मभ्रान्त्या क्षुधितमधुपः पुष्पमध्ये पपात।
अन्धीभूतः कुसुमरजसा कण्टकैश्छिन्नपक्षः
स्थातुं गन्तुं द्वयमपि सखे नैव शक्तो द्विरेफः ॥ २ ॥

शार्दूलविक्रीडित

गन्धाढ्यां नवमल्लिकां मधुकरस्त्यक्त्वा गतो यूथिकां
दैवात्तां च विहाय चंपकवनं पश्चात्सरोजं गतः।
बद्धस्तत्र निशाकरेण विधिना क्रन्दत्यसौ मूढधीः
संतोषेण विना पराभवपदं प्राप्नोति मूढो जनः ॥ ३ ॥

Verse 1–b) A, C रूपं वर्णा for चित्रं चित्रं.
–c) K नास्मिन् for नासीत्, नास्ति for नापि.
–d) A, C ह्यवनत for बत नत. K शिरा for मुखो.

2–c) A, C पद्म(for पद्मः.
This verse is identical with stanza 6 of the *Śṛṅgāra-rasāṣṭaka*, with चपल for क्षुधित (b) and लून for छिन्न (c).

3–b) A रसं for वनं.

4 K.

शार्दूलविक्रीडित

येऽमी ते मुकुलोद्गमादनुदिनं त्वामाश्रिताः षट्पदा-
स्ते भ्राम्यन्ति फलाद्बहिर्बहिरहो दृष्ट्वा न संभाषसे।
ये कीटास्तव दृक्पथं च न गतास्ते त्वत्फलाभ्यन्तरे
धिक् त्वां चूततरो परापरपरिज्ञानानभिज्ञो भवान्॥ ४॥

नीतं जन्म नवीननीरजवने पीतं मधु स्वेच्छया
मालत्याः कुसुमेषु येन सततं केली कृता हेलया।
तेनेयं मधुगन्धलुब्धमनसा गुंजालता सेव्यते
हा धिग्दैववशात्स एव मधुपः कां कां दशां नागतः॥ ५॥

द्रुतविलम्बित

अलिरसौ नलिनीवनवल्लभः
कुमुदिनीकुलकेलिकलावशः ।
विधिवशेन विदेशमुपागतः
कुटजपुष्परसं बहुमन्यते ॥ ६॥

अनुष्टुप्

पलाशकुसुमभ्रान्त्या शुकतुण्डे मधुव्रतः।
पतत्येष शुकोऽप्येनं जम्बुभ्रान्त्या जिघांसति॥ ७॥

वसन्ततिलक

रात्रिर्गमिष्यति भविष्यति सुप्रभातं
भास्वानुदेष्यति हसिष्यति पंकजश्रीः।
इत्थं विचिन्तयति कोशगते द्विरेफे
हा हन्त हन्त नलिनीं गज उज्जहार॥ ८॥

इति कालिदासकृतं भ्रमराष्टकं समाप्तम्।*

4–b) K बहिरतो for बहिरहो.
–c) A दृक्पदं for ० पथं.
–d) K यतः for तरो.

5–d) K दैवकृतं for दैववशात्.

6–b) K रसः for वशः.

8–b) K पद्मजालं (A पद्मजातं) for पंकजश्रीः.
–c) A, C गतो for गते, द्विरेफो for द्विरेफे.

* K omits कालिदासकृतम्.

चातकाष्टकम्[1]

वसन्ततिलक

वातैर्विधूनय विभीतय भीमनादैः
संचूर्णय त्वमथवा करकाभिधातैः ।
त्वद्वारिबिन्दुपरिपालिता जीवितस्य
नान्या गतिर्भवति वारिद चातकस्य ॥ १ ॥

रथोद्धता

चातकस्त्रिचतुरान् पयःकणान्
याचते जलधरं पिपासितः ।
सोऽपि पूरयति भूयसाम्भसा
चित्रमत्र महतामुदारता ॥ २ ॥

अनुष्टुप्

शक्यते येन केनापि जीवितेनैव जीवितम् (जीवितुम् ?) ।
किंतु कौ न व्रतेद्भंग[2]प्रसंगः परदुःसहः ॥ ३ ॥

गर्जसि मेघ न यच्छसि तोयं
चातकपक्षी व्याकुलितोऽहम् ।
दैवादिह यदि दक्षिणवातः
क्व त्वं क्वाहं क्व च जलपातः ॥ ४ ॥[3]

शार्दूलविक्रीडित

वापीष्वल्पजलाशयो विशमयो नीचाल्पगाहो ह्रदः
क्षुद्रात् क्षुद्रतरो महाजलनिधिर्गण्डूषमेकं मुनेः ।
गंगाद्याः सरितः पयोनिधिगताः संत्यज्य तस्मादिमान्
....[4] खलु चातको जलमुचामुच्चैः पयो वांछति ॥ ५ ॥

---

1 MS. No. XLII, A. 48 belonging to Adyar Library, Madras. The text is different from the poem of the same name in Haeberlin's *Kāvyasaṃgraha*, but the same as the anonymous *Pūrvacātakāṣṭaka* printed in J. Vidyasagara's *Kāvyasaṃgraha*, I.

2 This portion appears to be corrupt. कौलव्रते भंग yields plausible sense.

3 This verse is metrically defective.

4 Three initial letters are corrupt.

शार्दूलविक्रीडित

बीजैरंकुरितं नदीभिरुदितं वल्लीभिरुज्जृम्भितं
वृक्षैः पल्लवितं जनैश्च मुदितं धाराधरे वर्षति ।
एते चातक पातकं किमपि ते सम्यङ् न जानीमहे
यत्तेऽस्मिन् पतन्ति चंचुपुटके छिन्नाः पयोबिन्दवः ॥ ६ ॥

अनुष्टुप्

नदेभ्योऽपि ह्रदेभ्योऽपि पिबन्त्यन्ये वयः पयः ।
चातकस्य तु जीमूत भवानेवावलम्बनम् ॥ ७ ॥

मालिनी

नभसि निरवलम्बे सीदता दीर्घकालं
तदपि सुखनिविष्टोत्तानचंचू पुटेन ।
जलधर जलधारा दूरतस्तावदास्तां
ध्वनिरपि मधुरस्ते न श्रुतश्चातकेन ॥ ८ ॥

इति श्रीकालिदासकृतं चातकाष्टकं समाप्तम् ॥

गंगाष्टकम्

Gaṅgāṣṭaka

A — MS. No. G 9485 belonging to Asiatic Society, Calcutta. Substance : Country-made paper. Size : 6½″×4″. Folia : 5. Lines 5 on a page. Character : Nāgara. Appearance : tolerable. Complete.

B — MS. No. G 9406 belonging to Asiatic Society. Calcutta. Substance : Country-made paper. Size : 8″×4″. Folia : 8. Lines 8 on a page. Character : Nāgara. Date : Saṃvat 1878. Appearance : Decayed. Complete. The codex contains also the *Gaṅgāṣṭaka* of Śaṃkara, the *Gaṅgā-stotra* of the same author and the *Gaṅgāṣṭaka* of Vālmīki.

गंगाष्टकम्

कत्यक्षीणि करोटयः कति कति द्वीपिद्विपानां त्वचः
काकोलाः कति पन्नगाः कति सुधाधाम्नश्च खण्डाः कति ।
किं च त्वं च कति त्रिलोकजननि त्वद्वारिपूरोदरे
मज्जज्जन्तुकदम्बकं समुदयत्येकैकमादाय तत् ॥ १ ॥

देवि त्वत्पुलिनांगणस्थितिजुषां निर्मानिनां ज्ञानिनां
स्वल्पाहारनिबद्धशुद्धवपुषां तार्णं गृहं श्रेयसे ।
नान्यत्र क्षितिमण्डलेश्वरशतैः संरक्षितो भूपतेः
प्रासादो ललनागणैरधिगतो भोगीन्द्रभोगोन्नतः ॥ २ ॥

तत्तत्तीर्थगतैः कदर्थनशतैः किं तैरनर्थाश्रितै-
र्ज्योतिष्टोममुखैः किमीशविमुखैर्यज्ञैरयज्ञाहृतैः ।
सूते केशववासवादिविबुधग्रामाभिरामां श्रियं
गङ्गे देवि भवत्तटीतृणकुटीवासः प्रयासं विना ॥ ३ ॥

Verse 2 (b) B सिद्ध for शुद्ध.

गङ्गाद्वारमुपेत्य शीतलशिलामालम्ब्य हैमाचलो
यैराकर्णि कुतूहलाकुलतया कल्लोलकोलाहलः ।
ते शृण्वन्ति सुवर्णपर्वतशिरःसिंहासनाध्यासिनः
संगीतागमसिद्धशुद्धरमणीमंजीरधीरध्वनिम् ॥ ४ ॥

दूरं गच्छ विपक्षकृच्छ्र भवतो नालोकयामो मुखं
रे पाराकवराक साकमितरैर्नाकप्रदेर्गम्यताम् ।
सद्यः प्रोद्यन्मन्दमारुतरयात्प्राप्ता कपोलस्थलं
गङ्गाम्भः कणिका विमुक्तिगणिकासङ्गाय संभाव्यते ॥ ५ ॥

विष्णोः संगतिकारिणी हरजटाटवीचारिणी
प्रायश्चित्तविधायिनी जलकणैः पुण्यौघविस्तारिणी ।
भूभृत्कन्दरदारिणी निजजले मज्जज्जनोत्तारिणी
श्रेयःस्वर्गविहारिणी विदधतां गङ्गा मनोहारिणी ॥ ६ ॥

वाचालं विकलं खलं श्रितमलं कामाकुलं व्याकुलं
चण्डालं तरलं निपीतगरलं दोषाविलं चाखिलम् ।
कुम्भीपाकगतं तमन्तककरादाकृष्य कस्तारयेत्
मातर्जह्नुनरेन्द्रनन्दिनि तव स्वल्पोदबिन्दुं विना ॥ ७ ॥

... ... गले हृतविले कामाकुले व्याकुले
कण्ठे घर्घरघोषमलिने काये च संमीलति ।
यां ध्यायन्नघभारभङ्गुरतनुः प्राप्नोति मुक्तिं नरः
सा नश्चेतसि जाह्नवी निवसतां संसारसंतापहृत् ॥ ८ ॥

इति [1]श्रीकविकालिदासविरचितं गङ्गाष्टकं समाप्तम् ।

Verse 4 (d) B शुद्धसिद्धि for सिद्धशुद्ध.

Verse 5 (d) B निपीत for विमुक्ति.

Verse 6 (b) B विनाशिनी (?) for विधायिनी.
(d) B विजयते for विदधतां,

Verse 7 (b) B शिखाविचाराविलं (?) for दोषाविलं चाखिलं.

Verse 8 (a) – first four syllables corrupt.
(c) B अपि for अघ; तरः for तनुः.
(d) B मे चेतसि for नश्चेतसि.

1 A श्रीमत् for श्रीकवि; समाप्तिमगात् for समाप्तम्.

महापद्यम्[1]

अनुष्टुप्

अस्थिवद्दधिवच्चैव शङ्खवद्बकवत्तथा ।
राजन् तव यशो भाति पुनः संन्यासिदन्तवत् ॥ १ ॥
कालिदास इमं श्लोकं स्वकवित्वस्य गोपकम् ।
लिखित्वा प्रददौ पत्रं कवये शंकराय वै ॥ २ ॥
पठित्वा शंकरः श्लोकं प्रहसन् कौतुकाय तत् ।
पत्रं करे समादाय सानन्दस्त्वरया तदा ॥ ३ ॥
कालिदासेन सहितो भोजराजसभां ययौ ।
अथ दृष्ट्वा स राजानमाशिषं प्रजगाद ह ॥ ४ ॥

शार्दूलविक्रीडित

राजन्नभ्युदयोऽस्तु शंकरकवे किं पत्रिकायामिदं
पद्यं कस्य तवैव कीर्तिरचना तत्पठ्यतां पठ्यते ।
किंत्वासामरविन्दसुन्दरदृशां द्राक् चामरान्दोलना-
दुद्वेल्लद्भुजवल्लिकंकणझणत्कारः क्षणं वार्यताम् ॥ ५ ॥

शिखरिणी

महाराज श्रीमन् जगति यशसा ते धवलिते
पयःपारावारं परमपुरुषोऽयं मृगयते ।
कपर्दी कैलासं करिवरमथोयं कुलिशभृत्
कलानाथं राहुः कमलभवनो हंसमधुना ॥ ६ ॥

स्रग्धरा

नीरक्षीरे गृहीत्वा सकलखगपतीन् याति नालीकजन्मा
तक्रं धृत्वा कराब्जे सकलजलनिधीन् चक्रपाणिर्मुकुन्दः ।
सर्वानुद्धृत्य शैलान् दहति पशुपतिर्भालनेत्रेण पश्यन्
व्याप्ता त्वत्कीर्तिकान्ता सकलवसुमतीं भोजराज क्षितीन्द्र ॥७॥[2]

---

1. Printed in the *Kāvyakalāpa* and in the *Kāvya-saṃgraha* of both J. Vidyasagara and Haeberlin.

2. This stanza occurs in the *Bhoja-prabandha*, III. 12.

शार्दूलविक्रीडित

श्रीमद्राजशिखामणे तुलयितुं धाता त्वदीयं यशः
कैलासं च निरीक्ष्य तत्र लघुतां तत्पूर्तये पर्यधात् ।
उक्षाणं तदुपर्युमासहचरं तन्मूर्ध्नि गङ्गाझरं
तस्याग्रे फणिपुङ्गवं तदुपरि स्फारं सुधादीधितिम् ।। ८ ।।

पृथ्वी

अपायि मुनिना पुरा पुनरमायि मर्यादया
अतारि कपिना पुरा पुनरदाहि लङ्कारिणा ।
अमन्थि मुरवैरिणा पुनरबन्धि लङ्कारिणा
क नाम वसुधापते तव यशोऽम्बुधिः क्वाम्बुधिः ।। ९ ।।

स्रग्धरा

स्वस्ति श्रीभोजराज त्रिभुवनविजयी धार्मिकः सत्यवादी
पित्रा ते मे गृहीता नव नवतियुता रत्नकोटिर्मदीया ।
तां त्वं मे देहि शीघ्रं सकलबुधजनैर्ज्ञायते सत्यमेतत्
नो वा जानन्ति केचिन्नवकृतमिति चेद् देहि लक्षं ततो मे ।।१०।।

शार्दूलविक्रीडित

मागाः प्रत्युपकारकातरधिया वैमुख्यमाकर्णय
श्रीकर्णाट वसुन्धराधिपसुधासिक्तानि सूक्तानि मे ।
वर्ण्यन्ते कति नाम नार्णवनदीभूगोलविन्ध्याटवी-
झञ्झामारुतचन्द्रमः प्रभृतयस्तेभ्यः किमाप्तं मया ।।११।।

इति श्रीमहाकविकालिदासकृतं महापद्य समाप्तम् ।।

मङ्गलाष्टकम्

Description of the printed text and manuscripts.

As_1 — MS. No. 9545 belonging to Asiatic Society, Calcutta. Country-made paper, 8″×4″. Folia 3. Lines 8 on a page. Characters–Nāgara. Complete. Extremely corrupt.

As_2 — MS. No. 3075 belonging to Asiatic Society, Calcutta. Country-made paper, 11″×5″. Folia 4. Lines 8 on a page. Characters–Nāgara. Complete. Corrupt.

Ad. — Copy of Adyar Library MS. No. 67119 (in Telugu characters).

B — Copy of the text as printed in the *Bṛhat-stotra-muktā-hāra*, Vol. II, ed. G. M. Mehendale, Gujarāti Printing Press, Bombay, 1916.

M_1 — Copy of the *Varamaṅgalāṣṭaka*, MS. No. D 14188, belonging to Govt. Oriental MSS. Library, Madras. Last two verses corrupt.

M_2 — Copy of the *Maṅgalāṣṭaka*, MS. No. D 14309, belonging to Govt. Oriental MSS. Library, Madras. The portion following the third stanza is corrupt.

T — Text as printed in the *Tibetan Tripiṭaka*, reprinted by Otani University, Kyoto, Vol 87, pages 265-66.

मङ्गलाष्टकम्

श्रीमत्पंकजविष्टरौ हरिहरौ वायुर्महेन्द्रोऽनल-
श्चन्द्रो भास्करवित्तपालवरुणप्रेताधिपादिग्रहाः ।
प्रद्युम्नो नलकूबरः सुरगजश्चिन्तामणिः कौस्तुभः
स्वामी शक्तिधरश्च लांगलधरः कुर्वन्तु नो मंगलम् ॥ १ ॥

Verse 1 (b) B प्रेताधिपाह्वि or o दि.

(c) M_1, M_2 गुरु for गज.

(d) B तु for च.

गौरी श्रीरदितिश्च कद्रूविनते भूतिः सुपर्णा शुभा
सावित्री तु सरस्वती वसुमती सत्यव्रतारुन्धती ।
स्वाहा जाम्बवती सुरुक्मभगिनी दुःस्वप्नविध्वंसिनी
वेला चाम्बुनिधेः समीनमकराः कुर्वन्तु नो मंगलम् ॥ २ ॥

नेत्राणां त्रितयं शिवं पशुपतेरग्नित्रयं पावनं
यत्तद्विष्णुपदत्रयं त्रिभुवनं ख्यातं च रामत्रयम् ।
गंगावाहपदत्रयं सुविमलं वेदत्रयं ब्राह्मणं
संध्यानां त्रितयं द्विजैः सुविहितं कुर्वन्तु नो मंगलम् ॥ ३ ॥

अश्वत्थो वटवृक्षचन्दनतरुर्मन्दारकल्पद्रुमो
जम्बूनिम्बकदम्बचूतसरका वृक्षाश्च ये क्षीरिणः ।
सर्वे ते फलसंयुताः प्रतिदिनं विभ्राजनं राजते
रम्यं चैत्ररथं च नन्दनवनं कुर्वन्तु नो मंगलम् ॥ ४ ॥

Verse 2 (a) AS_1, AS_2 गौरी श्रीकुलदेवता for गौरी ··· च. M_1 विनता (B सुभगा) for विनते.
(b) AS_1, Ad, T सावित्री (Ad, M_1, M_2, T add च here) सरस्वती च सुरभिः (M_2 सुभगा) for सावित्री ···· मती. AS_2, Ad. च for तु. B पत्युर्व्रता for सत्यव्रता.
(c) AS_2 स्वधा भगवती for सु ···· नी. M_1, M_2 च रुक्मि for सुरुक्म.
(d) B सुमीन for समीन.

Verse 3 (a) Ad शुभं for शिवं.
(c) B पथ for पद, देव for वेद. Ad., T सुस्वरं for ब्राह्मणं.
(d) M_1, T अभिमतं for सुविदितं.

4 (a) Ad, M_1 वदरी च for वटवृक्ष. AS_2, Ad द्रुमा for द्रुमो.
(b) Ad. चूताः सरसा for चूतसरला. M_1 जंबूस्सर्ज कदम्ब चूतधवला for जम्बू ···· सरला.
(c) AS_2, Ad transpose सर्वे and ते. M_1, AS_1 मिश्रिताः for संयुताः. M_1 सकुसुमाः पुन्नागदाडीवनम् for प्रति ··· राजते. T appears to read the line as सर्वं ते फल मिश्रितं वनकुलं वैभ्राजितं भ्राजितं.
(d) B, T सु for च. M_1 कोकनदं सु for चैत्र ··· च.

वाल्मीकिः सनकः सनन्दनमुनिर्व्यासो वसिष्ठो भृगु-
र्जाबालिर्जमदग्निजह्नुजनको गर्गोऽङ्गिरा गौतमः ।
मान्धाता ऋतुपर्णवेनसगरा धन्यो दिलीपो नलः
पुण्यो धर्मसुतो ययातिनहुषो कुर्वन्तु नो मंगलम् ॥ ५ ॥

ब्रह्मा वेदपतिः शिवः पशुपतिः सूर्यो ग्रहाणां पतिः
शक्रो देवपतिर्यमः पितृपतिः स्कन्दश्च सेनापतिः ।
यक्षो वित्तपतिर्हरिश्च जगतां वायुः पतिः प्राणिनां
इत्येते पतयः समेत्य सततं कुर्वन्तु नो मंगलम् ॥ ६ ॥

गङ्गा सिन्धु सरस्वती च यमुना गोदावरी नर्मदा
कावेरी सरयू महेन्द्रतनया चर्मण्वती वेणुका ।
शिप्रा वेत्रवती महासुरनदी ख्याता च या गंडकी
पूर्णाः पुण्यजलैः समुद्रसहिताः कुर्वन्तु नो मङ्गलम् ॥ ७ ॥

---

5 (a) B तरु for मुनि.
(b) B कच्छ for जह्नु. T गर्गस्तथा for गर्गोऽङ्गिरा.
(c) Ad नहुषः ककुत्स्थभरतौ वैण्यो (M_1 नहुषो नृपश्च सगरो वेणु) for ऋतुपर्ण ... धन्यो.
(d) AS_1 रामो for पुण्यो, भरताः for नहुषो.

6 (a) B सूर्यश्च चक्षुष्पतिः (T शक्रः सुराणां पतिः) for सूर्यो ग्रहाणां पतिः.
(b) AS_1, AS_2 चन्द्रश्च तारापतिः for स्कन्द ... पतिः.
(d) Ad गिरयः for पतयः. AS_1, AS_2, Ad सुमेरुसहिताः for समेत्य सततं.

7 (b) B वेदिका for वेणुका.
(c) M_1 वेगवती for वेत्रवती.
Concluding verse :—
(b) Ad वृत्तैः प्रणीतं त्विह for विप्र .... कृतम्.
(c) Ad निर्व्याजभक्त्यन्वितो for नित्यं .... मान्.
(d) B reads the line as गंगासागरसंगमे प्रतिदिनं कुर्वन्तु नो मंगलम्.
AS_2 reads गंगासागरसंगमोद्भवफलं .... (the rest is corrupt).
T गंगावारिधिसंगमे .... (corrupt) आप्नोति पुण्यां गतिम्.

लक्ष्मीः कौस्तुभपारिजातकसुरा धन्वन्तरिश्चन्द्रमा
गावः कामदुघाः सुरेश्वरगजो रम्भादिदेवाङ्गनाः ।
अश्वः सप्तमुखः सुधा हरिधनुः शंखो विषं चाम्बुधेः
रत्नानीति चतुर्दश प्रतिदिनं कुर्वन्तु नो मङ्गलम् ॥ ८ ॥

इत्येतद्वरमङ्गलाष्टकमिदं पापौघविध्वंसनं
पुण्यं संप्रति कालिदासकविना विप्रप्रबन्धीकृतम् ।
यः प्रातः शृणुयात्समाहितमना नित्यं पठेद्भक्तिमान्
गंगासागरसंगमादवभृथात्प्राप्नोति पुण्यं महत् ॥ ९ ॥

इति श्रीकविकालिदासविरचितं मंगलाष्टकं संपूर्णम् ।*

---

* T समाप्तम् for संपूर्णम्.

AS_2 इति श्रीकालिदासमंगलाष्टकं संपूर्णम् ॥

B इति मंगलाष्टकस्तोत्रं संपूर्णम् ॥

Additional Verses

The text, printed in the *Bṛhat-stotra-muktā-hāra,* reads the following stanza in between stanzas 7 and 8 :—

गंगा गोमतिर्गणपतिर्गोविन्दगोवर्धना
गीता गोमयगोरजो गिरिसुता गंगाधरो गौतमः ।
गायत्री गरुडो गदा गिरिगुहा गंभीरगोदावरी
गंधर्वग्रहगोपगोकुलजनाः कुर्वन्तु नो मंगलम् ॥

The same verse is read in AS_1 with the following variants: गोविन्दगोवर्धनौ for गो···ना (a); गदाधरगया for गदा···हा (c); गणाः for जनाः (d).

It is read also by AS_2, but this portion is extremely corrupt; गदाधरगया for गदा···हा can, however, be read.

AS_1 gives the following verse, but the portion is corrupt. We note below as much as can be restored.

शैलेन्द्रो दशवेलबद्धवलयः श्रीशैलशंखादय
श्चन्द्र ··· ··· श्रीकंठवासादायः ···· ··· ··· ।
···· ···· ···· ··· ···· ···· ···· ···· ···· ····
सर्वे ते गिरयः सुमेरुसहिताः कुर्वन्तु नो मंगलम् ॥

T also reads the above verse which is extremely corrupt.

M_1 gives the stanza which is also corrupt. The following represent what can be restored :

श्रीशैलेन्द्र सुबेल ···· ··· ··· त्रिकूटादयः
चन्द्र द्रोणमहेन्द्रमंदरगिरिश्रीकंठ ··· ··· ··· ।
··· ··· ··· तुरंग ···· ··· ···· श्मश्रृंगाचलाः
सर्वे ते ···· ··· ··· ···· ···· कुर्वन्तु ते मंगलम् ॥

M_2 also gives the same verse in a corrupt form. The following lines represent as much as can be restored :

श्रीशैलेन्द्रसुमेरुविन्ध्यमलयाः श्रीसिंहपादोद्भवाः
चन्द्रद्रोणमहेन्द्रमंदरगिरिश्रीकंठ .... ।
....
... ... जले सुमेरुसहिताः कुर्वन्तु ते मंगलम् ॥

Ad. reads this stanza as follows, the corrupt portions being indicated by dotted lines :—

शैलेन्द्रसंवेलविन्ध्यमलयाद्रिसह्यपादा नगाः
चन्द्रद्रोणमहेन्द्रमंदरगिरिश्रीकंठवा ... ... ।
... ... प्रक्षुण्णशृंगोच्चयः
सर्वे ते गिरयः सुमेरुसहिताः कुर्वन्तु वां मंगलम् ॥

M₁ reads the following; corrupt portions are indicated by dotted lines :—

शेषस्तक्षकशंखकालि .... वासुकिः
.... पद्मसंज्ञक इति ख्याताश्च ये पन्नगाः ।
अन्ये काननगह्वरेषु जलधौ ये प्रान्तरे च स्थिता
... ... कुर्वन्तु नो मंगलम् ॥

M₂ also reads the above verse of which only the following words can be deciphered, the rest being corrupt :—

वासुकि .... पद्म ... पन्नगा ... गह्वरेषु जलधौ ...

M₁ reads a verse of which the following portion can only be recovered :—

नन्दा नारदनमंदानग ... नवग्रहाः ... कुर्वन्तु नो मंगलम् ॥
....

M₁ reads a verse of which the following portion only can be restored :—

कालिन्दी कलशोद्भव कलिमलः ... कौशिकः कुर्वन्तु नो मंगलम् ॥

M₂ gives the following verse :—

शुद्धान्नं दधि पायसं जलधरं कुंभप्रपूर्णं जलं
स्निग्धं चन्दनचर्चितं परिमलं गोरोचनं श्रीफलम् ।
... ... प्रभातसमये गोरोचनं मृण्मयैः
दूर्वा ... ... कुर्वन्तु ते मंगलम् ॥

M_1 also reads the same verse as follows :—

शुद्धान्नं दधिपायसं ··· ··· ···· पूर्णं जलं
शंखं ··· ··· ··· ··· ··· सूकरवक्त्रदन्तरुचिरम् ।
··· ··· विदः प्रभातसमये गाः कांचन ··· ···
···· ···· ··· ···· ··· ··· कुर्वन्तु ते मंगलम् ।।

Ad. reads the above stanza as follows :—

स्निग्ध ··· ··· पायसं सुरुचिरं कुंभप्रपूर्णं जलं
शंखश्चन्दनमौक्तिकासुविपुलं गोरोचनं श्रीफलम् ।
विप्रा वेदविदः प्रभातसमये गौः कांचनं व्रीह्यो
दूर्वा ··· ··· ··· प्रतिदिनं कुर्वन्तु वां मंगलम् ।।

AS_1 reads the same stanza of which only the following words can be restored :—

··· ··· गोरोचना श्रीफलं
विप्रा वेदविदः प्रभातसमये गोधूम ··· ··· ···

T reads the same stanza with पुष्पकं सुरतरो for मौक्तिका सुविपुलं.

AS_2 opens the Aṣṭaka with the following stanza :—

··· ··· सुरपूजितो गुणमयो लम्बोदरस्त्रियुतो
शश्वद्रोगजकर्णको गजमुखो गंभीरविद्यागणो ।
गौर्याः पुत्रगणेश्वरो हरसुतोगो ··· ···· ···
यात्राजन्म विवाहकर्मसमये कुर्वन्तु नो मंगलम् ।।

AS_2 reads the following stanza in a corrupt form :—

ब्रह्म ··· ··· सुरधुनिवेद ··· ··· च
धनुर्धरजल ··· ··· ··· ··· भिन्नाक्षरं वैदिकम् ।
वाजीकोक ··· ··· ··· ··· ··· ··· ··· ···
··· ···· ···· प्रतिदिनं कुर्वन्तु नो मंगलम् ।।

AS_2 reads the following stanza in a corrupt form :—

ब्राह्मी ··· ··· ··· भगवती राजीमति द्रौपदी
कौशल्या च मृगावती च तुलसी सीता सभद्रा शिवा ।
कुन्ती शीलवती ··· ··· ··· ··· ···
··· ··· ··· ··· ··· ··· ··· कुर्वन्तु नो मंगलम ।।

AS_2 reads the following verse in a corrupt form :—

> ब्रह्मा चाखिलदेवता ऋषिगणसूर्यादिसर्वे ग्रहा
> भूपाला ··· ··· ··· ··· ··· ··· गंगादिनद्यादयः ।
> मार्कण्डेयसमस्त ··· ··· पुरुषा दिक्पालदेवगणा
> गायत्र्यादिसमस्तमन्त्रसहिता कुर्वन्तु नो मंगलम् ॥

T also reads the above verse which in corrupt. It appears to read वनपालकादि after भूपाला, and मच्छिन्द्रादि for मार्कण्डेय.

AS_2 reads an additional verse of which the following portions only are available :—

> ··· ··· ब्रह्मपुरा महेन्द्रनगरी लंकापुरी द्वारिका
> किष्किन्धा मथुरा तथैव मिथिलावन्ती जयन्ती··· ।
> ··· ··· ··· ··· ··· ··· ··· ··· ··· ··· ···
> ··· ··· ··· गया ··· ··· कुर्वन्तु नो मंगलम् ॥

Ad. opens the *Aṣṭaka* with the following verses which are not in the usual *Śārdūlavikrīḍita* metre :—

> यज्ञोपवीतकृतभोगिराजो गणाधिराजो गजदेववक्त्रः ।
> सुराधिराजार्चितपादपद्मः सदा कुमाराय शुभं करोतु ॥
>
> विधातृपद्माक्षिमहोक्षवाहाः सरस्वती श्रीगिरिजासमेता ।
> ··· ··· ··· ··· ··· ··· भद्रं कुमाराय शुभं करोतु ॥

मासाश्च पक्षाश्च दिनानि वारा राश्यर्क्षयोगः करणानि सम्यक् ।
ग्रहाश्च वेदादितिजाः समन्त्राः श्रियं कुमारं ताः कुर्वन्तु वां मंगलम् ॥

[The last line in obviously contrary to metre]

नवग्रहस्तोत्रम्

The text, presented here, is based on a collation of transcripts of the following manuscripts :—

M — MS. No. D 9529 belonging to Govt. Oriental Manuscripts Library, Madras.

Title : नवग्रहमंगलाष्टकम् ।

P — MS , belonging to University of Pennsylvania, Philadelphia, noticed in Poleman's *A Census of Indic Manuscripts*, No. 4959.

Title : नवग्रहस्तोत्रम् ।

नवग्रहस्तोत्रम्

भास्वान् काश्यपगोत्रजोरुणरुचिर्यः सिंहराशीश्वरः
षट्त्रिस्थो दश शोभनो गुरु शशी भौम सुमित्रः सदा ।
शुक्रो मन्दरिपुः कलिङ्गजनितश्चाग्नीश्वरो देवता
मध्ये वर्तुलपूर्वदिग्दिनकरः कुर्यात्सदा मंगलम् ॥ १ ॥

चन्द्रः कर्कटकः प्रभुःसितनिभश्चात्रेयगोत्रोद्भव-
श्चाग्नेयश्चतुरश्रवारुणमुखश्चापो (?) उमाधीश्वरः ।
षट्सप्ताग्नि दशैक शोभनपरो शौरिः कुजोर्कप्रियः
स्वामी यामुनदेशजो हिमकरः कुर्यात्सदा मंगलम् ॥ २ ॥

भौमो दक्षिणदिक् त्रिकोणयमदिग्विन्ध्येश्वरः खादिरः
स्वामी वृश्चिकमेषयोः सुरगुरुश्चार्कः शशी सौहृदः ।
शौरिः षट्त्रिफलप्रदस्तु वसुधास्कन्धः क्रमाद् देवता
भारद्वाजकुलोद्भवः क्षितिसुतः कुर्यात्सदा मंगलम् ॥ ३ ॥

---

1. (a) M सिंहपोर्कः समित् for सिंहराशीश्वरः.

2. (c) M फलः सौम्यस्तयार्कप्रियः for परो ··· प्रिय.

(d) M पर्णतन्धिः for जो हिमकरः.

सौम्योदङ्मुखपीतवर्णमगधश्चात्रेयगोत्रोद्भवो
बाणेशानदिशः सुहृद्रविसुतः शत्रुर्धनुः शीतगुः ।
कन्या युग्मपतिर्दशाष्टचतुरः षण्णेत्रगः शोभनो
विष्णुर्जिष्णवधिदेवता शशिसुतः कुर्यात्सदा मंगलम् ॥ ४ ॥

जीवांगिरसगोत्रजोत्तरमुखो दीर्घोत्तरासंस्थतः
प्रीतोश्वत्थसमिच्च सिन्धु-जनितश्चेन्द्रो विधिर्दैवता ।
सूर्येन्दुक्षितिजप्रियः शशिसुतः शत्रुर्धनुर्मीनपः
सप्तांशद्विशरप्रियः सुरगुरुः कुर्यात्सदा मंगलम् ॥ ५ ॥

शुक्रो भार्गवगोत्रजः सितनिभः ··· मुखः पूर्वदिक्
पंचालस्थवृषस्तुलाधिपमहाराष्ट्राधिपोदुंबरः ।
इन्द्राणी मघवा च बोधनशनिर्मित्रेन्दुसूर्यावरी
षष्ठाग्निर्दशवर्जितेषु शुभदः कुर्यात्सदा मंगलम् ॥ ६ ॥

मन्दः कृष्णनिभस्तु पश्चिममुखः सौराष्ट्रपः काश्यपः
स्वामी माकरकुम्भयोर्भृगुबुधो मित्रार्कचन्द्रा रिपुः ।
स्थानं पश्चिमदिक् प्रजापतियमौ देवौ धनुष्यासनौ
षट्त्रिस्थः शुभकृच्छमी रविसुतः कुर्यात्सदा मंगलम् ॥ ७ ॥

राहुः सिहलदेशजो निर्ऋतिः कृष्णांगशूर्पासनो
यः पैठोनसगोत्रसंभवसमिद्दूर्वामुखो दक्षिणः ।
यः सार्पोऽर्यधिदेवता निर्ऋतिः प्रत्याधिदेवः सदा
षट्त्रिस्थः शुभकृच्च सिहगसुतः कुर्यात्सदा मंगलम् ॥ ८ ॥

---

4. (a) M सौम्यः पीत उदङ्मुखः समिधपाम् for सौम्यो ··· मगध
   (b) P सुहृद् ··· भृगुः शत्रुर्गुरुः शीतगुः for सुहृद् ··· शीतगु.
   (d) M मगधजः for शशिसुतः.

5. (a) M जीवश्चांगिर for जीवांगिरस
   (b) M वीतो for प्रीतो. P श्चापोऽथ मीनाधिपः for जनित ··· दैवता.
   (c) M बुधसितः for सुरगुरुः.

7. (b) M reads the line thus—नक्रः कुम्भपमित्रसौम्यभृगुजावर्केन्दुभौमारयः.
   (c) M धनुश्चासनात् for धनुष्यासनौ.

केतुर्जैमिनिगोत्रजः कुशसमिद्वायव्यकोणेस्थित-
श्चित्राङ्गो ध्वजलाञ्छनो भगवता हव्योपमाशामुखः ।
ब्रह्मा चैव सचित्रविम्बसहितः प्रत्याधिदेवः सदा
षट्त्रिस्थः शुभकृच्च केतुगणकः कुर्यात्सदा मंगलम् ॥ ९ ॥

इत्येतद्ग्रहमंगलाष्टकमिदं लोकोपकारप्रदं
पापो प्रशमंमहाशुभकरं सौभाग्यसंवर्धनम् ।
यः प्रातः शृणुयात्पठेत्प्रतिदिनं श्रीकालिदासोदितं
स्तोत्रं मंगलदायकं शुभकरं सौभाग्यदः सर्वदा ॥१०॥

इति श्रीकालिदासविरचितं नवग्रहस्तोत्रं समाप्तम् ॥*

---

9. (b) M चित्रांक for चित्राङ्गो; दि भगवान् यो दक्षिणादिङ् खः for भगवता ··· मुखः.

10. M reads the stanza thus :—

इत्येतद्ग्रहमंगलाष्टकमिदं पापौघविच्छेदनम्
पुण्यं संप्रति कालिदासकविना नित्यं प्रबन्धीकृतम् ।
प्रातर्यस्तु पठेत्समाहितधिया ··· ··· सेवया
गंगासागरसंगमे प्रतिदिनं स्नात्वा फलं लभ्यते ॥

* No colophon in M.

नवरत्नमाला[1]

ॐकारपंजरशुकीमुपनिषदुद्यानकेलिकलकण्ठीम् ।
आगमविपिनमयूरीमार्यामन्तर्विभावये गौरीम् ॥ १ ॥

दयमानदीर्घनयनां देशिकरूपेण दर्शिताभ्युदयाम् ।
वामकुचनिहितवीणां वरदां संगीतमातृकां वन्दे ॥ २ ॥

श्यामलिमसौकुमार्यामानन्दामन्दसंपदुन्मेषाम् ।
तरुणिमकरुणापूरां मदजलकल्लोललोचनां वन्दे ॥ ३ ॥

नखमुखमुखरितवीणानादरसास्वादनवनवोल्लासम् ।
मुखमम्ब मोदयतु मां मुक्ताताटङ्कमुग्धहसितं ते ॥ ४ ॥

सरिगमपधनिरतां तां वीणासंक्रान्तकान्तहस्तान्ताम् ।
शान्तां मृदुलस्वान्तां कुचभरतान्तां[2] नमामि शिवकान्ताम् ॥५॥

अवटुतटघटितचूलीपालीं तालीपलाशताटङ्काम् ।
वीणावादनवेलाकम्पितशिरसं नमामि मातङ्गीम् ॥ ६ ॥

वीणारवानुषङ्गं विकचमदामोदमाधुरीभृङ्गम् ।
करुणापूरतरङ्गं कलये मातङ्गकन्यकापाङ्गम् ॥ ७ ॥

मणिभङ्गमेचकाङ्गीं मातङ्गीं नौमि सिद्धमातङ्गीम् ।
यौवनवनसारङ्गीं संगीताम्भोरुहानुभवभृङ्गीम् ॥ ८ ॥

मेचकमासेचनकं मिथ्यादृष्टान्तमध्यभागं तम् ।[3]
मातस्तव स्वरूपं मङ्गलसंगीतसौरभं मन्ये ॥ ९ ॥

नवरत्नमालिकाख्यां विरचितमातङ्गकन्यकाभूषाम् ।
यः पठति लिखति वैतां स भवेद्वागीश्वरः साक्षात् ॥ १० ॥

इति महाकविश्रीकालिदासकृता नवरत्नमाला समाप्ता ॥

---

1. Copied from *Kāvyamālā*, IV (3rd ed., 1937), p. 199. Alternative readings, as noted in the footnotes, are given below. The Devī-Ṣaṭka, ascribed to the *Kālikātantra*, contains verses of this hymn.

2. खिन्नां for तान्तां.

3. The line is read thus–मेचकं तदासेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शनात्.

Description of printed texts and manuscripts.

The present text is based on the Nirṇayasāgara Press edition, 194?. The variants, which are only a few, have been taken from the following.

A — Ms. No. 8296 belonging to Asiatic Society, Calcutta. Substance—Foolscap paper. $11 \times 4\frac{1}{2}$ inches. Folia–4. Lines 11 on a page. Character—Nāgara. Date—Saṃvat 1961. Complete.

Beng-Text of the *Puṣpabāṇa-vilāsa* in Bengali characters, with Bengali translation, included in the *Kālidāser Granthāvalī*, Calcutta, 1322 B. S.

J — Text in the ed. by J. Vidyāsāgara, Calcutta, 1874.

M — Transcript of MS. No. D 11971 belonging to Govt. Oriental MSS Library, Madras.

पुष्पबाणविलासम्

शार्दूलविक्रीडित

श्रीमद्गोपवधूस्वयंग्रहपरिष्वङ्गेषु तुङ्गस्तन-
व्यामर्दंगलितेऽपि चन्दनरजस्यङ्गे वहन् सौरभम् ।
कश्चिज्जागरजातरागनयनद्वन्द्वः प्रभाते श्रियं
बिभ्रत्कामपि वेणुनादरसिको जाराग्रणीः पातु वः ॥ १ ॥

मालिनी

भुवनविदितमासीद् यच्चरित्रं विचित्रं
सह युवतिसहस्रैः क्रीडतो नन्दसूनो ।
तदखिलमवलम्ब्य स्वादु श्रृङ्गारकाव्यं
रचयितुमनसो मे शारदास्तु प्रसन्ना ॥ २ ॥

शार्दूलविक्रीडित

कान्ते दृष्टिपथं गते नयनयोरासीद्विकासो महान्
प्राप्ते निर्जनमालयं पुलकिता जाता तनुः सुभ्रुवः ।
वक्षोजग्रहणोत्सुके समभवत्सर्वाङ्गकम्पोदयः
कण्ठालिङ्गनतत्परे विगलिता नीवी दृढापि स्वयम् ॥ ३ ॥

Verse 1–(d) M नः for वः .

शार्दूलविक्रीडित

मां दूरादरविन्दसुन्दरदरस्मेरानना संप्रति
द्रागुत्तुङ्गघनस्तनाङ्कनगलच्चारूत्तरीयाञ्चला ।
प्रत्यासन्नजनप्रतारणपरा पाणिं प्रसार्यान्तिके
नेत्रान्तस्य चिरं कुरङ्गनयना साकूतमालोकते ॥ ४ ॥

वसन्ततिलक

नीरन्ध्रमेतदवलोकय माधवीनां
मध्ये निकुञ्जसदनं च्युतपुष्पकीर्णम् ।
कुर्युर्यदीह मणितानि विलासवत्यो
बोद्धुं न शक्यमबले निनदैः पिकानाम् ॥ ५ ॥

शार्दूलविक्रीडित

दष्टं बिम्बधियाधराग्रमरुणं पर्याकुलो धावनात्
धम्मिल्लस्तिलकं श्रमाम्बुगलितं छिन्ना तनुः कण्टकैः ।
आः कर्णज्वरकारिकङ्कणझनत्कारं करौ धुन्वती
किं भ्राम्यस्यटवीशुकाय कुसुमान्येषा ननान्दाग्रहीत् ॥ ६ ॥

शार्दूलविक्रीडित

बिभ्राणा करपल्लवेन कवरीमेकेन पर्याकुला-
मन्येन स्तनमण्डले निदधती स्रस्तं दुकूलाञ्चलम् ।
एषा चन्दनलेशलाञ्छिततनुस्ताम्बूलरक्ताधरा
निर्याति प्रियमन्दिराद्रतिपतेः साक्षाज्जयश्रीरिव ॥ ७ ॥

शार्दूलविक्रीडित

कान्तो यास्यति दूरदेशमिति मे चिन्ता परं जायते
लोकानन्दकरो हि चन्द्रवदने वैरायते चन्द्रमाः ।
किं चायं वितनोति कोकिलकलालापो विलापोदयं
प्राणानेव हरन्ति हन्त नितरामाराममन्दानिलाः ॥ ८ ॥

मालिनी

नवकिसलयतल्पं कल्पितं तापशान्त्यै
करसरसिजसङ्गात्केवलं म्लापयन्त्याः ।
कुसुमशरकृशानुप्रापिताङ्गारतायाः
शिव शिव परितापं को वदेत्कोमलाङ्ग्याः ॥ ९ ॥

Verse 8–(b) Beng., M करोऽपि for करो हि.

शार्दूलविक्रीडित

शेते शीतकरोऽम्बुजे कुवलयद्वन्द्वाद्विनिर्गच्छति
स्वच्छा मौक्तिकसंहतिर्धवलिमा हैमीं लतामश्नुते ।
स्पर्शात्पङ्कजकोशयोरभिनवा यान्ति स्रजः क्लान्तताम्
पक्षात्पातपरंपरा मम सखे यात्रास्पृहां कृन्तति ॥१०॥

शार्दूलविक्रीडित

दूतीदं नयनोत्पलद्वयमहो तान्तं नितान्तं तव
स्वेदाम्भःकणिका ललाटफलके मुक्ताश्रियं बिभ्रति ।
निःश्वासाः प्रचुरीभवन्ति नितरां हा हन्त चन्द्रातपे
यातायातवशाद्वृथा मम कृते श्रान्तासि कान्ताकृते ॥११॥

मालिनी

अधिवसति वसन्ते मर्तुकामा दुरन्ते
नवकिसलयतल्पं पुञ्जिताङ्गारकल्पम् ।
विरहमसहमाना चक्रवाकीसमाना
चकितवनकुरङ्गीलोचना कोमलाङ्गी ॥१२॥

शार्दूलविक्रीडित

नैष्ठुर्यं कलकण्ठकोमलगिरां पूर्णस्य शीतद्युते-
स्तिग्मत्वं बत दक्षिणस्य मरुतो दाक्षिण्यहानिश्च ताम् ।
स्मर्तव्याकृतिमेव कर्तुमबलां सन्नाहमातन्वते
तद्विघ्नः क्रियते तृणादिचलनोद्भूतैस्त्वदाप्तिभ्रमैः ॥१३॥

शार्दूलविक्रीडित

साश्रे मा कुरु लोचने विगलति न्यस्तं शलाकाञ्जनं
तीव्रं निःश्वसितं निवर्तय नवास्ताम्यन्ति कण्ठस्रजः ।
तल्पे मा लुठ कामलाङ्गि तनुतां हन्ताङ्गरागोऽश्नुते
नातीतो दयितोपयानसमयो मास्मान्यथा मन्यथाः ॥१४॥

शार्दूलविक्रीडित

काचित्सार्वजनीनविभ्रमपरा मध्येसखीमण्डलं
लीलाधिभ्रुवसंज्ञया विदधती सख्या सहाभाषणम् ।
अक्ष्णोरञ्जनमञ्जसा शशिमुखी विन्यस्य वक्षोजयोः
स्थूलभावुकयोः स्थितं मणिसरं चेलाञ्चलेनाप्याधात् ॥१५॥

Verse 14–(a) M विगलितं for विगलति.

Verse 15–(d) M भावकयोः for भावुकयोः.

शार्दूलविक्रीडित

जिघ्रत्याननमिन्दुकान्तिरधरं बिम्बप्रभा चुम्बति
स्प्रष्टुं वाञ्छति चारुपद्ममुकुलच्छायाविशेषः स्तनौ ।
लक्ष्मीः कोकनदस्य खेलति करावालम्ब्य किंचादरा-
देतस्याः सुदृशः करोति पद्योः सेवां प्रवालद्युतिः ॥१६॥

वसन्ततिलक

दूति त्वया कृतमदो निखिलं मदुक्तं
न त्वादृशी परहितप्रवणास्ति लोके ।
श्रान्तासि हन्त मृदुलाङ्गि गता मदर्थं
सिध्यन्ति कुत्र सुकृतानि विना श्रमेण ॥१७॥

मञ्जुभाषिणी

न बरीभरीति कबरीभरे स्रजो
न चरीकरोति मृगनाभिचित्रकम् ।
चिजरीहरीति न पुरेव मत्पुरो
विवरीवरीति न च विप्रियं प्रिया ॥१८॥

शार्दूलविक्रीडित

गूढालिङ्गनगण्डचुम्बनकुचस्पर्शादिलीलायितं
सर्वं विस्मृतमेव विस्तृतमहो बाले खलेभ्यो भयात् ।
संलापस्त्वधुना सुदुर्घटतमस्तत्रापि नाति व्यथा
यत्त्वद्दर्शनमप्यभूदसुलभं तेनैव दूये भृशम् ॥१९॥

शार्दूलविक्रीडित

या चन्द्रस्य कलङ्किनो जनयति स्मेराननेन त्रपां
वाचा मन्दिरकीरसुन्दरगिरो या सर्वदा निन्दति ।
निःश्वासेन तिरस्करोति कमलामोदान्वितान् यानिलान्
सा तैरेव रहस्त्वया विरहिता कांचिद्दशां नीयते ॥२०॥

Verse 17–(a) M यदुक्तं for मदुक्तं.
–(c) M क्लान्तासि for श्रान्तासि.

Verse 18–(d) A transposes न and च.

Verse 19–(a) M गाढ for गूढ.
–(b) A, J, Beng. विस्तृतवतो for विस्तृतमहो.
–(c) M संलापाऽप्यधुना for संलापस्त्वधुना.

शार्दूलविक्रीडित

तन्वी सा यदि गायति श्रुतिकटुर्वीणाध्वनिर्जायते
यद्याविष्कुरुते स्मितानि मलिनैवालक्ष्यते चन्द्रिका ।
आस्ते म्लानमिवोत्पलं नवमपि स्याच्चेत्पुरो नेत्रयो-
स्तस्याः श्रीरवलोक्यते यदि तडिद्वल्ली विवर्णैव सा ॥२१॥

शार्दूलविक्रीडित

सत्यं तद् यदवोचथा मम महान् रागस्त्वदीयादिति
त्वं प्राप्तोऽसि विभात एव सदनं मां द्रष्टुकामो यतः ।
रागं किं च बिभर्षि नाथ हृदये काश्मीरपत्रोदितं
नेत्रे जागरजं ललाटफलके लाक्षारसापादितम् ॥२२॥

शार्दूलविक्रीडित

एतस्मिन् सहसा वसन्तसमये प्राणेश देशान्तरं
गन्तुं त्वं यतसे तथापि न भयं तापात्प्रपद्येऽधुना ।
यस्मात्कैरवसारसौरभमुषा साकं सरो वायुना
चान्द्री दिक्षु विजृम्भते रजनिषु स्वच्छा मयूखच्छटा ॥२३॥

शार्दूलविक्रीडित

चक्षुर्जाड्यमुपैति मानिनि मुखं संदर्शय श्रोत्रयोः
पीयूषस्रुतिसौख्यमस्तु मधुरां वाचं प्रिये व्याहर ।
तापः शाम्यतु मे प्रसादशिशिरां दृष्टिं शनैः पातय
त्यक्त्वा दीर्घमभूतपूर्वमचिराद्रोषं सखीदोषजम् ॥२४॥

शार्दूलविक्रीडित

मानम्लानमना मनागपि नतं नालोकते वल्लभं
निर्याते दयिते निरन्तरमियं बाला परं तप्यते ।
आनीते रमणे बलात्परिजनैर्मौनं समालम्बते
धत्ते कण्ठगतानसून् प्रियतमे निर्गन्तुकामे पुनः ॥२५॥

Verse 21–(c) M च नवमप्यास्ते for नव ··· चेत्.

Verse 22–(b) M यत् for त्वं.

–(c) A काश्मीरपत्रोदिते for का ··· तं.

Verse 24–(c) M दीर्घमेव शिशिरां for मे ··· शिशिरां.

शार्दूलविक्रीडित

कर्णारुन्तुदमेव कोकिलरुतं तस्याः श्रुते भाषिते
चन्द्रे लोकरुचिस्तदाननरुचेः प्रागेव संदर्शनात् ।
चक्षुर्मीलनमेव तन्नयनयोरग्रे मृगीणां वरं
हैमी वल्ल्यपि तावदेव ललिता यावन्न सा लक्ष्यते ॥२६॥

*इति कालिदासकृतं पुष्पबाणविलासं संपूर्णम् ।

---

26. (b) A चन्द्रालोक for चन्द्रे लोक.

* A reads the colophon thus—इति श्रीकविकुलतिलकपूज्यपादश्रीमत्कालि-दासविरचितं पुष्पबाणविलासकाव्यं समाप्तम् ।

J reads—इति श्रीकालिदासकृतपुष्पबाणविलासः समाप्तः ।

M—no colophon.

ऋतुसंहारः

[The text, presented here; is based on a collation of the following printed editions :—

N — Nirṇayasāgara Press, 19[illegible]2

C — Chowkhamba, Benares, 1955.

Beng-Printed in Bengali script in *Kālidāser Granthāvali*, Calcutta, Variants have been noted. MS. indicates the alternative readings, based on MSS, noted in the footnotes of the NSP edition.]

ऋतुसंहारः

प्रथमः सर्गः

प्रचण्डसूर्यः स्पृहणीयचन्द्रमाः
सदावगाह क्षतवारिसंचयः ।
दिनान्तरम्योऽभ्युपशान्तमन्मथो
निदाघकालोऽयमुपागतः प्रिये ॥ १ ॥

निशाः शशाङ्क क्षतनीलराजयः
क्वचिद्विचित्रं जलयन्त्रमन्दिरम् ।
मणिप्रकाराः सरसं च चन्दनं
शुचौ प्रिये यान्ति जनस्य सेव्यताम् ॥ २ ॥

सुवासितं हर्म्यतलं मनोहरं
प्रियामुखोच्छ्वासविकम्पितं मधु ।
सुतन्त्रिगीतं मदनस्य दीपनं
शुचौ निशीथेऽनुभवन्ति कामिनः ॥ ३ ॥

नितम्बबिम्बैः सदुकूलमेखलैः
स्तनैः सहाराभरणैः सचन्दनैः ।
शिरोरुहैः स्नानकषायवासितैः
स्त्रियो निदाघं शमयन्ति कामिनाम् ॥ ४ ॥

---

1. (b) MS. क्षम for क्षत.
   (d) MS. समुपागतः for अयमुपागतः .
2. (a) MS. नीर for नील.
3. (a) MS. मनोरमं for मनोहरं.
   (b) MS. विकल्पितं for विकम्पितम्.
4. (a) MS. सुदूकुल for स०.

नितान्त लाक्षारसरागलोहितै-
नितम्बिनीनां चरणैः सनूपुरैः ।
पदे पदे हंसरुतानुकारिभि-
र्जनस्य चित्तं क्रियते समन्मथम् ॥ ५ ॥

पयोधराश्चन्दनपंकचर्चिता-
स्तुषारगौरार्पितहारशेखराः ।
नितम्बदेशाश्च सहेममेखलाः
प्रकुर्वते कस्य मनो न सोत्सुकम् ॥ ६ ॥

समुद्गतस्वेदचिताङ्गसन्धयो
विमुच्य वासांसि गुरूणि सांप्रतम् ।
स्तनेषु तन्वंशुकमुन्नतस्तना
निवेशयन्ति प्रमदाः सयौवनाः ॥ ७ ॥

सचन्दनाम्बुव्यजनोद्भवानिलैः
सहारयष्टिस्तनमण्डलार्पितैः ।
सवल्लकीकाकलिगीतनिस्वनैः
विबोध्यते सुप्त इवाद्य मन्मथः ॥ ८ ॥

सितेषु हर्म्येषु निशासु योषितां
सुखप्रसुप्तानि मुखानि चन्द्रमाः ।
विलोक्य नूनं भृशमुत्सुकश्चिरं
निशाक्षये याति ह्रियेव पाण्डुताम् ॥ ९ ॥

---

5. (a) GN रञ्जितै for लोहितै.
6. (a) Beng. शीतला for चर्चिता.
   (c) MS. बिम्बाश्चलहेम for देशा … हेम.
7. (a) MS. समुद्यत for समुद्गत.
   (c) MS. चाच्छांशुक for तन्वंशुक.
   (d) MS. निवेशयन्ते for निवेशयन्ति.
8. (b) C, N अर्पणैः for अर्पितैः.
   (d) Beng. प्रबुध्यते for विबोध्यते.
9. (b) MS. सुखानि सुप्तानि for सुखप्रसुप्तानि.
   (c) MS. निर्यन्त्रणं (निर्यन्त्रितं) for नूनं भृशम्.
   (d) MS. एव for इव.

असह्यवातोद्गतरेणुमण्डला
प्रचण्डसूर्यातपतापिता मही ।
न शक्यते द्रष्टुमपि प्रवासिभिः
प्रियावियोगानलदग्धमानसैः ॥१०॥

मृगाः प्रचण्डातपतापिता भृशं
तृषा महत्या परिशुष्कतालवः ।
वनान्तरे तोयमिति प्रधाविता
निरीक्ष्य भिन्नाञ्जनसंनिभं नभः ॥११॥

सविभ्रमैः सस्मितजिह्मवीक्षितै-
विलासवत्यो मनसि प्रवासिनाम् ।
अनङ्गसंदीपनमाशु कुर्वते
यथा प्रदोषाः शशिचारुभूषणाः ॥१२॥

रवेर्मयूखैरभितापितो भृशं
विदह्यमानः पथि तप्तपांसुभिः ।
अवाङ्मुखो जिह्मगतिः श्वसन्मुहुः
फणी मयूरस्य तले निषीदति ॥१३॥

तृषा महत्या हतविक्रमोद्यमः
श्वसन्मुहुर्दूरविदारिताननः ।
न हन्त्यदूरेऽपि गजान् मृगेश्वरो
विलोलजिह्वः स्खलिताग्रकेशरः ॥१४॥

विशुष्ककण्ठाहृतशीकराम्भसो
गभस्तिभिर्भानुमतोऽभितापिताः ।
प्रवृद्धतृणोपहता जलार्थिनो
न दन्तिनः केशरिणोऽपि बिभ्यति ॥१५॥

---

10. (a) C, N उद्धत for उद्गत. MS, उत्थित for उद्गत.
11. (c) MS. प्रमापिता for प्रधाविता.
12. (a) MS. जिह्मवीक्षितैः for जिह्मवीक्षितैः .
    (b) MS. प्रसंगिनां for प्रवासिनां.
13. (c) MS. अवाक्फणो for अवाङ् मुखो.
14. (b) MS. भूरि for दूर.
    (c) MS. हन्त्यदूरो for हन्त्यदूरे.
    (d) MS. चलित for स्खलित.
15. (a) MS. कण्ठाहत for कण्ठाहृत.
    (b) C, N अनु for अभि.

हुताग्निकल्पैः सवितुर्गभस्तिभिः
कलापिनः क्लान्तशरीरचेतसः ।
न भोगिनं घ्नन्ति समीपवर्तिनं
कलापचक्रेषु निवेशिताननम् ॥१६॥

सभद्रमुस्तं परिशुष्ककर्दमं
सरः खनन्नायतपोत्रमण्डलैः ।
रवेर्मयूखैरभितापितो भृशं
वराहयूथो विशतीव भूतलम् ॥१७॥

विवस्वता तीव्रतरांशुमालिना
सपंकतोयात्सरसोऽभितापितः ।
उत्प्लुत्य भेकस्तृषितस्य भोगिनः
फणातपत्रस्य तले निषीदति ॥१८॥

समुद्धृताशेषमृणालजालकं
विपन्नमीनं द्रुतभीतसारसम् ।
परस्परोत्पीडनसंहतैर्गजैः
कृतं सरः सान्द्रविमर्दकर्दमम् ॥१९॥

रविप्रभोद्भिन्न शिरोमणिप्रभो
विलोलजिह्वाद्वयलीढमारुतः ।
विषाग्निसूर्यातपतापितः फणी
न हन्ति मण्डूककुलं तृषाकुलः ॥२०॥

---

16. (a) MS. मरीचिभिः for गभस्तिभिः.
(b) MS. चेतनाः for चेतसः.

17. (a) MS. सुभद्र for सभद्र; परिपाण्डु for परिशुष्क.
(b) N पोतृ (Beng. पोथ) for पोत्र.
(c) MS. प्रदीप्तभासा रविणाभि for रवे ···· रभि.

18. (a) N तीक्ष्ण for तीव्र.

19. (b) MS. विखिन्न for विपन्न, मीनात् for मीनं.
(c) MS. परस्परोत्पीड़ित for प ··· न.
(d) MS. क्षतं for कृतं.

सफेनल लावृतवक्त्रसंपुटं
विनिःसृतालोहितजिह्वमुन्मुखम् ।
तृषाकुलं निःसृतमद्रिगह्वराद्
गवेषमाणं महिषीकुलं जलम् ॥२१॥

पटुतरदवदाहोच्छुष्कशष्पप्ररोहाः
परुषपवनवेगोत्क्षिप्तसंशुष्कपर्णाः ।
दिनकरपरितापक्षीणतोयाः समन्तात्
विदधति भयमुच्चैर्वीक्ष्यमाणा वनान्ताः ॥२२॥

श्वसिति विहगवर्गः शीर्णपर्णद्रुमस्थः
कपिकुलमुपयाति क्लान्तमद्रेर्निकुंजम् ।
भ्रमति गवययूथः सर्वतस्तोयमिच्छन्
शरभकुलमजिह्मं प्रोद्धरत्यम्बु कूपात् ॥२३॥

विकचवनकुसुम्भस्वच्छसिन्दूरभासा
प्रवलपवनवेगोद्भूतवेगेन तूर्णम् ।
तटविटपलताग्रालिङ्गनव्याकुलेन
दिशि दिशि परिदग्धा भूमयः पावकेन ॥२४॥

ज्वलति पवनवृद्धः पर्वतानां दरीषु
स्फुटति पटुनिनादैः शुष्कवंशस्थलीषु ।
प्रसरति तृणमध्ये लब्धवृद्धिः क्षणेन
ग्लपयति मृगवर्गं प्रान्तलग्नो दवाग्निः ॥२५॥

---

21. (a) C, N लोलायत for लालावृत.
(b) MS. विनिर्गता for विनिःसृता. उत्सुकं for उन्मुखं.
(c) MS. कन्दरात् for गह्वरात्.
(d) C, N अवेद्यमाणं for गवेषमाणं.

22. (a) MS. दवदाहात् for दवदाह, N सस्य for शष्प.
(b) MS. वेगात् for वेग.
(c) MS. परितापात् for परिताप.

23. (a) MS. वृन्दः for वर्गः, द्रुमान्तः for द्रुमस्थः .
(b) MS. निकुञ्जे for निकुञ्ज.
(d) MS. प्रोद्धरते for प्रोद्धरति.

24. (b) MS. परुष (प्रवण) for प्रबल, वेगोद्धूत for वेगोद्भूत.

25. (a) MS. ध्वनति for ज्वलति, विद्धः for वृद्धः, पर्वतान्तः for पर्वतानां.
(b) MS. स्फुरति for ज्वलति, निनादः for निनादैः.
(c) MS. मध्यं for मध्ये.
(d) MS. तपयति (क्षपयति) for ग्लपयति, वृन्दं for वर्गः .

बहुतर इव जातः शाल्मलीनां वनेषु
स्फुरति कनकगौरः कोटरेषु द्रुमाणाम् ।
परिणतदलशाखानुत्पत्याशु वृक्षान्
भ्रमति पवनधूतः सर्वतोऽग्निर्वनान्ते ॥२६॥

गजगवयमृगेन्द्रा वह्निसंतप्तदेहाः
सुहृद इव समेता द्वन्द्वभावं विहाय ।
हुतवहपरिखेदादाशु निर्गत्य कक्षाद्
विपुलपुलिनदेशान्निम्नगां संविशन्ति ॥२७॥

कमलवनचिताम्बुः पाटलामोदरम्यः
सुखसलिलनिषेकः सेव्यचन्द्रांशुहारः ।
व्रजतु तव निदाघः कामिनीभिः समेतो
निशि सुललितगीते हर्म्यपृष्ठे सुखेन ॥२८॥

इति ग्रीष्मवर्णनम् ।

---

26. (a) MS. पटतर इव यातः for बहु ··· जातः .
(b) MS. स्फुटति for स्फुरति.
(c) C, N शाखानुत्पतन्प्रांशु for शाखा ··· शु.
(d) Beng–क्रमति (MS. दहति) for भ्रमति. MS. सर्वशः for सर्वतः.

27. (b) Beng–समन्तात् for समेता. MS. शत्रु for द्वन्द्व.
(c) MS. निर्गम्य for निर्गत्य.
(d) MS. देशां for देशात्, आश्रयन्ते for संविशन्ति.

28. (a) MS. दल for वन.
(b) C, N हारः (MS. जालाः) for हासः .
(c) MS. समेतं for समेतो.
(d) MS. गीतैः for गीते.

द्वितीयः सर्गः

सशीकराम्भोधरमत्तकुंजर-
स्तडित्पताकोऽशनिशब्दमर्दलः ।
समागतो राजवदुद्धतद्युति-
र्घनागमः कामिजनप्रियः प्रिये ॥ १ ॥

नितान्तनीलोत्पलपत्रकान्तिभिः
क्वचित्प्रभिन्नाञ्जनराशिसंनिभैः ।
क्वचित्सगर्भप्रमदास्तनप्रभैः
समाचितं व्योम घनैः समन्ततः ॥ २ ॥

तृषाकुलैश्चातकपक्षिणां कुलैः
प्रयाचितास्तोयभरावलम्बिनः ।
प्रयान्ति मन्दं बहुधारवर्षिणो
बलाहकाः श्रोत्रमनोहरस्वनाः ॥ ३ ॥

बलाहकाश्चाशनिशब्दमर्दलाः
सुरेन्द्रचापं दधतस्तडिद्गुणम् ।
सुतीक्ष्णधारापतनोग्रसायकै-
स्तुदन्ति चेतः प्रसभं प्रवासिनाम् ॥ ४ ॥

प्रभिन्नवैदूर्यनिभैस्तृणाङ्कुरैः
समाचिता प्रोत्थितकन्दलीदलैः ।
विभाति शुक्लेतररत्नभूषिता
वराङ्गनेव क्षितिरिन्द्रगोपकैः ॥ ५ ॥

---

1. (a) MS. वारणः for कुंजरः.
   (c) MS. उद्धृतध्वनिः for उद्धतद्युतिः.

3. (c) MS. नव for बहु, वारि for धार.

4. (a) MS. भीषणाः (भूषणाः) for मर्दलाः.
   (c) MS. सुतीव्र for सुतीक्ष्ण, सायकाः for सायकैः.
   (d) MS. नितरां (युगपत्, ध्वनिभिः) for प्रसभं.

5. (b) MS. प्राहित for प्रोत्थित.
   (c) MS. कण्ठे वर for शुक्लेतर.

सदा मनोज्ञं स्वनदुत्सवोत्सुकं
विकीर्णविस्तीर्णकलापशोभितम् ।
ससंभ्रमालिङ्गनचुम्बनाकुलं
प्रवृत्तनृत्यं कुलमद्य बर्हिणाम् ॥ ६ ॥

निपातयन्त्यः परितस्तटद्रुमान्
प्रवृद्धवेगैः सलिलैरनिर्मलैः ।
स्त्रियः सुदुष्टा इव जातविभ्रमाः
प्रयान्ति नद्यस्त्वरिताः पयोनिधिम् ॥ ७ ॥

तृणोत्करैरुद्गतकोमलाङ्कुरै-
र्विचित्रनीलैर्हरिणीमुखक्षतैः ।
वनानि वैन्ध्यानि हरन्ति मानसं
विभूषितान्युद्गतपल्लवद्रुमैः ॥ ८ ॥

विलोलनेत्रोत्पलशोभिताननै-
र्मृगैः समन्तादुपजातसाध्वसैः ।
समाचिता सैकतिनी वनस्थली
समुत्सुकत्वं प्रकरोति चेतसः ॥ ९ ॥

---

6. (a) MS. मनोज्ञस्तनितोत्सुखोत्सुखम् (मनोज्ञाम्बुदनादसोत्सुकम्) for मनोज्ञं ⋯ कं.
   (b) MS. विकीर्णकेशाल (विभाति विस्तीर्ण) for विकीर्णविस्तीर्ण.
   (c) MS. सविभ्रम for संसंभ्रम.
   (d) MS. प्रबुद्ध for प्रवृत्त.

7. (a) MS. विपाटयन्त्यः for निपातयन्त्यः .
   (b) MS. वेगाः for वेगैः .
   (c) MS. प्रहृष्टाः (प्रदुष्टाः, प्रकामाः) for सुदुष्टाः, C जाति for जात.
   (d) C त्वरितं for त्वरिताः .

8. (a) MS. तृणोच्चयैः (तृणोद्गमैः) for तृणोत्करैः, उद्घृतकोमलां (उद्गत-कोशकुड्मलैः) for उद्गत ⋯ रैः .
   (b) MS. चितानि लेखैः for विचित्रनीलैः .
   (c) MS. रम्याणि for वैन्ध्यानि.
   (d) N पल्लवः for पल्लव.

9. (a) MS. नीलेक्षण for नेत्रोत्पल.
   (b) MS. उपयात for उपजात.
   (c) MS. शैवलिनी for सैकतिनी.

अभीक्ष्णमुच्चैर्ध्वनता पयोमुचा
घनान्धकारीकृतशर्वरीष्वपि ।
तडित्प्रभादर्शितमार्गभूमयः
प्रयान्ति रागादभिसारिकाः स्त्रियः ॥१०॥

पयोधरैर्भीमगभीरनिस्वनै-
स्तडिद्भिरुद्वेजितचेतसो भृशम् ।
कृतापराधानपि योषितः प्रियान्
परिष्वजन्ते शयने निरन्तरम् ॥११॥

विलोचनेन्दीवरवारिबिन्दुभि-
र्निषिक्तबिम्बाधरचारुपल्लवाः ।
निरस्तमाल्याभरणानुलेपनाः
स्थितानिराशाः प्रमदाः प्रवासिनाम् ॥१२॥

विपाण्डुरं कीटरजस्तृणान्वितं
भुजंगवद्वक्रगतिप्रसर्पितम् ।
ससाध्वसैर्भेककुलैर्निरीक्षितं
प्रयाति निम्नाभिमुखं नवोदकम् ॥१३॥

विपत्रपुष्पां नलिनीं समुत्सुका
विहाय भृङ्गाः श्रुतिहारिनिस्वनाः ।
पतन्ति मूढाः शिखिनां प्रनृत्यतां
कलापचक्रेषु नवोत्पलाशया ॥१४॥

---

10. (**a**) MS. सुतीक्ष्णं for अभीक्ष्णं, ध्वनितैः (स्वनतां, रसतां, ध्वनतां) for ध्वनता, पयोमुचां for ॰मुचा.
(**b**) MS. घनान्धकारावृत for घन ··· कृत.
(**d**) MS. पुरुषं पराः for अभिसारिकाः.

11. (**b**) MS. स्तनद्भिः for तडिद्भिः.

12. (**d**) MS. कृताः for स्थिताः.

13. (a) MS. विपाण्डरं for विपाण्डुरं.
(b) MS. भुजङ्गमाकार for भुजङ्गवद्वक्र.
(c) MS. विलोकितं for निरीक्षितं.

14. (a) Beng. प्रफुल्लपद्मं (MS. प्रफुल्लपत्रां, प्रफुल्लपद्मां) for विपत्रपुष्पां, नलिनी sor नलिनीं, समुत्सुकं (MS. समुत्सुकां) for समुत्सुका.
(**b**) MS. चारु for हारि.
(c) MS. विनृत्यतां for प्रनृत्यतां.

वनद्विपानां नववारिदस्वनै-
मंदान्वितानां ध्वनातां मुहुर्मुहुः ।
कपोलदेशा विमलोत्पलप्रभाः
सभृङ्गयूथैर्मदवारिभिश्चिताः ॥१५॥

सतोयनम्राम्बुदचुम्बितोपलाः
समाचिताः प्रस्रवणैः समन्ततः ।
प्रवृत्तनृत्यैः शिखिभिः समाकुलैः
समुत्सुकत्वं जनयन्ति भूधराः ॥१६॥

कदम्बसर्जार्जुनकेतकीवनं
प्रकम्पयंस्तत्कुसुमाधिवासितः ।
सशीकराम्भोधरसंगशीतलः
समीरणः कं न करोति सोत्सुकम् ॥१७॥

शिरोरुहैः श्रोणितटावलम्बिभिः
कृतावतंसैः कुसुमैः सुगन्धिभिः ।
स्तनैः सहारैर्वदनैः ससीधुभिः
स्त्रियो रतिं संजनयन्ति कामिनाम् ॥१८॥

तडिल्लताशक्रधनुर्विभूषिताः
पयोधरास्तोयभरावलम्बिनः ।
स्त्रियश्च काञ्चीमणिकुण्डलोज्ज्वला
हरन्ति चेतो युगपत्प्रवासिनाम् ॥१९॥

---

15. (a) MS. तोयद for वारिद.
(b) MS. स्वनतां for ध्वनतां.
(d) MS. श्रिताः for चिताः .

16. (a) C, N सितोत्पलाभा (MS. नीलोत्पलाभा). A MS. reads the line thus—प्रवासिनामम्बुधरोक्षितोपलाः (also चुम्बितोपलाः) for सतोयनम्रा.
(b) MS. सुभूषिताः for समाचिताः .
(c) MS. प्रवृद्ध for प्रवृत्त. C, N समाकुलाः for समाकुलैः .

17. (a) Beng. नीपकेतकीः (MS. नीपकेतनान्) for केतकीवनं.
(b) C, N विकम्पयन् for प्रकम्पयन्.
(c) MS. अधिवासनः for अधिवासितः .

18. (c) MS. सुपीनैः for सहारैः .

19. (a) MS. तडिद्गुणाः (तडिल्लताः) for तडिल्लता.
(c) MS. स्त्रियः स्वकाञ्ची for स्त्रियश्च काञ्ची, मेखला for कुण्डला.

मालाः कदम्बनवकेशरकेतकीभि-
रायोजिताः शिरसि बिभ्रति योषितोऽद्य।
कर्णान्तरेषु ककुभद्रुममंजरीभि-
रिच्छानुकूलरचितानवतंसकांश्च ॥२०॥

कालागुरुप्रचुरचन्दनचर्चिताङ्गाः
पुष्पावतंससुरभीकृतकेशपाशाः ।
श्रुत्वा ध्वनिं जलमुचां त्वरितं प्रदोषे
शय्यागृहं गुरुगृहात्प्रविशन्ति नार्यः ॥२१॥

कुवलयदलनीलैरुन्नतैस्तोयनम्रै-
र्मृदुपवनविधूतैर्मन्दमन्दं चलद्भिः ।
अपहृतमिव चेतस्तोयदैः सेन्द्रचापैः
पथिकजनवधूनां तद्वियोगाकुलानाम् ॥२२॥

मुदित इव कदम्बैर्जातपुष्पैः समन्तात्
पवनचलितशाखैः शाखिभिर्नृत्यतीव ।
हसितमिव विधत्ते सूचिभिः केतकीनां
नवसलिलनिषेकच्छिन्नतापो वनान्तः ॥२३॥

शिरसि बकुलमालां मालतीभिः समेतां
विकसितवनपुष्पैर्यूथिकाकुड्मलैश्च ।
विकचवनकदम्बैः कर्णपूरं वधूनां
रचयति जलदौघः कान्तवत्काल एषः ॥२४॥

---

20. (a) MS. माला, मंजरीणां (केतकीनां) for केतकीभिः.
(d) MS. श्रोत्रानुकूल (नेत्रानुकूल) for इच्छानुकूल.

21 (a) C, N चर्चिताङ्गचः for ०ङ्गाः.

22. (a) MS. लीलैः for नीलैः, उद्धतै for उन्नतै, स्तोक for तोय.
(d) MS. तद्वियोगक्षामानाम् for तद्वियोगाकुलानाम्.

23. (a) MS. जाति for जात.
(d) MS. निषेकात् for निषेक, शान्ततापः for छिन्नतापः.

24. (b) MS. कुसुमित for विकसित, जालकैः for कुड्मलैः.

दधति कुचयुगाग्रैरुन्नतैर्हारयष्टि
प्रतनुसितदुकूलान्यायतैः श्रोणिबिम्बैः ।
नवजलकणसेकामुद्गतां रोमराजीं
त्रिवालवलिविभागैर्मध्यदेशं च नार्यः ॥२५॥

नवजलकणसंगाच्छीततामादधानः
कुसुमभरनतानां नाशकः पादपानाम् ।
जनितरुचिरगन्धः केतकीनां रजोभि-
रपहरति नभस्वान् प्रोषितानां मनांसि ॥२६॥

जलभरनमितानामाश्रयोऽस्माकमुच्चै-
रयमिति जलसेकैस्तोयदास्तोयनम्राः ।
अतिशयपरुषाभिर्ग्रीष्मवह्नेः शिखाभिः
समुपजनिततापं ह्लादयन्तीव विन्ध्यम् ॥२७॥

बहुगुणरमणीयो योषितां चित्तहारी
तरुविटपलतानां बान्धवो निर्विकारः ।
जलदसमय एषः प्राणिनां प्राणभूतो
दिशतु तव हितानि प्रायशो वाञ्छितानि ॥२८॥

इति वर्षावर्णनं समाप्तम् ॥

---

25. (a) N वरकुचाग्रै (MS. पृथुकुचाग्रै) for कुचयुगाग्रै.
(b) MS. रुचिरतर for प्रतनुसित.
(c) MS. लव for कण, उन्नतां for उद्गतां.
(d) C ललितवलिविभं ः for त्रि ··· विभागैः (MS. त्रिवलिवलिविभङ्गैः) मध्यदेशैः for ० देशे. MS. तु for च.

26. (a) MS. सेकात् for संगात्.
(b) C लासकः (MS. लालसः) for नाशकः .
(c) MS. सुरभि for रुचिर.
(d) C परिहरति (MS. व्यपहरति) for अपहरति. MS. योषितानां for प्रोषितानां.

27. (a) C, N धरविनतानाम् for भरनमितानाम्.

28. (a) MS. इति बहुगुणरम्यः for बहु ··· यो, C कामिनी (MS. कामिनां योषितां) for योषितां.
(c) MS. एषां for एषः, प्राणिनः for प्राणिनां, प्राणहेतुः for प्राणभूतः.

तृतीयः सर्गः

काशांशुका विकचपद्ममनोज्ञवक्त्रा
सोन्मादहंसरवनूपुरनादरम्या ।
आपक्वशालिरुचिरा तनुगात्रयष्टिः
प्राप्ता शरन्नववधूरिव रूपरम्या ॥ १ ॥

काशैर्मही शिशिरदीधितिना रजन्यो
हंसैर्जलानि सरितां कुमुदैः सरांसि ।
सप्तच्छदैः कुसुमभारनतैर्वनान्ताः
शुक्लीकृतान्युपवनानि च मालतीभिः ॥ २ ॥

चञ्चन्मनोज्ञसफरीरशनाकलापाः
पर्यन्तसंस्थितसिताण्डजपंक्तिहाराः ।
नद्यो विशालपुलिनान्तनितम्बबिम्बा
मन्दं प्रयान्ति समदाः प्रमदा इवाद्य ॥ ३ ॥

व्योम क्वचिद्रजतशंखमृणालगौरै-
स्त्यक्ताम्बुभिर्लघुतया शतशः प्रयातैः ।
संलक्ष्यते पवनवेगचलैः पयोदै
राजेव चामरवरैरुपवीज्यमानः ॥ ४ ॥

भिन्नाञ्जनप्रचयकान्ति नभो मनोज्ञं
बन्धूकपुष्परचितारुणता च भूमिः ।
वप्राश्च चारुकमलावृतभूमिभागाः
प्रोत्कंठयन्ति न मनो भुवि कस्य यूनः ॥ ५ ॥

---

1. (b) MS. रुत for रव.
   (c) MS. ललिता for रुचिरा.
   (d) MS. हारिरूपा (रम्यरूपा) for रूपरम्या.
3. (a) MS. वलन् for चंचन्.
   (b) MS. भक्ति for पंक्ति.
   (c) MS. पुलिनोरु for पुलिनान्त, देशा for बिम्बा.
4. (b) MS. मुक्त (वीत) for त्यक्त.
   (c) MS. उत्प्रेक्ष्यते (उत्प्रेक्षते) for संलक्ष्यते.
   (d) MS. शतैः for वरैः, अपि for उप.
5. (b) MS. निकरारुणिता (रजसारुणिता) for रचितारुणता.
   (c) MS. चारु (पक्व) कलमा for चारुकमला.
   (d) MS. उत्कण्ठयन्ति for प्रोत्कण्ठयन्ति.

मंदानिलाकुलितचारुतराग्रशाखः
पुष्पोद्गमप्रचयकोमलपल्लवाग्रः ।
मत्तद्विरेफ परिपीतमधुप्रसेक-
श्चित्तं विदारयति कस्य न कोविदारः ॥ ६ ॥

तारागणप्रचुरभूषणमुद्वहन्ती
मेघावरोधपरिमुक्तशशाङ्कवक्त्रा ।
ज्योत्स्ना दुकूलममलं रजनी दधाना
वृद्धिं प्रयात्यनुदिनं प्रमदेव बाला ॥ ७ ॥

कारण्डवाननविघट्टितवीचिमालाः
कादम्बसारसकुलाकुलतीरदेशाः ।
कुर्वन्ति हंसविरुतैः परितो जनस्य
प्रीतिं परां कमलरेणुवृतास्तटिन्यः ॥ ८ ॥

नेत्रोत्सवो हृदयहारिमरीचिमालः
प्रह्लादकः शिशिरशीकरवारिवर्षी ।
पत्युर्वियोगविषदिग्धशरक्षतानां
चन्द्रो दहत्यतितरां तनुमंगनानाम् ॥ ९ ॥

---

6. (a) MS. सर्वमनोज्ञ (चारुमनोज्ञ) for चारुतराग्र.
   (b) MS. प्रचुर for प्रचय ; also प्रबलकोमलपल्लवाङ्गः for प्रचय····वाग्रः.
7. (a) N प्रवर for प्रचुर.
   (b) MS. मेघोपरोध for मेघावरोध.
   (c) MS. वसाना for दधाना.
8. (a) MS. कारण्डवैरभिविघट्टित, (कारण्डवाहवविघट्टित) for का···त.
   (b) MS. कुल for चय.
   (d) CN सरोरुहरजोरुणिता for परां ···· ···· वृता. MS. च नद्यः for च तटिन्यः.
9. (a) MS. गौराः for मालः.
   (b) MS. प्रह्लादयन् for प्रह्लादकः, वर्षैः for वर्षी.
   (d) MS. रुजत्यनुदिनं for दहत्यतितरां.

आकम्पयन् फलभरानतशालिजाला-
नानर्तयन् कुरवकान् कुसुमावनम्रान् ।
प्रोत्फुल्लपंकजवनां नलिनीं विधुन्वन्
यूनां मनश्चलयति प्रसभं नभस्वान् ॥१०॥

सोन्मादहंसमिथुनैरुपशोभितानि
स्वच्छानि फुल्लकमलोत्पलभूषितानि ।
मन्दप्रभातपवनोद्गतवीचिमाला-
न्युत्कंठयन्ति सहसा हृदयं सरांसि ॥११॥

नष्टं धनुर्वलभिदो जलदोदरेषु
सौदामिनी स्फुरति नाद्य वियत्पताका ।
धुन्वन्ति पक्षपवनैर्न नभो बलाकाः
पश्यन्ति नोन्नतमुखा गगनं मयूराः ॥१२॥

नृत्यप्रयोगरहितान् शिखिनो विहाय
हंसानुपैति मदनो मधुरप्रगीतान् ।
मुक्त्वा कदम्बकुटजार्जुनसर्जनीपान्
सप्तच्छदानुपगता कुसुमोद्गमश्रीः ॥१३॥

---

10. (a) MS. जालं (जालानि) for जालान्.
(b) N तरुवरान् for कुरवकान्.
(c) N उत्फुल्ल for प्रोत्फुल्ल.
(d) MS. स्खलयति (मदयति) for चलयति.

11. (b) C, N स्वच्छप्र for स्वच्छानि.
(c) MS. मन्दं for मन्द, प्रवाह (प्रचार) for पवन, उद्धुत for उद्गत.
(d) MS. प्रसभं for सहसा.

12. (a) MS. उदकेषु for उदरेषु.
(b) MS. नापि for नाद्य.
(d) MS. नोद्गत (नोद्धत) for नोन्नत.

13. (b) MS. प्रतीतान् for प्रगीतान्.
(c) MS. त्यक्त्वा for मुक्त्वा.
(d) MS. कुसुमोद्गत for ०द्गम.

शेफालिकाकुसुमगन्धमनोहराणि
स्वस्थस्थिताण्डजगणप्रतिनादितानि ।
पर्यन्तसंस्थितमृगीनयनोत्पलानि
प्रोत्कंठयन्त्युपवनानि मनांसि पुंसाम् ॥१४॥

कह्लारपद्मकुमुदानि मुहुर्विधुन्वं-
स्तत्संगमादधिकशीतलतामुपेतः ।
उत्कंठयत्यतितरां पवनः प्रभाते
पत्रान्तलग्नतुहिनाम्बुविधूयमानः ॥१५॥

संपन्नशालिनिचयावृतभूतलानि
सुस्थस्थितप्रचुरगोकुलशोभितानि ।
हंसैश्च सारसकुलैः प्रतिनादितानि
सीमान्तराणि जनयन्ति जनप्रमोदम् ॥१६॥

हंसैर्जिता सुललिता गतिरंगनाना-
मम्भोरुहैर्विकसितैर्मुखचन्द्रकान्तिः ।
नीलोत्पलैर्मदचलानि विलोकितानि
भ्रूविभ्रमाश्च रुचिरास्तनुभिस्तरङ्गैः ॥१७॥

---

14. (a) Beng. राग for गन्ध.
 (b) MS. शाखा (सुस्थ, कच्छ) for स्वस्थ, प्रतिवादितानि for प्रति-नादितानि.
 (d) MS. यूनां for पुंसां.

15. (a) MS. कुसुमानि for कुमुदानि, मुदा for मुहु.
 (b) MS. उपेत्य for उपेतः.
 (c) MS. सोत्कां करोति for उत्कण्ठयति.
 (d) MS. तुहिनानि हरंस्तरूणाम् (तुहिनाम्बुविधूननेन) for तुहि....मानः.

16. (b) C, N स्वस्थ for सुस्थ.
 (c) C, N ससारस for श्च सारस.
 (d) C, N नृणां for जन.

17. (c) Beng. C, N कलानि for चलानि MS. विलोचनानि for विलोकितानि.
 (d) MS. सरितां for रुचिरा.

श्यामा लताः कुसुमभारनतप्रवालाः
स्त्रीणां हरन्ति धृतभूषणबाहुकान्तिम् ।
ओष्ठावभासविशदस्मितचन्द्रकान्ति
कंकेलिपुष्परुचिरा नवमालिकाश्च ॥१८॥

केशान्नितान्तघननीलविकुंचिताग्रा-
नापूरयन्ति वनिता नवमालतीभिः ।
कर्णेषु च प्रवरकांचनकुड्मलेषु
नीलोत्पलानि विविधानि निवेशयन्ति ॥१९॥

हारैः सचन्दनरसैः स्तनमंडलानि
श्रोणीतटं सुविपुलं रशनाकलापैः ।
पादाम्बुजानि कलनूपुरशेखरैश्च
नार्यः प्रहृष्टमनसोऽद्य विभूषयन्ति ॥२०॥

स्फुटकुमुदचितानां राजहंसस्थितानां
मरकतमणिभासा वारिणा भूषितानाम् ।
श्रियमतिशयरूपां व्योम तोयाशयानां
वहति विगतमेघं चन्द्रतारावकीर्णम् ॥२१॥

शरदि कुसुमसंगाद्वायवो वान्ति शीता
विगतजलदवृन्दा दिग्विभागा मनोज्ञाः ।
विगतकलुषमम्भः श्यानपंका धरित्री
विमलकिरणचन्द्रं व्योम ताराविचित्रम् ॥२२॥

---

18. (b) MS. बहु (भूत) for धृत.
(c) MS. दन्त for ओष्ठ, वस्त्र for चन्द्र.
(d) MS. साशोक (बन्धूक) for कंकेलि, C, N नवमालती च for नवमालिकाश्च.

19. (c) MS. प्रचुर (प्रबल, प्रचल) for प्रवर, कुण्डलेषु for कुड्मलेषु.
(d) MS. विकचानि for विविधानि, निवेशयन्ते.

20. (c) MS. पादाम्बुजं for पादाम्बुजानि, वर for कल, also कनकनूपुर for कलनूपुर, कनकनिर्मितनूपुरैः for कल ... च.
(d) MS. प्रसन्न for प्रहृष्ट, प्रविभूषयन्ते for अद्य विभूषयन्ति.

21. (a) MS. हंसाश्रितानां for हंस.
(b) MS. पूरितानां for भूषितानां.

22. (a) N कुमुद for कुसुम, तोयात् for संगात्, यान्ति for वान्ति,
(b) MS. विशद for विगत.
(c) MS. शालिपक्वा for श्यानपंका.

दिवसकरमयूखैर्बोध्यमानं प्रभाते
वरयुवतिमुखाभं पंकजं जृंभतेऽद्य ।
कुमुदमपि गतेऽस्तं लीयते चन्द्रबिम्बे
हसितमिव वधूनां प्रोषितेषु प्रियेषु ॥२३॥

असितनयनलक्ष्मीं लक्षयित्वोत्पलेषु
क्वणितकनककान्ति मत्तहंसस्वनेषु ।
अधररुचिरशोभां बन्धुजीवे प्रियाणां
पथिकजन इदानीं रोदिति भ्रान्तचेताः ॥२४॥

स्त्रीणां विहाय वदनेषु शशाङ्कलक्ष्मीं
कामं च हंसवचनं मणिनूपुरेषु ।
बन्धूककान्तिमधरेषु मनोहरेषु
क्वापि प्रयाति सुभगा शरदागमश्रीः ॥२५॥

विकचकमलवक्त्रा फुल्लनीलोत्पलाक्षी
विकसितनवकाशश्वेतवासो वसाना ।
कुमुदरुचिरहासा कामिनीवोन्मदेयं
प्रतिदिशतु शरद्वश्चेतसः प्रीतिमग्र्याम् ॥२६॥

इति शरद्वर्णनं समाप्तम् ॥

---

23. (b) MS. शोभते for जृम्भते.
(c) MS. म्लायते for लीयते, बिम्बम् for बिम्बे.

24. (a) MS. कान्ति for लक्ष्मीं.
(b) C काञ्चीं for कान्ति. MS. हंसी for हंस.
(c) MS. प्रियायाः for प्रियाणां.
(d) C, N चित्तः for चेताः .

25. (a) MS. निनाय for विहाय, लक्ष्मीः for लक्ष्मीं.
(b) MS. reads the line as हास्ये विशुद्धवदने कुमुदाकरश्रीम् (श्रीः).
(c) MS. कान्तिः for कान्तिम्.
(d) C कापि for क्वापि.

26. (b) MS. reads the line विकसितनवकाशासंकुलालम्बिवस्त्रा (कुसुमितवनकाशाव्याकुलालम्बिवासा).
(c) C, N कान्ति for हासा., MS. चोन्मदाद्य for वोन्मदेयं.
(d) MS. परि (उप) for प्रति, चेतसा (चेतसि) for चेतसः, उग्राम् for अग्र्याम्.

चतुर्थः सर्गः

नवप्रवालोद्गमशस्यरम्यः
    प्रफुल्ललोध्रः परिपक्वशालिः ।
विलीनपद्मः प्रपतत्तुषारो
    हेमन्तकालः समुपागतः प्रिये ॥ १ ॥

मनोहरैः कुंकुमरागरक्तै-
    स्तुषारकुन्देन्दुनिभैश्च हारैः ।
विलासिनीनां स्तनशालिनीना-
    मलंक्रियन्ते स्तनमंडलानि ॥ २ ॥

न बाहुयुग्मेषु विलासिनीनां
    प्रयान्ति संगं वलयाङ्गदानि ।
नितम्बदेशेषु नव दुकूलं
    तन्वंशुकं पीनपयोधरेषु ॥ ३ ॥

काञ्चीगुणैः कांचनरत्नचित्रै-
    र्नभूषयन्ति प्रमदा नितम्बान् ।
न नूपुरैर्हंसरुतं भजद्भिः
    पादाम्बुजान्यम्बुजकान्तिभाञ्जि ॥ ४ ॥

---

1. (a) MS. यव for नव, पुष्प for शस्य.
   (c) MS. गतासु for विलीन.
   (d) C, N अयं for प्रिये.

2. (a) MS. मनोरमैः for मनोहरैः, चन्दनरागगौरैः (कुंकुमरागपिगैः, कुंकुम-रागपिंजरैः) for कुंकुमरागरक्तैः.
   (c) MS. नवयौवनानां for स्तनशालिनीनां.
   (d) MS., Beng. नालंक्रियन्ते for अलंक्रियन्ते.

3. (b) C, N बिम्बेषु for देशेषु.

4. (a) MS. रक्त for रत्न.
   (b) C, N नितम्बम् for नितम्बान्.
   (d) MS. लक्तकं शोभितानि for न्यम्बुज .... भाञ्जि, भान्ति for भाञ्जि.

गात्राणि कालीयकचर्चितानि
सपत्रलेखानि मुखाम्बुजानि ।
शिरांसि कालागुरुधूपितानि
कुर्वन्ति नार्यः सुरतोत्सवाय ॥ ५ ॥

रतिश्रमक्षामविपाण्डुवक्त्राः
संप्राप्तहर्षाभ्युदयास्तरुण्यः ।
हसन्ति नोच्चैर्दशनाग्रभिन्नान्
प्रपीड्यमानानधरानवेक्ष्य ॥ ६ ॥

पीनस्तनोरःस्थलभागशोभा-
मासाद्य तत्पीडनजातखेदः ।
तृणाग्रलग्नैस्तुहिनैः पतद्भि-
राक्रन्दतीवोषसि शीतकालः ॥ ७ ॥

प्रभूतशालिप्रसवैश्चितानि
मृगाङ्गनायूथविभूषितानि ।
मनोहरक्रौञ्चनिनादितानि
सीमान्तराण्युत्सुकयन्ति चेतः ॥ ८ ॥

प्रफुल्लनीलोत्पलशोभितानि
सोन्मादकादम्बविभूषितानि ।
प्रसन्नतोयानि सुशीतलानि
सरांसि चेतांसि हरन्ति पुंसाम् ॥ ९ ॥

---

5. (b) MS. नख for मुख.
(d) MS. भवन्ति for कुर्वन्ति.

6. (a) Beng. क्षीण for क्षाम.
(b) Beng. प्राप्तोऽपि हर्षाभ्युदये तरुणाः for हर्षा .... तरुण्यः.
(d) MS. प्रभिन्नरागान् for प्र .... मानान्.

7. (a) C, N Beng. स्तनोरु for स्तनोरः, MS. भार for भाग.
(c) Beng. लम्बै for लग्नै.

8. (a) MS. प्रसूति for प्रभूत, प्रचयै for प्रसवै.
(c) MS. विलासितानि for निनादितानि.

9. (b) MS. reads the line as शरादिकादम्बविघट्टितानि.
(c) MS. प्रफुल्ल for प्रसन्न., सशैवलानि for सुशीतलानि.
(d) MS. यूनाम् for पुंसाम्.

पाकं व्रजन्ती हिमजातशीतै-
राधूयमाना सततं मरुद्भिः ।
प्रिये प्रियंगुः प्रियविप्रयुक्तां
विपाण्डुतां याति विलासिनीनाम् ॥१०॥

पुष्पासवामोदसुगन्धिवक्त्रो
निश्वासवातैः सुरभीकृताङ्गः ।
परस्पराङ्गव्यतिषंगशायी
शेते जनः कामशरानुविद्धः ॥११॥

दन्तच्छदैः सव्रणदन्तचिह्नैः
स्तनैश्च पाण्यग्रकृताभिलेखैः ।
संसूच्यते निर्दयमङ्गनानां
रतोपभोगो नवयौवनानाम् ॥१२॥

काचिद्विभूषयति दर्पणसक्तहस्ता
बालातपेषु वनिता वदनारविन्दम् ।
दन्तच्छदं प्रियतमेन निपीतसारं
दन्ताग्रभिन्नमवकृष्य निरीक्ष्यते च ॥१३॥

अन्या प्रकामसुरतश्रमखिन्नदेहा
रात्रिप्रजागरविपाटलनेत्रपद्मा ।
शय्यान्तदेशलुलिताकुलकेशपाशा
निद्रां प्रयाति मृदुसूर्यकराभितप्ता ॥१४॥

---

10. (a) MS. संग for जात.
(d) C विलासिनीव for विलासिनीनाम्.

11. (a) N आमोदि for आमोद.
(b) MS. कृतान्तः for कृतांगः .
(c) C, N व्यतिरिक्त for व्यतिसंग.
(d) C, N रस for शर.

12. (a) MS. दन्तविघात for सव्रणदन्त.

13. (b) MS. बाला विलोलचिकुरं for बाला ··· वनिता.
(d) C निरीक्षते for निरीक्ष्यते. MS. अपकृष्य for अवकृष्य.

14. (a) MS. अन्याः for अन्या.
(b) MS. नक्त (नक्त) for रात्रि, पद्माः for पद्मा.
(c) C, N स्नस्तांस for शय्यान्त.
(d) MS. प्रयान्ति for प्रयाति. दिनकराभितप्ताः for सूर्य ··· प्ता.

निर्माल्यदाम परिमुक्तमनोज्ञगन्धं
मूर्ध्नोऽपनीय घननीलशिरोरुहान्ताः ।
पीनोन्नतस्तनभरानतगात्रयष्ट्यः
कुर्वन्ति केशरचनामपरास्तरुण्यः ॥१५॥

अन्या प्रियेण परिभुक्तमवेक्ष्य गात्रं
हर्षान्विता विरचिताधरचारुशोभा ।
रक्तांशुकं परिदधाति नवं नताङ्गी
व्यालम्बनीलललितालककुंचिताक्षी ॥१६॥

अन्याश्चिरं सुरतकेलिपरिश्रमेण
स्वेदं गताः प्रशिथिलीकृतगात्रयष्ट्यः ।
संहृष्यमाणविपुलोरुपयोधरान्ताः
अभ्यंजनं विदधति प्रमदाः सुशोभाः ॥१७॥

बहुगुणरमणीयो योषितां चित्तहारी
परिणतबहुशालिव्याकुलग्रामसीमा ।
सततमतिमनोज्ञः क्रौञ्चनादोपगीतः
प्रदिशतु हिमयुक्तः काल एषः सुखं वः ॥१८॥

इति हेमन्तवर्णनं समाप्तम् ।

---

15. (a) MS. परिभूत for परिमुक्त, गन्धान् for गन्धं.
    (b) MS. शिरोरुहान्तान् for ०रुहान्ताः.
    (c) MS. reads the line as पीनस्तनोल्लसितसुन्दरगात्रवल्ल्यः.
    (d) MS. अबला for अपरा.
16. (a) MS. प्रविभक्त for परिभुक्त.
    (b) MS. राग for चारु.
    (c) N कूर्पासकं for रक्तांशुकं. C, N नवक्षताङ्गी for नव नताङ्गी.
    (d) Beng. reads the line thus—व्यालम्बिनी विलुलिताकुलकुञ्चिताक्षी.
17. (b) C, N खेदं for स्वेदं.
    (c) MS. संदृश्यमान (संपीड्यमान) for संहृष्यमाण, C, N पुलकोरु for विपुलोरु. MS. पयोधरान्ताः for ०न्ता.
    (d) MS. नेत्रांजनेन (प्रत्यंजनं) for अभ्यंजनं.
18. (b) MS. सीमः for सीमा.
    (c) MS. विनिपतिततुषारः for सत...ज्ञः, मालापरीतः foy नादोपगीतः.
    (d) MS. प्रिय for सुख.

पञ्चमः सर्गः

प्ररूढशालीक्षुचयावृतक्षिति
सुस्थस्थितक्रौञ्चनिनादशोभितम् ।
प्रकामकामं प्रमदाजनप्रियं
वरोरु कालं शिशिराह्वयं शृणु ॥ १ ॥

निरुद्धवातायनमन्दिरोदरं
हुताशनो भानुमतो गभस्तयः ।
गुरूणि वासांस्यबलाः सयौवनाः
प्रयान्ति कालोऽत्र जनस्य सेव्यताम् ॥ २ ॥

न चन्दनं चन्द्रमरीचिशीतलं
न हर्म्यपृष्ठं शरदिन्दुनिर्मलम् ।
न वायवः सान्द्रतुषारशीतला
जनस्य चित्तं रमयन्ति सांप्रतम् ॥ ३ ॥

तुषारसंघातनिपातशीतलाः
शशाङ्कभाभिः शिशिरीकृताः पुनः ।
विपाण्डुतारागणचारुभूषणा
जनस्य सेव्या न भवन्ति रात्रयः ॥ ४ ॥

गृहीतताम्बूलविलेपनस्रजः
पुष्पासवामोदितवक्त्रपंकजाः ।
प्रकामकालागुरुधूपवासिता
विशन्ति शय्यागृहमुत्सुकाः स्त्रियः ॥ ५ ॥

---

1. (a) C, N read प्ररूढशाल्यंशुचयैर्मनोहरं.
   (b) C, N read क्वचित् स्थित (स्थितं) क्रौञ्चनिनादराजितम्.
   (c) MS. काम for कामं.
2. (d) MS. अद्य for अत्र.
3. (c) MS. reads as ... न चाम्बरं सान्द्रतुषारशीतलं.
4. (a) MS. शीतला for शीतलाः.
   (b) MS. रोचिः for भाभिः.
   (c) C, N जिह्म for चारु. N भूषिता for भूषणा.
5. (b) C, N सुखा for पुष्पा.
   (c) C, N वासितं (MS. वासितां) for वासिता.
   (d) MS. शय्यां for शय्या, उत्सुकस्त्रियः for उत्सुकाः स्त्रियः.

कृतापराधान् बहुशोऽपि तर्जितान्
सवेपथून् साध्वसलुप्तचेतसः ।
निरीक्ष्य भर्तॄन् सुरताभिलाषिणः
स्त्रियोऽपराधान् समदा विसस्मरुः ॥ ६ ॥

प्रकामकामैर्युवभिः सुनिर्दयं
निशासु दीर्घास्वभिरामिता भृशम् ।
भ्रमन्ति मन्दं श्रमखेदितोरसः
क्षपावसाने नवयौवनाः स्त्रियः ॥ ७ ॥

मनोज्ञकूर्पासकपीडितस्तनाः
सरागकौषेयविभूषितोरसः ।
निवेशितान्तः कुसुमैः शिरोरुहै-
र्विभूषयन्तीव हिमागमं स्त्रियः ॥ ८ ॥

पयोधरैः कुंकुमरागपिंजरैः
सुखोपसेव्यैर्नवयौवनोष्मभिः ।
विलासिनीनां परिपीडितोरसः
स्वपन्ति शीतं परिभूय कामिनः ॥ ९ ॥

सुगन्धिनिश्वासविकम्पितोत्पलं
मनोहरं कामरतिप्रबोधकम् ।
निशासु हृष्टाः सह कामिभिः स्त्रियः
पिबन्ति मद्यं महनीयमुत्तमम् ॥१०॥

---

6. (a) MS. अभि for अपि.
 (b) MS. मन्द for लुप्त.
 (d) MS. न सस्मरुः for विसस्मरुः.
7. (a) C, N सनिर्दयं for सु०, MS. सुरतेऽति for युवभिः स.
 (b) MS. अभिभाविता for अभिरामिता, A MS. reads गाढं दयितैश्चिरं दृढम् for दीर्घा .... श्चिरम्, C, N चिरम् for भृशम्.
 (c) MS. भवन्ति (धमन्ति) for भ्रमन्ति, मन्द for मन्दं, खेदितो रवः (मोदितोरसः) for खेदितोरसः.
8. (a) MS. कूर्पासनिपीडित for कूर्पा .... पीडित.
 (b) C, N कौषेयक for कौषेयवि.
9. (b) MS. यौवनोत्सवाः for यौवनोष्मभिः.
 (c) C, N विलासिनीभिः for विलासिनीनां. MS. भृशं for ०रसः.
10. (b) MS. प्रबोधनम् for प्रबोधकम्.
 (c) MS. reads the line as निशासु कृष्णासु च कामिनो जनाः.

अपगतमदरागा योषिदेका प्रभाते
कृतविनतकुचाग्रा पत्युरालिङ्गनेन ।
प्रियतमपरिभुक्तं वीक्षमाणा स्वदेहं
व्रजति शयनवासाद्वासमन्यद्धसन्ती ॥११॥

अगुरुसुरभिधूपामोदितं केशपाशं
गलितकुसुममालं कुंचिताग्रं वहन्ती ।
त्यजति गुरुनितम्बा निम्ननाभिः सुमध्या
उषसि शयनवासं कामिनी चारुशोभा ॥१२॥

कनककमलकान्तैः सद्य एवाम्बुधौतः
श्रवणतटनिषक्तैः पाटलोपान्तनेत्रैः ।
उषसि वदनबिम्बैः स्कन्धसंयुक्तकेशैः
श्रिय इव गृहमध्ये संस्थिता योषितोऽद्य ॥१३॥

पृथुजघनभरार्ताः किंचिदानम्रमध्याः
स्तनभरपरिखेदान्मन्दमन्दं व्रजन्त्यः ।
सुरतसमयवेशं नैशमाशु विहाय
दधति दिवसयोग्यं वेशमन्यास्तरुण्यः ॥१४॥

---

11. (a) MS. एव for एका.
    (b) N निबिड for विनत. MS. कुचनिबिडकुचाया for कृत ..... ग्रा.
    (c) MS. वीक्ष्यमाणा for वीक्षमाणा.
    (d) MS. अन्यं for अन्यत्, व्रजन्ती for हसन्ती.
12. (a) MS. धूपामोदितान् for ०तं., पाशान् for पाशं.
    (b) MS. मालान् for मालं, C, N तन्वती कुंचिताग्रम् for कुंचि...वहन्ती.
    (c) C, N निम्नमध्यावसाना for निम्न .... मध्या.
    (d) C, N शयनमन्या for शयनवासं, शोभाम् for शोभा MS. काम for चारु.
13. (a) MS. चारुबिम्बाधरोष्ठैः for सद्यः .... धौतैः.
    (b) Beng निषण्णैः for निषक्तैः MS. निषिक्त (नियुक्त) for निषक्त.
    (c) C अंस संसक्त (MS. संयुक्त) for स्कन्धसंयुक्त.
    (d) MS. संस्मिता for संस्थिता.
14. (a) MS. मध्या for मध्याः.
    (b) MS. युग for भर, व्रजन्त्याः for व्रजन्त्यः.
    (c) Beng, शयन for समय, MS. खेदं for वेशं. C, N प्रहाय for विहाय. MS. अंगे (अन्यत्) for आशु.
    (d) MS. एषा for अन्या.

नखपदकृतभंगान् वीक्षमाणाः स्तनान्ता-
नधरकिशलयाग्रं दन्तभिन्नं स्पृशन्त्यः ।
अभिमतरतवेशं नन्दयन्त्यस्तरुण्यः
सवितुरुदयकाले भूषयन्त्याननानि ॥१५॥

प्रचुरगुडविकारः स्वादुशालीक्षुरम्यः
प्रबलसुरतकेलिजातकन्दर्पदर्पः ।
प्रियजनरहितानां चित्तसंतापहेतुः
शिशिरसमय एषः श्रेयसे वोऽस्तुनित्यम् ॥१६॥

इति शिशिरवर्णनम् ॥

15. (a) C, N चितभागान् for कृतभंगान्, स्तनाग्रान् for स्तनान्तान्.
(b) MS. भिन्नान् for भिन्नं.
(c) C, N रसमेतं for रतवेशं.

16. (b) MS. प्रसूत for प्रबल, शान्त for जात.
(d) MS. तेऽस्तु वोऽस्तु.

षष्ठः सर्गः

प्रफुल्लचूताङ्कुरतीक्ष्णसायको
   द्विरेफमालाविलसद्धनुर्गुणः ।
मनांसि भेत्तुं सुरतप्रसंगिनां
   वसन्तयोधः समुपागतः प्रिये ॥ १ ॥

द्रुमाः सपुष्पाः सलिलं सपद्मं
   स्त्रियः सकामाः पवनः सुगन्धिः ।
सुखाः प्रदोषा दिवसाश्च रम्याः
   सर्वं प्रिये चारुतरं वसन्ते ॥ २ ॥

वापीजलानां मणिमेखलानां
   शशाङ्कभासां प्रमदाजनानाम् ।
चूतद्रुमाणां कुसुमान्वितानां
   ददाति सौभाग्यमयं वसन्तः ॥ ३ ॥

कुसुम्भरागारुणितैर्दुकूलै-
   र्नितम्बबिम्बानि बिलासिनीनाम् ।
तन्वंशुकैः कुङ्कुमरागगौरै-
   रलंक्रियन्ते स्तनमंडलानि ॥ ४ ॥

---

1. (b) MS. मालां विदधन् for माला विलसत्.
   (c) C, N वेद्धुं for भेत्तुं. MS. सुरतोत्सुकानां for सु ··· नां.
   (d) C, N योद्धा for योधः .
2. (a) MS. सुपद्मं for सपद्मं.
   (b) MS. पवनाः for पवनः, सुगन्धयः for सुगन्धिः .
3. (c) Beng. कुसुमानतानां for कुसुमान्वितानां.
   (d) Beng. सौरभ्यम् for सौभाग्यम्.
4. (b) MS. नितम्बिनीनां for विलासिनीनाम्.
   (c) C, N रक्तांशुकैः for तन्वंशुकैः . MS. पिंजरैः for गौरैः .

कर्णेषु योग्यं नवकर्णिकारं
चलेषु नीलेष्वलकेष्वशोकः ।
पुष्पं च फुल्लं नवमल्लिकायाः
प्रयाति कान्ति प्रमदाजनस्य ॥ ५ ॥

स्तनेषु हाराः सितचन्दनार्द्रा
भुजेषु संगं वलयाङ्गदानि ।
प्रयान्त्यनङ्गातुरमानसानां
नितम्बिनीनां जघनेषु काञ्च्यः ॥ ६ ॥

सपत्रलेखेषु विलासिनीनां
वक्त्रेषु हेमाम्बुरुहोपमेषु ।
स्तनान्तरे मौक्तिकसंगजातः
स्वेदोद्गमो विस्तरतामुपैति ॥ ७ ॥

उच्छ्वासयन्त्यः श्लथबन्धनानि
गात्राणि कन्दर्पसमाकुलानि ।
समीपवर्तिष्वधुना प्रियेषु
समुत्सुका एव भवन्ति नार्यः ॥ ८ ॥

तनूनि पाण्डूनि मदालसानि
मुहुर्मुहुर्जृम्भणतत्पराणि ।
अंगान्यनंगः प्रमदाजनस्य
करोति लावण्यससंभ्रमाणि ॥ ९ ॥

---

5. (b) MS. स्तनेषु हाराः for चलेषु नीले. C, N अशोकम् for अशोकः.
(c) MS. शिखासु फुल्लाः (सुखासु पुष्पं, शिखासु मालाः) for पुष्पं च फुल्लं. MS. मल्लिकाश्च (मालिकाश्च) for मल्लिकाया.
(d) MS. प्रयान्ति शोभां for प्रयाति कान्ति. C, N जनानां for जनस्य.

6. (b) MS. कुचेषु for भुजेषु, कम्बू for संगं.
(c) MS. निःशंक (निःसंश) मनङ्गसौख्य.

7. (b) MS. मुखेषु for वक्त्रेषु.
(c) N रत्नान्तरे for स्तनान्तरे. C, N रम्यः for जातः.
(d) C, N स्वेदागमो for स्वेदोद्गमो.

8. (c) MS. ०ष्वपि कामुकेषु for ०ष्वधुना प्रियेषु.

9. (a) C, N समंथराणि for मदालसानि.
(d) Beng. रसोत्सुकानि for ससंभ्रमाणि.

नेत्रेषु लोलो मदिरालसेषु
गण्डेषु पाण्डुः कठिनः स्तनेषु ।
मध्येषु निम्नो जघनेषु पीनः
स्त्रीणामनङ्गो बहुधा स्थितोऽद्य ॥१०॥

अङ्गानि निद्रालसविभ्रमाणि
वाक्यानि किंचिन्मदलालसानि ।
भ्रूक्षेपजिह्मानि च वीक्षितानि
करोति कामः प्रमदाजनानाम् ॥११॥

प्रियंगुकालीयककुङ्कुमाक्तं
स्तनेषु गौरेषु विलासिनीभिः ।
आलिप्यते चन्दनमङ्गनाभि-
र्मदालसाभिर्मृगनाभियुक्तम् ॥१२॥

गुरूणि वासांसि विहाय तूर्णं
तनूनि लाक्षारसरञ्जितानि ।
सुगन्धिकालागुरुधूपितानि
धत्ते जनः कामशरानुविद्धः ॥१३॥

पुंस्कोकिलश्चूतरसासवेन
मत्तः प्रियां चुम्बति रागहृष्टः ।
गुञ्जन् द्विरेफोऽप्ययमम्बुजस्थः
प्रियं प्रियायाः प्रकरोति चाटुम् ॥१४॥

---

10. (a) MS. लोलम् (अलोलः) for लोलो, मदिरारसेषु for म ··· षु.
(b) MS. कठिन for कठिनः.
(c) MS. नम्रो for निम्नो.

11. (a) MS. विह्वलानि for विभ्रमाणि.
(b) MS. मदिरालसानि for मद ··· नि.
(d) C, N चकार for करोति. MS. प्रमदोत्तमानाम् for प्रम ··· नाम्.

12. (a) Beng. कुंकुमानि for कुङ्कुमाक्तं.
(b) MS. reads as स्तनाङ्गरागेषु विसर्जितानि (or विचर्चितानि).
(c) MS. आलिख्यते for आलिप्यते,

13. (c) MS. नितान्त (शिरांसि) for सुगन्धि.
(d) C, N मदालसाङ्गः for शरानुविद्धः.

14. (a-b) MS. चूतरसेन मत्तः प्रियामुखं चुम्बति सादरोऽयम्.
(c) N कूजत् for गुञ्जन्. MS. अधिकप्रमत्तः for अयमम्बुजस्थः.
(d) MS. प्रियः (क्षिप्रं) for प्रियं. C, N चाटु for चाटुम्.

ताम्रप्रवालस्तबकावनम्रा-
चूतद्रुमाः पुष्पितचारुशाखाः।
कुर्वन्ति कामं पवनावधूताः
पर्युत्सुकं मानसमङ्गनानाम् ॥१५॥
आमूलतो विद्रुमरागताम्रं
सपल्लवाः पुष्पचयं दधानाः।
कुर्वन्त्यशोका हृदयं सशोकं
निरीक्ष्यमाणा नवयौवनानाम् ॥१६॥
मत्तद्विरेफपरिचुम्बितचारुपुष्पा
मन्दानिलाकुलितनम्रमृदुप्रवालाः ।
कुर्वन्ति कामिमनसः सहसोत्सुकत्वं
बालातिमुक्तलतिकाः समवेक्ष्यमाणाः ॥१७॥
कान्ताननद्युतिमुषामचिरोद्गतानां
शोभां परां कुरवकद्रुममञ्जरीणाम्।
दृष्ट्वा प्रिये सहृदयस्य भवेन्न कस्य
कन्दर्पबाणनिकरैर्व्यथितं हि चेतः ॥१८॥
आदीप्तवह्निसदृशैर्मरुतावधूतैः
सर्वत्र किंशुकवनैः कुसुमावनम्रैः।
सद्यो वसन्तसमये समुपागते हि
रक्तांशुका नववधूरिव भाति भूमिः ॥१९॥

---

15. (a) MS. reads as प्रवालनम्रास्तवकावतंसाः .
(c) MS. सान्द्राः (कान्ते) for कामं, पवनाभिभूताः for ०वधूताः .
(d) MS. समुत्सुकं for पर्युत्सुकं (also समुत्सुकत्वं मनसः for पर्युत्सुकं मानस).
16. (a) MS. ताम्राः for ताम्रं.
(b) MS. सपल्लवं for ०वाः .
17. (b) MS. चारु for नम्र, तत for मृदु.
(c) C, N मनसां for मनसः .
(d) C, N चूताभिरामकलिकाः for बालातिमुक्तलतिकाः .
18. (a) C, N कान्तामुख for कान्तानन., जुषामपि चोद्गतानां for मुषा ··· द्गतानां.
(c) MS. हि पथिकस्य for सहृदयस्य.
(d) C पतित (N पतन) for निकरै. MS. पतनव्यथन for निकरैर्व्यथितं.
19. (c) C, N हि समाचितेयं for समुपागते हि.

किं किंशुकैः शुकमुखच्छविभिर्न भिन्नं
किं कर्णिकारकुसुमैर्न कृतं न दग्धम् ।
यत्कोकिलः पुनरयं मधुरैर्वचोभि-
र्यूनां मनः सुवदनानिहितं निहन्ति ॥२०॥

पुंस्कोकिलैः कलवचोभिरुपात्तहर्षैः
कूजद्भिरुन्मदकलानि वचांसि भृङ्गैः ।
लज्जान्वितं सविनयं हृदयं क्षणेन
पर्याकुलं निजगृहेऽपि कृतं वधूनाम् ॥२१॥

आकम्पयन् कुसुमिताः सहकारशाखा
विस्तारयन् परभृतस्य वचांसि दिक्षु ।
वायुर्विवाति हृदयानि हरन् नराणां
नीहारपातविगमात् सुभगो वसन्ते ॥२२॥

कुन्दैः सविभ्रमवधूहसितावदातै-
रुद्द्योतितान्युपवनानि मनोहराणि ।
चित्तं मुनेरपि हरन्ति निवृत्तरागं
प्रागेव रागकलुषितानि मनांसि यूनाम् ॥२३॥

---

20. (a) Beng. विभिन्नं (MS. च दग्धं, न दग्धं) for न भिन्नं.
(b) MS. हृतं for कृतं, मनोज्ञम् (मनोज्ञैः) for न दग्धम्.
(c) C, N यत्कोकिलः for यः कोकिलः . MS. पुनरमी (पुरुरवैः) for पुनरयं.
(d) MS. सुवदने नियतं दहन्ति (सुवदने नियतं हरन्ति) for सुव ··· न्ति.

21. (a) MS. फलरसैः समुपात्त for कल ···· पात्तः .
(b) MS. विलोचनानि (वचांसि धीरं) for वचांसि भृङ्गैः., उन्मादकराणि वचांसि पुंसा for उन्मद ··· भृङ्गैः .

22. (a) MS. कुसुमितां सहकारशाखां for ०मिताः ··· शाखाः .
(b) MS. परभृतोऽद्य for परभृतस्य.
(c) MS. वधूनां for नराणां.
(d) MS. विमलो for सुभगो.

23. (b) MS. संशोभितानि for उद्द्योतितानि.
(c) MS. निरस्त for निवृत्त.
(d) MS. प्रायेण for प्रागेव, रागमखिलानि (रागचलितानि, N रागमलिनानि) for रागकलुषितानि. MS. पुंसाम् for यूनाम्.

आलम्बिहेमरशनाः स्तनसक्तहाराः
कन्दर्पदर्पशिथिलीकृतगात्रयष्ट्यः ।
मासे मधौ मधुरकोकिलभृङ्गनादै-
र्नार्यो हरन्ति हृदयं प्रसभं नराणाम् ॥२४॥
नानामनोज्ञकुसुमद्रुमभूषितान्तान्
हृष्टान्यपुष्टनिनादाकुलसानुदेशान् ।
शैलेयजालपरिणद्धशिलातलौघान्
दृष्ट्वा जनः क्षितिभृतो मुदमेति सर्वः ॥२५॥
नेत्रे निमीलयति रोदिति याति शोकं
घ्राणं करेण विरुणद्धि विरौति चोच्चैः ।
कान्तावियोगपरिखेदितचित्तवृत्ति-
र्दृष्ट्वाध्वगः कुसुमितान् सहकारवृक्षान् ॥२६॥
समदमधुकराणां कोकिलानां च नादैः
कुसुमितसहकारैः कर्णिकारैश्च रम्यैः ।
इषुभिरिव सुतीक्ष्णैर्मानसं मानिनीनां
तुदति कुसुममासो मन्मथोद्वेजनाय ॥२७॥
आम्रीमञ्जुलमञ्जरीवरशरः सत्किंशुकं यद्धनु
र्ज्यायस्यालिकुलं कलङ्करहितं छत्रं सितांशुः सितम् ।
मत्तेभो मलयानिलः परभृतो यद्वन्दिनो लोकजित्
सोऽयं वो वितरीतरीतु वितनुर्भद्रं वसन्तान्वितः ॥२८॥
इति वसन्तवर्णनम्
इति श्रीकविकालिदासकृतं ऋतुसंहारकाव्यं समाप्तम् ॥

---

24. (a) MS. प्रालम्बि for आलम्बि, आलम्ब्यचन्दनरसान् for आल ... शनाः.
(c) MS. रावैः fer नादैः .
(d) MS. रामाः for नार्यः .

25. (a) MS. भूषिताग्रान् (भूषितांगान्) also कुसुमोद्गमपुष्पितान्तान् for कुसुम .... तान्तान् for भूषितान्तान्.
(b) MS. संधिदेशान् for सानुदेशान्.
(c) MS. तलान्तान् (गुहान्तान्) for तलौघान्.
(d) MS. समुपैति सर्वान् for मुदमेति सर्वः.

26. (a) MS. निमीलति विरोदिति for नि .... रोदिति, मोहं for शोकं.
(b) MS. प्राणान् for घ्राणं.
(d) MS. नरः for अध्वगः .

27. (a) C, N मधुभराणां for मधुकराणां.
(b) C, N रम्यः for रम्यैः .
(d) MS. कुसुमबाणो मन्मथोद्दीपनाय for कुसुम ... द्वेजनाय.

Additional Verses

आकम्पितानि हृदयानि मनस्विनीनां
वातैः प्रफुल्लसहकारकृताधिवासैः ।
संवाधितं परभृतस्य मदाकुलस्य
श्रोत्रप्रियैर्मधुकरस्य च गीतनादैः ॥ १ ॥

ईषत्तुषारैः कृतशीतहर्म्यै
सुवासितं चारु शिरश्च चंपकैः ।
कुर्वन्ति नार्योऽपि वसन्तकाले
स्तनं सहारं कुसुमैर्मनोहरैः ॥ २ ॥

कनककमलकान्तैराननैः पाण्डुगौरैः
उपरिनिहितहारैश्चन्दनार्द्रैः स्तनान्तैः ।
मदजनितविलासैर्दृष्टिपातैर्मुनीन्द्रान्
स्तनभरनतनार्यः कामयन्ति प्रशान्तान् ॥ ३ ॥

करकमलमनोज्ञाः कान्तसंसक्तहस्ता
वदनविजितचन्द्राः काश्चिदन्यास्तरुण्यः ।
रचितकुसुमगन्धि प्रायशो यान्ति वेश्म
प्रबलमदनहेतौ सूक्तसंगोकरम्याः ॥ ४ ॥

छायां जनः समभिवाञ्छति पादपानां
नक्तं तथेच्छति पुनः किरणं सुधांशोः ।
हर्म्यं प्रयाति शयितुं सुखशीतलं च
कान्तां च गाढमुपगूहति शीतलत्वात् ॥ ५ ॥

परभृतकलगीतैर्ह्लादिभिः सद्वचांसि
स्मितदशनमयूखान् कुन्दपुष्पप्रभाभिः ।
करकिसलयकान्तिं पल्लवैर्विद्रुमाभै-
रुपहसति वसन्तः कामिनीनामिदानीम् ॥ ६ ॥

मधुसुरभिमुखाब्जं लोचने लोध्रताम्रे
नवकुरवकपूर्णः केशपाशो मनोज्ञः ।
गुरुभरकुचयुग्मं श्रोणिबिम्बं तथैव
न भवति किमिदानीं योषितां मन्मथाय ॥ ७ ॥

मलयपवनविद्धः कोकिलेनाभिरम्यः
सुरभिमधुनिषेकाल्लब्धगन्धप्रबन्धः ।
विविधमधुपयूथैर्वेष्ट्यमानः समन्ताद्
भवतु तव वसन्तः श्रेष्ठकालः सुखाय ॥ ८ ॥

मार्गे समीक्ष्यातिनिरस्तनीरं
प्रवासखिन्नं पतिमुद्वहन्त्यः।
प्रवेक्ष्यमाणा हरिणेक्षणाक्ष्यः
प्रबोधयन्तीव मनोरथानि ॥ ९ ॥

रम्यप्रदोषसमयः स्फुटचन्द्रहासः
पुंस्कोकिलस्य विरुतं पवनः सुगन्धिः ।
मत्तालियूथविरुतं निशि सीधुपानं
सर्वं रसायनमिदं कुसुमायुधस्य ॥१०॥

रुचिरकनककान्तीन् मुञ्चतः पुष्पराशीन्
मृदुपवनविधूतान् पुष्पितांश्चूतवृक्षान् ।
अभिमुखमभिवीक्ष्य क्षामदेहोऽपि मार्गे
मदनशरनिघातैर्मोहमेति प्रवासी ॥११॥

सुरतरुचिविलासाः सत्सखोभिः समेता
असमशरविनोदं सूचयन्ति प्रकामम् ।
अनुगतमुखराभिः श्रोणिमध्ये विनोदं
शरदि तरुणकान्ताः सूचयन्ति प्रमोदान् ॥१२॥

1,3,5-8,10-11. Stated in the NSP ed. to occur after vi. 27 in the order 11,6,,3,7,1,10,5,8.

Variants—3. (a) गण्डैः for गौरैः.

10. (a) रम्यः for रम्य, भासः for हासः

2. This verse has been stated in N S P ed. to occur in a MS. after vi. 2.

Variants–(a) हर्म्यः for हर्म्ये.

(b) चात्मशिरः सचम्पकैः for चारु ' ' ' चम्पकैः.

4,12. Stated in NSP ed. to occur in a MS. after iii. 22.

9. Stated in NSP. ed. to occur in a MS. after iv. 9.

शृङ्गाररसाष्टकम्

Description of Manuscripts and printed texts.

A — MS. No. G 8352 belonging to Asiatic Society, Calcutta, Substance—country made paper. 6×4½ tnches. Folia-3. Lines—12 on a page. Character—Nāgara. Date—Saṃvat 1961, Appearance—fresh. Complete.

B — Printed text contained in *Kāvya-kalāpa*, No. 1, pub. by H. Hirachand, Bombay, 1864.

Kh—Text printed in *Kāvyasaṃgraha* by J. Haeberlin, Calcutta, 1847.

Note : The text is also printed in the *Granthāvalī* ed. K. Vidyaratna, Calcutta, 1895.

शृङ्गाररसाष्टकम्

मालिनी

अविदितसुखदुःखं निर्गुणं वस्तु किंचित्
जडमतिरिह कश्चित् मोक्ष इत्याचचक्षे।
मम तु मतमनङ्गस्मेरतारुण्यघूर्णन्-
मदकलमदिराक्षीनीविमोक्षो हि मोक्षः ॥ १ ॥

शिखरिणी

कदा कान्तागारे परिमलमिलत्पुष्पशयने
शयानः कान्तायाः कुचयुगमहं वक्षसि वहन्।
अये कान्ते मुग्धे कुटिलनयने चन्द्रवदने
प्रसीदेति क्रोशन् निमिषमिव नेष्यामि रजनीम् ॥ २ ॥

शार्दूलविक्रीडित

सायं नायमुदेति वासरमणिश्चन्द्रो न चण्डद्युति-
र्दावाग्निः कथमम्बरे किमशनिः स्वच्छान्तरिक्षे कुतः।
हन्तेदं निरणायि पान्थरमणीप्राणाविलाशाशया
धावद्घोरविभावरीविषधराभोगस्य भीमो मणिः ॥ ३ ॥

---

1. (c) A,B,Kh. तारल्य for तारुण्य.
2. (d) A,B,Kh. दिवसान् for रजनीम्.
3. (b) Kh. स्थितः for कुतः.
   (d) A विषधरीभोगस्य for विषधरभोगस्य.

वसन्ततिलक

आयाति याति पुनरेव जलं प्रयाति
पद्माङ्कुराणि विचिनोति धुनोति पक्षौ ।
उन्मत्तवद् भ्रमति कूजति मन्दमन्दं
कान्तावियोगविधुरो निशि चक्रवाकः ॥ ४ ॥

स्रग्धरा

भंक्त्वा भोक्तुं न भुंक्ते कुटिलबिसलताखण्डमिन्दोर्दितकात्
ताराकारास्तृषार्तो न पिबति पयसां विप्रुषः पत्रसंस्थाः ।
छायामम्भोजिनीनामलिकुलशबलां वीक्ष्य सन्ध्यामसन्ध्याम्
कान्ताविश्लेषभीरुर्दिनमपि रजनीं मन्यते चक्रवाकः ॥ ५ ॥

मन्दाक्रान्ता

गन्धाढ्यासौ भुवनविदिता केतकी स्वर्णवर्णा
पद्मभ्रान्त्या चपलमधुपः पुष्पमध्ये पपात ।
अन्धीभूतः कुसुमरजसा कण्टकैर्लूनपक्षः
स्थातुं गन्तुं द्वयमपि सखे नैव शक्तो द्विरेफः ॥ ६ ॥

वसन्ततिलक

तं वीक्ष्य वेपथुमती सरसाङ्गयष्टि-
र्निक्षेप एव पदमुद्धृतमर्पयन्ती ।
मार्गाचलव्यतिकराकुलितेव सिन्धुः
शैलाधिराजतनया न ययौ न तस्थौ ॥ ७ ॥

वसन्ततिलक

का कावला निधुवनश्रमपीडिताङ्गी
निद्रां गता दयितबाहुलतानुबद्धा ।
सा सा तु यातु भवनं मिहिरोद्गमोऽयं
संकेतवाक्यमिति काकचया वदन्ति ॥ ८ ॥

इति महाकविकालिदासविरचितं
शृङ्गाररसाष्टकं समाप्तम् ।

---

4. (a) A यापि for याति.
(b) A, B विधुनोति for विचिनोति.

5. (a) B. भुंक्त्वा for भंक्त्वा.

6. This verse is identical with the second stanza of the *Bhramarāṣṭaka* with क्षुधित for चपल (b) and छिन्न for लून.(c).

शृङ्गारतिलकम्

Description of Manuscripts and printed text.

A — MS. No. G 8241 belonging to Asiatic Society, Calcutta. Substance—Country-made paper. Size—10×4½ inches. Folia—3. Script—Nāgarī. Complete.

B — MS. No. G 5073 belonging to Asiatic Society, Calcutta. Substance—Country-made paper. Size—14×3 inches. Folia—4. Script--Bengali. Complete.

C — MS. No. G 8242 belonging to Asiatic Society, Calcutta. Substance--Country-made paper. Size—9×4 inches. Folia—3. Script—Nāgara. Complete.
Colophon—इति रुद्रभट्टकृतं शृङ्गारतिलकं समाप्तम् ।
Date--Saṃvat 1865.

D -- MS. No. G 9568 belonging to Asiatic Society, Calcutta. Substance--Country-made paper. Size—13¼×5½ inches. Folia—2. Script--Nāgara. Complete.

H — Text printed in *Kāvya-saṃgraha* by J. Haeberlin, Calcutta, 1847.

KG- Text printed in Bengali script in ***Kālidāser Granthāvalī***, Calcutta, 1322 B. S.

Kk—Text printed in Devanāgarī characters in ***Kāvya-kalāpa***, pub. by H. Hirachand, Bombay, 1864. It omits the last two lines of verse 13 in our constituted text.

Ks -- Text printed in Devanāgarī characters in ***Kāvya-saṃgraha***, ed. J. Vidyāsāgara, Calcutta, 1872.

S — MS. No. 176 belonging to Sanskrit College, Calcutta. Substance—Country-made paper. Size--10×5 inches. Folia—4. Script—Nāgara. Complete.

T -- MS. No. 202 belonging to Sanskrit College, Calcutta. Substance--Country-made paper. Size—14×3 inches. Folia—2. Script--Bengali. Complete.

U -- MS. No. 182 belonging to Sanskrit College, Calcutta. Substance--Country-made paper. Size—16×2 inches. Folia—4. Script--Bengali. Complete.

शृङ्गारतिलकम्

शार्दूलविक्रीडित

बाहू द्वौ च मृणालमास्यकमलं लावण्यलीलाजलं
श्रोणी तीर्थशिला च नेत्रशफरं धम्मिल्लशैवालकम् ।
कान्तायाः स्तनचक्रवाकयुगलं कन्दर्पबाणानलै-
र्दग्धानामवगाहनाय विधिना रम्यं सरो निर्मितम् ॥ १ ॥

शार्दूलविक्रीडित

आयाता मधुयामिनी यदि पुनर्नायात एव प्रभुः
प्राणा यान्तु विभावसौ यदि पुनर्जन्मग्रहं प्रार्थये ।
व्याधः कोकिलबन्धने विधुपरिध्वंसे च राहुग्रहः
कन्दर्पे हरनेत्रदीधितिरियं प्राणेश्वरे मन्मथः ॥ २ ॥

वसन्ततिलक

इन्दीवरेण नयनं मुखमम्बुजेन
कुन्देन दन्तमधरं नवपल्लवेन ।
अङ्गानि चम्पकदलैः स विधाय धाता
कान्ते कथं घटितवानुपलेन चेतः ॥ ३ ॥

---

1. (b) A सफरी for शफरं.

2. (a) KG. नायाति मे स for नायात एव. U प्रियः for प्रभुः.
   (c) KG. हिमकर for विधुपरि.
   (d) U, KG. अहं for इयं.
   This verse, with विजयते कान्तप्रयाणोत्सवः for यदि ··· प्रभुः (a), यियासवः for विभावसौ (b), जन्मग्रहोऽभ्यर्थये for जन्म ··· प्रार्थये (b), व्याधाः for व्याधः (c), राहोर्गणाः for राहुग्रहः (c), पावककणाः for दीधितिरियं (d), मन्मथाः for मन्मथः (d), has been altributed to इन्द्रशिव in SKM. (II-54-2).

3. (c) D ते सुकदलैः for चम्पकदलैः . A, S वेधाः for धाता.
   This verse has been anonymously quoted in SV. (1610) with च for स (c), वेधाः for धाता (c) and रचित for घटित (d).

वसन्ततिलक

एको हि खञ्जनवरो नलिनीदलस्थो
दृष्टः करोति चतुरङ्गबलाधिपत्यम् ।
किं मे करिष्यति भवद्वदनारविन्दे
जानामि नो नयनखञ्जनयुग्ममेतत् ॥ ४ ॥

शार्दूलविक्रीडित

ये ये खञ्जनमेकमेव कमले पश्यन्ति दैवात्कचित्
ते सर्वे मनुजा भवन्ति सुतरां प्रख्यातभूमीभुजः ।
त्वद्वक्त्राम्बुजनेत्रखञ्जनयुगं पश्यन्ति ये ये जना-
स्ते ते मन्मथबाणजालविकला मुग्धे किमित्यद्भुतम् ॥ ५ ॥

मालिनी

झटिति प्रविश गेहं मा बहिस्तिष्ठ कान्ते
ग्रहणसमयवेला वर्तते शीतरश्मेः ।
अयि सुविमलकान्ति वीक्ष्य नूनं स राहु-
र्ग्रसति तव मुखेन्दुं पूर्णचन्द्रं विहाय ॥ ६ ॥

शार्दूलविक्रीडित

कस्तूरीवरपत्रभङ्गनिकरो भ्रष्टो न गण्डस्थले
नो लुप्तं सखि चन्दनं स्तनतटे धौतं न नेत्राञ्जनम् ।
रागो न स्खलितस्तवाधरपुटे ताम्बूलसंवर्धितः
किं रुष्टासि गजेन्द्रमन्दगमने किं वा शिशुस्ते पतिः ॥ ७ ॥

---

4. (b) Kk. पृष्टः for दृष्टः.
   (c) D वा for मे.
5. (b) A,C,D,S कवयो (KG. कृतिनो) for मनुजाः. KG. विख्यात for प्रख्यात.
   (d) S चापबाण for बाणजाल. D विधुता for विकला, किमत्र for किमिति. S,T,U किमत्यद्भुतम् for किमित्यद्भुतम्.
6. (a) D निविश for प्रविश. A,C गेहे for गेहं.
   (b) A,C,S ग्रसन for ग्रहण.
   (c) A तव मुखकमलं कं for अयि ··· कान्ति. C, S मुखमकलङ्कं for सु ··· कान्ति.
   (d) A पतति for ग्रसति.
7. (b) A लिप्तं for लुप्तं.
   (c) D चलुप्त for स्खलित. B तटे for पुटे.
   (d) C, D, S मत्त for मन्द.

शिखरिणी

समायाते कान्ते कथमपि च कालेन बहुना
कथाभिर्देशानां सखि रजनिरर्धं गतवती ।
ततो यावल्लीलाकलहकुपितास्मि प्रियतमे
सपत्नीव प्राची दिगियमभवत्तावदरुणा ॥ ८ ॥

शार्दूलविक्रीडित

श्लाघ्यं नीरसकाष्ठताडनशतं श्लाघ्यः प्रचण्डातपः
क्लेशः श्लाघ्यतरः सुपङ्कनिचयैः श्लाघ्योऽतिदाहोऽनलैः ।
यत्कान्ताकुचपार्श्वबाहुलतिकाहिन्दोललीलासुखं
लब्धं कुम्भवर त्वया न हि सुखं दुःखैर्विना लभ्यते ॥ ९ ॥

शार्दूलविक्रीडित

किं किमास्यमुपेत्य चुम्बसि बलान्निर्लज्ज लज्जा न ते
वस्त्रान्तं शठ मुञ्च शपथैः किं धूर्त निर्वञ्चसे ।
खिन्नाहं तव रात्रिजागरतया तामेव याहि प्रियां
निर्माल्योज्झितपुष्पदामनिकरे का षट्पदानां रतिः ॥१०॥

शार्दूलविक्रीडित

वाणिज्येन गतः स मे गृहपतिर्वार्तापि न श्रूयते
प्रातस्तज्जननी प्रसूततनया जामातृगेहं गता ।
बालाहं नवयौवना निशि कथं स्थातव्यमस्मद्गृहे
सायं संप्रति वर्तते पथिक हे स्थानान्तरं गम्यताम् ॥११॥

---

8. (d) D, S सपत्नीवत् for सपत्नीव. D सुप्ता for प्राची.

9. (b) S, T निचयः for निचयैः, हि for अति. KG. reads the line thus—श्लाघ्यं पङ्कविलेपनं पुनरिह श्लाघ्योऽतिदाहानलः ।
   (c) KG. कुम्भ for पार्श्वं. Ks, U, KG. हिल्लोल (D कल्लोल) for हिन्दोल.
   (d) KS. कुम्भकर for कुम्भवर,

10. (a) Kk, Ks, H किं मे वक्त्रम् (U, KG. किं किं वक्त्रम्) for किं किमास्यम्. T वक्त्रं for आस्यम्. A, S किं मां समुपेत्य for किमास्यमुपेत्य, KG. D क्व for न.
   (c) Rk., Ks., H क्षीणा for खिन्ना, जागरवशात् for जागरतया.

11. (b) A प्रसूति for प्रसूत. C गेहे for गेह.
   (c) A, C, S एकाकिनी for अस्मद्गृहे.

मन्दाक्रान्ता

यामिन्येषा बहुलजलदैर्वद्धभीमान्धकारा
निद्रां यातो मम पतिरसौ क्लेशितः कर्मदुःखैः ।
बाला चाहं मनसिजभयात्प्राप्तगाढप्रकम्पा
ग्रामश्चौरैरयमुपहतः पान्थ निद्रां जहीहि ॥१२॥

शार्दूलविक्रीडित

क भ्रातश्चलितोऽसि वैद्यकगृहं किं तत्र शान्त्यै रुजां
किं ते नास्ति सखे गृहे प्रियतमा सर्वं गदं हन्ति या ।
वातं चेत्कुचकुम्भमर्दनवशात्पित्तं तु वक्त्रामृतात्
श्लेष्माणं विनिहन्ति हन्त सुरतव्यापारकेलिश्रमात् ॥१३॥

अनुष्टुप्

दृष्टिं देहि पुनर्बाले कमलायतलोचने ।
श्रूयते हि पुरा लोके विषस्य विषमौषधम् ॥१४॥

वसन्ततिलक

अन्तर्गता मदनवह्निशिखावली या
सा बाध्यते किमिह चन्दनपङ्कलेपैः ।
यत्कुम्भकारदहनोपरि पङ्कलेप-
स्तापाय केवलमसौ न तु तापशान्त्यै ॥१५॥

---

12. (a) S वहति (KG. गहन) for बहुल. C गाढा for भीमा. S भीमान्धकारैः for ०कारा.
(b) D क्लेशतः for क्लेशितः . Kk., H Ks, S,T,U दुःखी for दुःखैः.
(c) गात्र for गाढ.

13. (a) B,S,T प्रातः for भ्रातः . C, KG. गृहे for गृहं. C, S तद्रुजां शान्तये for तत्र ··· रुजां. KG रुजः for रुजां.
(b) D omits सखे, reads ननु bet. गृहे and प्रियतमा. KG. सर्वान् गदान् for सर्वं गदं.
(c) A, B, KG, KS वातः for वातं. b–c—omitted in Kk.

14. (a) KG, U हरिण for कमल.
(b) H, Kk नो for सा. Ks वाधते for वाध्यते, लेपनेन (B, T, U चर्चितेन) for पङ्कलेपैः . H, Kk किमपि चन्दनलेपनेन for किमिह ··· लेपैः .
(c) D यः for यत्. Ks. पलन (U, T H पवन; S भवन) for दहन. S लेपैः for लेपः .
(d) D च वह्नि for तु ताप. S, KG. for तु.

मन्दाक्रान्ता

दृष्ट्वा यासां नयनसुषमां वङ्गवाराङ्गनानां
देशत्यागः परमकृतिभिः कृष्णसारैरकारि ।
तासामेव स्तनयुगजिताः कुम्भिनः सन्ति मत्ताः
प्रायो मूर्खः परिभवविधौ नाभिमानं त्यजति ॥१६॥

अनुष्टुप्

कुसुमे कुसुमोत्पत्तिः श्रूयते न च दृश्यते ।
बाले तव मुखाम्भोजे कथमिन्दीवरद्वयम् ॥१७॥

वसन्ततिलक

कोपस्त्वया यदि कृतो मयि पंकजाक्षि
सोऽस्तु प्रियस्तव किमत्र विधेयमन्यत् ।
आश्लेषमर्पय मदर्पितपूर्वमुच्चै-
रुच्चैः समर्पय मदर्पितचुम्बनं च ॥१८॥

*इति श्रीकालिदासकृतं शृङ्गारतिलकं समाप्तम् ।

---

16. (a) D **transposes** दृष्ट्वा and यासां. Kk, Ks, H सुभगं (D युगलं) for सुषमां. S सुषमामङ्ग for सुषमां वङ्ग.
 (c) Kk, Ks, H दन्तिनः for कुम्भिनः .
 (d) S मूर्खाः for मूर्खः, त्यजन्ति for त्यजति, KG, Kk, Ks, H, T, U तनोति (D जहाति) for त्यजति.

17. (a) S कमले कमलोत्पत्तिः for कुसुमे कुसुमोत्पत्तिः. T, U तु **for** च.
 (b) A, Ks दृष्टम् for कथम्.

18. (a) D, H, Kk हृदि for यदि. U transposes यदि and कृतो. D यदि for मयि.
 (b) C प्रिये तव for प्रियस्तव. D किमस्ति for किमत्र. S विचित्रम् for विधेयम्. U अस्ति for अन्यत्.
 (c) D चुम्बनानि for चुम्बनं च.
 This verse, with किमस्ति for किमत्र (b), has been attributed to Śatānanda in the *Śubhāṣita-ratnakoṣa* (No. 671).

* C रुद्रभट्ट for कालिदास. It obviously confuses this work with the शृङ्गारतिलक, a work on Poetics by Rudra.
S कालिदासकृतौ (D कविकालिदासकृतौ) for कालिदासकृतं.

Additional verses* of the

Śṛṅgāra-tilaka

(Arranged alphabetically)

अपूर्वो दृश्यते वह्निः कामिन्याः स्तनमण्डले ।
दूराद्दहति यो गात्रं हृदि लग्नस्तु शीतलः ॥ १ ॥

अयि मन्मथचूतमञ्जरि श्रवणायतलोचने प्रिये ।
अपहृत्य मनः क यासि मे किमराजकमत्र राजते ॥ २ ॥

इयं व्याधायते बाला भ्रूरस्याः कार्मुकायते ।
कटाक्षाश्च शरायन्ते मनो मे हरिणायते ॥ ३ ॥

एतत्पयोधरयुगं पतितं निरीक्ष्य
खेदं वृथा वहसि किं हरिणायताक्षि ।
स्तब्धो विवेकरहितो जनतापकारी
यात्युन्नतः प्रपततीह किमत्र चित्रम् ॥ ४ ॥

कथमेतत्कुचद्वन्द्वं पतितं तव सुन्दरि ।
यद्यधः खन्यते मूढ गिरयो न पतन्ति किम् ॥ ५ ॥

---

*. Those verses, which occur in a single Ms. or in some of the Mss. only, are given here.

1. (a) B कुच for स्तन.
   (b) Kk, Ks, KG, T, U दूरतो दहते गात्रं for दूरात् ... गात्रं.

2. (a) H प्रिये श्रवणायतलोचने for श्र .... प्रिये. Ks चारुलोचने for लोचने प्रिये.

4. (a) A एनं for एतत्.

5. (a) C किमेतत्कुचद्वन्द्वं च for कथं ··· द्वन्द्वं. A reads the line thus— तव तन्वि कुचावेतौ पतितौ केन हेतुना.
   (b) B पश्याधः खनने मूढ पतन्ति गिरयोऽपि च. D पश्याध. for यद्यध. C पतन्ति गिरयोऽपि च for गिरयो ... किम्.

कल्याणि चन्दनरसैः परिषिच्य गात्रं
द्वित्राण्यहानि कथमप्यतिवाहयेथाः ।
आगत्य तत्रभवतीं परिरभ्य दोर्भ्यां
नेष्यामि सूर्यकिरणानपि शीतलत्वम् ॥ ६ ॥

कस्तूरीतिलकं बाले भाले मा कुरु मा कुरु ।
सायं शशाङ्कमाशङ्क्य राहुरेष्यति ते मुखम् ॥ ७ ॥

क प्रस्थितासि करभोरु घने निशीथे
प्राणाधिपो वसति यत्र मनः प्रियो मे ।
एकाकिनी वद कथं न विभेष्यकाले
ह्यग्रस्थितः शितशरो मदनः सहायः ॥ ८ ॥

नो रुष्टो मम वल्लभः शृणु सखे सुप्तो न वा सुन्दरो
व्याधिर्नैव शिशुर्न चातिविकलो नार्तो न मूर्खः शठः ।
मां दृष्ट्वा नवयौवनां शशिमुखीं कन्दर्पबाणाहतो
मुक्तो दैत्यगुरुः प्रियेण स्पृशता पश्चाद्गतो विह्वलः ॥ ९ ॥

यदि कथमपि दैवाद्दुर्गमार्गे स्खलित्वा विदलति तनुमध्यं ।
दीयते नौ न दोषः पृथुनिविडकुचाभ्यां वर्त्म पश्याव नावा ॥१०॥

विमलसुतनु वाचं मुञ्च मौनं त्वमद्य प्रणयिनि
मयि मानं किं करे किं करोषि अथ ... ...
चित्ते सापराधोऽस्मि बाले निजभुजयुगबल......
.... बन्धं विदेहि ॥११॥

हे रोहिणि त्वमसि रात्रिकरस्य भार्या
एनं निवारय पतिं सखि दुर्विनीतम् ।
जालान्तरेण मम वासगृहं प्रविश्य
श्रोणीतटं स्पृशति किं कुलधर्म एषः ॥१२॥

---

6. (c) अंगं निधाय भवतो (?) for आगत्य तत्रभवतीः
(d) शीतकिरणादति for सूर्यकिरणानपि.

8. This verse occurs also in the *Amaruśataka*. The following variants are found :—
(a) दिने for घने.
(b) प्राणाधिको (प्राणेश्वरो) for प्राणाधिपो; जनः for मनः.
(c) बत for वद; विभेषि बाले for बिभेष्यकाले.
(d) नन्वस्ति पुंखित for ह्यग्र ... शित.

Table showing the order of verses of the Sṛṅgāra-tilaka in different MSS. and printed works.

[The verses are arranged alphabetically. X-indicates verses missing.]

Pratika of first line	A	B	C	D	KS	KG	S	T	U	KK	H
अन्तर्गता मदन	16	16	18	16	15	17	17	17	21	16	16
अपूर्वो दृश्यते	18	18	20	18	17	×	19	19	16	18	18
अयि मन्मथ	×	21	×	22	19	24	24	22	×	20	20
आयाता मधु	2	2	2	2	2	2	2	2	2	2	2
इन्दीवरेण नयनं	3	3	3	3	3	6	3	3	3	3	3
इयं व्याधायते	13	13	14	13	×	14	14	13	24	×	×
एको हि खञ्जन	4	4	4	4	4	7	4	4	10	4	4
एतत्पयोधरयुगं	22	×	23	21	×	22	23	×	×	×	×
कथमेतत्कुचद्वन्द्वं	19	19	21	19	×	20	20	20	23	×	×
कल्याणि चन्दन	×	×	17	×	×	26	×	16	×	×	×
कस्तूरी वर पत्र	7	7	7	7	7	3	7	7	6	7	×
कस्तूरी तिलकं बाले	25	×	25	×	×	×	×	×	9	×	7
किं किमास्य (or, किं मे वक्त्रम्)	10	10	11	10	10	11	11	10	14	10	10
कुसुमे कुसुमो	21	20	22	20	17	19	22	21	15	19	19
कोपस्त्वया यदि	24	22	24	23	20	23	26	24	19	21	21
क भ्रातश्चलितो	15	14	15	14	13	15	15	14	18	14	14

Pratika of first line	A	B	C	D	KS	KG	S	T	U	KK	H
क्व प्रस्थितासि	×	×	×	25	×	×	×	×	×	×	×
झटिति प्रविश	6	6	6	6	6	9	6	6	5	6	6
दृष्टिं देहि	14	15	16	15	14	16	16	15	17	15	15
दृष्ट्वा यासां	17	17	19	17	16	18	18	18	22	17	17
नो रुष्टो मम	×	×	9	×	×	5	8	×	×	×	×
पूर्णं तूर्णं	×	×	×	×	×	×	×	×	8	×	×
बाहू द्वौ च	1	1	1	1	1	1	1	1	1	1	1
यदि कथमपि	23	×	×	×	×	×	25	×	×	×	×
यामिन्येषा बहुल	12	12	13	12	12	13	13	12	13	12	12
ये ये खञ्जन	5	5	5	5	5	8	5	5	4	5	5
वाणिज्येन गतः	11	11	12	11	11	12	17	11	11	11	11
विज्ञातिरेखा मम	×	×	×	×	×	25	×	23	×	×	×
विमलसुतनु	×	×	×	24	×	×	×	×	×	×	×
श्लाघ्यं नीरस	9	9	10	9	9	10	10	9	20	9	9
समायाते कान्ते	8	8	8	8	8	4	9	8	7	8	8
समुद्भवदिनावधि	×	×	×	×	×	×	×	×	25	×	×
हे पान्थ पुस्तक	×	×	×	×	×	×	×	×	12	×	×
हे रोहिणि	20	×	26	×	×	×	21	×	×	×	×

Kumāra-sambhava

(Cantos ix-xvii)

In view of the fact that the reproduction of the verses will make the present work unwieldly in bulk and that the definitive text of the verses is easily available in various editions, particularly in the one by Sūryakānta (Delhi, 1962), we do not incorporate the allegedly spurious portion of the work.

Doubtful verses of the Meghadūta

[Arranged alphabetically in accordance with the initial letters of the verses.]

अध्वक्लान्तं प्रतिमुखगतं सानुमांश्चित्रकूट-
स्तुंगेन त्वां जलद शिरसा वक्ष्यति श्लाघमानः ।
आसारेण त्वमपि शमयेस्तस्य नैदाघमग्नि
सत्काराद्रः फलति नचिरेणोपकारो महत्सु ॥ १ ॥
अन्वेष्टव्यामवनिशयने संनिकीर्णैकपार्श्वां
तत्पर्यन्तप्रगलितलवैश्छिन्नहारैरिवास्रैः ।
भूयो भूयः कठिनविषमां सारयन्तीं कपोला-
दामोक्तव्यामयमितनखेनैकवेणीं करेण ॥ २ ॥
अम्भोबिन्दुग्रहणचतुरांश्चातकान् वीक्षमाणाः
श्रेणीभूताः परिगणनया निर्दिशन्तो बलाकाः ।
त्वामासाद्य स्तनितसमये मानयिष्यन्ति सिद्धाः
सोत्कम्पानि प्रियसहचरीसंभ्रमालिंगितानि ॥ ३ ॥
अक्षय्यान्तर्भवननिधयः प्रत्यहं रक्तकंठै-
रुद्गायद्भिर्धनपतियशः किंनरैर्यत्र सार्धम् ।
वैभ्राजाख्यं विबुधवनितावारमुख्यासहाया
बद्धालापा बहिरुपवनं कामिनो निर्विशन्ति ॥ ४ ॥

---

1. (a) आम्रकूटः for चित्रकूटः .
   (d) सद्भावार्द्रं for सत्कारार्द्रं.
3. (a) रभसान् for चातकान्.
   (d) सोत्कंठानि for सोत्कम्पानि.
4. (a) अक्षीणान्त for अक्षय्यान्त.
   (d) बद्धापानं for बद्धालापा.

आनन्दोत्थं नयनसलिलं यत्र नान्यैर्निमित्तै-
र्नान्यस्तापः कुसुमशरजादिष्टसंयोगसाध्यात् ।
नाप्यन्यस्मात्प्रणयकलहाद्विप्रयोगोपपत्ति-
र्वित्तेशानां न च खलु वयो यौवनादन्यदस्ति ॥ ५ ॥

आश्वास्यैवं प्रथमविरहोदग्रशोकां सखीं ते
शैलादाशु त्रिनयनवृषोत्खातकूटान्निवृत्तः ।
साभिज्ञानप्रहितकुशलैस्तद्वचोभिर्ममापि
प्रातःकुन्दप्रसवशिथिलं जीवितं धारयेथाः ॥ ६ ॥

इत्याख्याते सुरपतिसखः शैलकुल्यापुरीषु
स्थित्वा स्थित्वा धनपतिपुरीं वासरैः कैश्चिदाप ।
मत्वागारं कनकरुचिरं लक्षणैः पूर्वमुक्तै-
स्तस्योत्संगे क्षितितलगतां तां च दीनां ददर्श ॥ ७ ॥

इत्थंभूतं सुरचितपदं मेघदूताभिधानं
कामक्रीडाविरहितजने विप्रयोगे विनोदः ।
मेघस्यास्मिन्नतिनिपुणता बुद्धिभावः कवीनां
नत्वार्यायाश्चरणकमलं कालिदासश्चकार ॥ ८ ॥

तं संदेशं जलधरवरो दिव्यवाचाचचक्षे
प्राणांस्तस्या जनहितरतो रक्षितुं यक्षवध्वाः ।
प्राप्योदन्तं प्रमुदितमनाः सापि तस्थौ स्वभर्तुः
केषां न स्यादभिमतफला प्रार्थना ह्युत्तमेषु ॥ ९ ॥

---

5. (c) नाप्यन्यत्र.
   (d) न खलु च वयो.
6. (a) आश्वास्यैनां for आश्वास्यैवं, विरहे शोकदष्टां (विरहादुग्रशोकां, विरहेणोग्रशोकां) for विरहो…शोकां मे (तां, स्वां) for ते.
   (b) तस्मादद्रेस्त्रिनयन (शैलादस्मात्त्रिनयन) for शैलादा…यन. शृङ्गात् for कूटात्.
   (c) साभिज्ञानं प्रहितवचनैस्तत्र युक्तैर्ममापि.
   (d) भ्रातः (प्रायः) for प्रातः . धारयेदं for धारयेथाः .
7. (a) सुचरित for सुरचित.
   (b) दुःखयुक्ते विनोदः for विप्रयोगे विनोदः .
   (c) कामं चास्मिन्नतिनिपुणतानन्यभावः for मेघस्या…भावः .
9. (d) अभिमतसुखान् प्रापयामास for अभि…त्तमेषु.

तस्मादद्रेर्निगदितपथः शीघ्रमेत्यालकायां
यक्षागारं विगलितनिभं दृष्टचिह्नैर्विदित्वा ।
यत्संदिष्टं प्रणयमधुरं गुह्यकेन प्रयत्ना-
त्तद्गेहिन्याः सकलमवदत्कामरूपी पयोदः ॥१०॥

धारासिक्तस्थलसुरभिणस्त्वन्मुखस्यास्य बाले
दूरीभूतं प्रतनुमपि मां पञ्चबाणः क्षिणोति ।
धर्मान्तेऽस्मिन्विगणय कथं वासराणि व्रजेयु-
र्दिक्संसक्तप्रविततघनव्यस्तसूर्यातपानि ॥११॥

पत्रश्यामा दिनकरहयस्पर्धिनो यत्र वाहाः
शैलोदग्रास्त्वमिव करिणो वृष्टिमन्तः प्रभेदात् ।
योधाग्रण्यः प्रतिदशमुखं संयुगे तस्थिवांसः
प्रत्यादिष्टाभरणरुचयश्चन्द्रहासव्रणाङ्कैः ॥१२॥

प्रद्योतस्य प्रियदुहितरं वत्सराजोऽत्र जह्रे
हैमं तालद्रुमवनमभूदत्र तस्यैव राज्ञः ।
अत्रोद्भ्रान्तः किल नलगिरिः स्तम्भमुत्पाट्य दर्पा-
दित्यागन्तून् रमयति जनो यत्र बन्धूनभिज्ञः ॥१३॥

मन्दाकिन्याः सलिलशिशिरैः सेव्यमाना मरुद्भि-
र्मन्दाराणामनुतटरुहां छायया वारितोष्णाः ।
अन्वेष्टव्यैः कनकसिकतामुष्टिनिक्षेपगूढैः
संक्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्याः ॥१४॥

यत्रोन्मत्तभ्रमरमुखराः पादपा नित्यपुष्पा
हंसश्रेणीरचितरशना नित्यपद्मा नलिन्यः ।
केकोत्कंठा भवनशिखिनो नित्यभास्वत्कलापा
नित्यज्योत्स्नाः प्रतिहततमोवृत्तिरम्याः प्रदोषाः॥ १५॥

---

10. (a) निगदितमथो for निगदितपथः .

11. (d) प्रविरलघन for प्रविततघन.

12. (a) शष्प (घास, सस्य) for पत्र.
    (b) पयोदाः for प्रभेदात्.

13. (d) गमयति for रमयति, तैस्तैर्विशेषैः for बन्धूनभिज्ञः .

14. (a) पयसि for सलिल.
    (b) तटवन for अनुतट.

15. (a) यत्रासन्नभ्रमरनिकराः for यत्रो... मुखराः .

वासश्चित्रं मधु नयनयोर्विभ्रमादेशदक्षं
पुष्पोद्भेदं सह किसलयैर्भूषणानां विकल्पान् ।
लाक्षारागं चरणकमलन्यासयोग्यं च यस्या-
मेकः सूते सकलमबलामण्डनं कल्पवृक्षः ॥१६॥

श्रुत्वा वार्तां जलदकथितां तां धनेशोऽपि सद्यः
शापस्यान्तं सदयहृदयः संविधायास्तकोपः ।
संयोज्यैतौ विगलितशुचौ दंपती हृष्टचित्तौ
भोगानिष्टानविरतसुखं भोजयामास शश्वत् ॥१७॥

स्निग्धाः सख्यः कथमपि दिवा तां न मोक्ष्यन्तितन्वी-
मेकप्रख्या भवति हि जगत्यंगनानां प्रवृत्तिः ।
स त्वं रात्रौ जलद शयनासन्नवातायनस्थः
कान्तां सुप्ते सति परिजने वीतनिद्रामुपेयाः ॥१८॥

हारांस्तारांस्तरलगुटिकान् कोटिशः शंखशुक्तीः
शष्पश्यामान्मरकतमणी नुन्मयूखप्ररोहान् ।
दृष्ट्वा यस्यां विपणिरचितान् विद्रुमाणां च भंगान्
संलक्ष्यन्ते सलिलनिधयस्तोयमात्रावशेषाः ॥१९॥

---

16. (b) विकल्पं (विशेषान्) for विकल्पान्.
(c—d) यस्मिन्नेकः for यस्यामेकः .

17. (d) अभिमतसुखान् प्रापयामास for अ[illegible]मास.

19. (a) घुटिकान् (गुलिकान्) for गुटिकान्
(c) यस्यां दृष्ट्वा दृष्ट्वा यस्यां.

PART II

STRAY VERSES

INTRODUCTORY REMARKS

As early as 1885, Theodor Aufrecht made an attempt,[1] perhaps for the first time, to collect such verses, attributed to Kālidāsa in the well-known anthologies and works on poetics, as do not occur in his undisputed poems and plays. He gave German rendering of the verses collected by him, and, in some cases, noted the *variae lectiones* and added his own comments. But, materials at his disposal having been meagre, he could not give many of the alternative readings available in later sources. In one stanza, viz. *svapna prasīda* etc., he could not supplv the word[2] in the lacuna appearing in the third foot.

Since Aufrecht's work, some works, unknown to him, have come to light and certain works, in MS. form, have been published. One of the noteworthy works of the former class is the anthology entitled *Subhāṣita-ratnakośa* of Vidyākara, a truncated version of which was published earlier as an anonymous work under the title *Kavīndra-vacana-samuccaya.* Among the works of the latter class, the most noteworthy, perhaps, is the *Sadukti-karṇāmṛta* of Śrīdharadāsa, published by R. Śarmā in 1930, and critically edited by the author of the present wark in 1964. We are, therefore, now equipped with ampler sources for compiling the stray verses attributed to Kālidāsa and for locating them.

In the *Bhoja-prabandha* of Ballāla, we find some verses ascribed to Kālidāsa.[3] It is obviously an anachronism to associate Kālidāsa (c. 4th. or 5th. century A. D.) with Bhoja of Dhārā (c. 11th. century A. D.) But, the verses in question may have been traditionally attributed to the great poet by connecting whom with Bhoja the author probably sought to glorify the king. In view of the fact that, in this work, the literary

1. *ZDMG,* xxxix, p. p. 306-312.
2. Underlined in our collection.
3. A list of such verses will be found in Gray's translation of the *Bhoja-prabandha,* 1950, p. 98.

stalwarts like Bhavabhūti, Māgha, Bāṇa etc., all of whom preceded Bhoja by centuries, figure in his court, one does not feel inclined to suppose that Kālidāsa, in this context, refers to a lesser namesake of the famous poet, and a contemporary of the above king of Dhārā. It may, however, be that some of the verses in question were actually composed by a poet enjoying Bhoja's patronage[1] or by the author of the *Bhoja-prabandha* himself, and then associated with the famous name of Kālidāsa. That some of these verses were floating *Subhāṣitas* appears to be indicated by their citation as anonymous stanzas in a few noted anthologies. For instance, the verse *aṅkaṃ ke'pi etc.*, ascribed to Kālidāsa in the *Bhoja-prabandha*, occurs as an anonymous staza in Vallabhadeva's *Subhāṣitāvalī* (No. 1982). Some of the verses attributed in the *Bhoja-prabandha* to Kālidāsa, are of the nature of *Samasyā-pūraṇas* which appear to have been a common literary diversion among the elite of society in ancient and medieval India. Of such verses, one foot is stated to have been put to Kālidāsa who readily supplied the rest.

F. W. Thomas, in the introduction to his edition of the *Kavīndra-vacana-samuccaya*, (p.p. 30-34), has given a list of such verses.

Harichānd Śāstrī, in his work called *Kālidāsa et L'Art Poétique De L'Inde*, has collected the stanzas of Kālidāsa cited in the well-known works on poetics. Among the verses, collected by him, the sources of some are unknown. The apocryphal verses, collected by Harichānd, have been included in our list.

We propose, in the following pages, to collect the stray verses, attributed to Kālidāsa, with the available variant readings, determine their metres, refer, wherever possible, to the sources in which they occur and finally to give their English rendering. We shall also note the names of other authors to whom the various sources attribute some of the verses collected by us.

The reader of these verses cannot fail to notice the predominance of the erotic sentiment in them. In most of them, there is a description of either an erotic setting or a particular mood

---

1. For instance, the stanza *abhūt prācī piṅgā*, ascribed to Kālidāsa in the *Bhoja-prabandha*, is attributed, in the *Śārṅgadhara-paddhati* (No. 3717). to *bhojarāja-kavi varga.*

of the lover or of the beloved. Even when different aspects of nature are depicted, these have been represented as either exciting passion or as having some connexion with objects of love. For instance, in the verse *lakṣmī-krīḍā-taḍāgo* etc. the moon is represented, *inter alia*, as a palace of sexual pleasure and as an umbrella of the god of love. Again, in the verse *hemāmbhoruha pattane* etc., the vernal breeze, scared by bees in the lotus, is depicted as slowly moving over the lovely breasts of charming women.

The stanzas are written in simple language and a flowing style. The metres are varied. The ideas, though not very striking. are nevertheless delightful. The figures of word and sense, used in them, are well-conceived. The stanzas may be literary trifles; but these are dainty trifles. Excepting a few verses, in which, for instance, Kālidāsa and Bhavabhūti have been represented as contemporaneous,[1] or Kālidāsa utters the name of Bhoja[2] there is nothing in the stanzas, collected by us, which precludes Kālidāsa's authorship.[3]

We have deliberately avoided the verses ascribed, in the *Saduktt-karṇāmṛta*, to Kālidāsa-nandin; because, according to the compiler himself, these verses were composed by a person other than the famous Kālidāsa.

After the completion of our compilation, A. Scharpe[4]'s *Kālidāsa-Lexicon* came to our hands. Part III of Volume I of this work contains a collection of such verses.

---

1. c. f. *aho me saubhāgyam* etc.
2. e. g. *adya dhārā* etc.
3. One are two stanzas, however, appear to echo the ideas expressed in some verses known to be of Kālidāsā's composition. The verses *priyāyāṃ svairāyām* etc. inevitably calls up the picture delineated in the verse *grīvā-bhaṅgābhirāmam* etc. in the first act of the *Abhijñāna-śakuntala*. Again, the verse *kurvīthāḥ śvaśurasya* etc. seems to be only the well-known stanza *śuśrūṣasva gurūn* etc,. in the fourth act of the above drama, presented in a different language. One feels tempted to suggest that these were, perhaps, composed by some imitator of Kālidāsa.
4. I take this opportunity to thank the author for the trouble he took in kindly sending me a photostat copy af the relevant portion of his work for my use.

Abbreviations

BP.—*Bhoja-prabandha* of Ballāla, ed. NSP., 1933.

DH.—*Dhvanyāloka*, ed. KM. 25, 1891.

DHL.—*Dhvanyāloka-locana* of Abhinavagupta, ed. KM 25, 1891.

DR.—*Daśarūpaka* of Dhanañjaya.

EV.—*Ekāvalī* of Vidyādhara, ed. K. P. Trivedi, Bombay, 1903.

KA.—*Kāvyānuśāsana* of Hemacandra, ed. KM. 71, 1934.

KH.—*Kālidāsa* et L'Art Poétique De L'Inde, by Harichand, Paris, 1917.

KK.—*Kavikaṇṭhābharaṇa* of Kṣemendra, ed. KM, IV, 1937.

KP.—*Kāvyaprakāśa* of Mammaṭa, Calcutta Sanskrit Series, 1936.

KU.—*Kuvalayānanda* of Appaya Dīkṣita, ed. NSP., 1947.

KVS.—*Kavīndra-vacana-samuccaya*, ed. F. W. Thomas, Bibliotheca Indica, Calcutta, 1912.

RG.—*Rasagaṅgādhara* of Jagannātha, ed. KM 12, 1947.

SD.—*Sāhitya-darpaṇa* of Viśvanātha, ed. H. Siddhāntavāgīśa, Calcutta.

SK.—*Sadukti-karṇāmṛta* of Śrīdharadāsa, ed. S. C. Banerji, Calcutta.

SKA.—*Sarasvatī-kaṇṭhābharaṇa*, a work on poetics by Bhoja, ed. KM 94, 1934.

SM.—*Sūktimuktāvalī* of Jahlaṇa, GOS, 1938.

SP.—*Śārṅgadhara-paddhati*, ed. Peterson, Bombay, 1888.

SPK.—*Śṛṅgāra-prakāśa* of Bhoja, HOS, 1957.

SR.—*Subhāṣita-ratnakośa* of Vidyākara HOS, 1957.

SV.—*Subhāṣitāvati* of Vallabhadeva, ed. Peterson and Durgaprasad, Bombay, 1886.

Z.—*ZDMG*, xxxix.

Verses attributed to Kālidāsa, but not traceable in his undisputed works.

[In Devanāgara alphabetical order.]

1. अकृशं नितम्बभागे क्षामं मध्ये समुन्नतं कुचयोः । आर्या
अत्यायतं नयनयोर्मम जीवितमेतदायाति ॥ SP. 3376
Z, p. 306.
KVS., p. 33

2. अघटितघटितं घटयति सुघटितघटितानि दुर्घटीकुरुते । आर्या
विधिरेव तानि घटयति यानि पुमान्नैव चिन्तयति ॥ BP., p. 28

3. [अङ्कं केऽपि शशङ्किरे जलनिधेः पङ्कं परे मेनिरे शार्दूलविक्रीडित
सारङ्गं कतिचिच्च संजगदिरे भूच्छायमैच्छन् परे ।] BP., pp. 57-58
इन्दौ यद्दलितेन्द्रनीलशकलश्यामं दरीदृश्यते SV. 1982
तत्सान्द्रं निशि पीतमन्धतमसं कुक्षिस्थमाचक्ष्महे ॥ (Anonymous)

4. अदातृमानसं क्वापि न स्पृशन्ति कवेर्गिरः । अनुष्टुप्
दुःखायैवातिवृद्धस्य विलासास्तरुणीकृताः ॥ BP., p. 24.

5. अद्य धारा निराधारा निरालम्बा सरस्वती । अनुष्टुप्
पण्डिताः खण्डिताः सर्वे भोजराजे दिवं गते ॥ BP., p. 79

6. अद्य धारा सदाधारा सदालम्बा सरस्वती । अनुष्टुप्
पण्डिताः मण्डिताः सर्वे भोजराजे भुवं गते ॥ BP., p. 80

7. अधरस्य मधुरिमाणं कुचकाठिन्यं दृशोश्च तैक्ष्ण्यं च । आर्या
कवितायां परिपाकं ह्यनुभवरसिको विजानाति ॥ BP., p. 17

8. अनुचितमिदमक्रमश्च पुंसां
यदिह जरास्वपि मान्मथा विकाराः । पुष्पिताग्रा SR. 1519

[(b) भूमेश्च बिम्बं for भूच्छायमैच्छन्.
(d) तन्मन्ये रविभीत for तत् ··· पीत; आलक्ष्यते for आचक्ष्महे.]

Note : The last two feet are stated to have been composed by Kālidāsa by way of *Samasyā-pūraṇa*.

8. [(a) इदमनुचितं for अनुचितमिदं,
(b) जरस्यपि for जरास्वपि; मान्यथा (मान्मथो) for मान्मथा. विकारः for विकाराः.
(c) इदमपि for यदपि च.]

9 K.

यद्पि च न कृतं नितम्बिनीनां (विद्याकालिदासयोः)
स्तनपतनावधि जीवितं रतं वा ॥

9. अपाङ्गपातैरपदेशपूर्वै-
रेणीदृशामेकशिलानगर्याम् । उपजाति
वीथीषु वीथीषु विनापराधं BP., p. p. 62-63
पदे पदे शृङ्खलिता युवानः ॥

10. अभूत्प्राची पिङ्गा रसपतिरिव प्राश्य कनकं शिखरिणी
गतच्छायश्चन्द्रो बुधजन इव ग्राम्यसदसि । Bp., p. 59
क्षणात्क्षीणास्तारा नृपतय इवानुद्यमपरा SP. 3717
न दीपा राजन्ते द्रविणरहितानामिव गुणाः ॥ (Attributed to
भोजराजकविवर्ग)
SV. 2218 (Anonymous)

11. अम्भोजपत्रायतलोचनाना-
मम्भोधिदीर्घास्विह दीर्घिकासु । उपजाति
समागतानां कुटिलैरपाङ्गै- BP., p. 63
रनङ्गबाणैः प्रहता युवानः ॥

12. [अरुणकिरणजालैरन्तरिक्षे गतर्क्षे
चलति शिशिरवाते मन्दमन्दं प्रभाते ।] मालिनी
युवतिजनकदम्बे नाथ मुक्तौष्ठबिम्बे BP., p. 76
चरमगिरिनितम्बे चन्द्रबिम्बं ललम्बे ॥

13. अरे रामाहस्ताभरण भसलश्रेणीशरण शिखरिणी
स्मरक्रीडाव्रीडाशमन विरहिप्राणदमन । KH., p. 222

---

10. [(a) प्राची and पिङ्गा transposed.
(c) क्षणं for क्षणात्.]

12. Note : The last two feet are stated to have been composed by Kālidāsa by way of *Samasyā-pūraṇa*.

13. [(a) मधुप for भसल; हरण for शरण.]

Note : Maheśvara Nyāyālaṃkāra, commentator of the *Kāvya-prakāśa*, states that the stanza is an utterance of Purūravas at the sight of a blue lotus dropped from the hand of Urvaśi. It, however, does not occur in the editions of the *Vikramorvaśīya*, consulted by us,

सरोहंसोत्तंस प्रचलदलनीलोत्पल सखे KP. VII. 282
सखेदोऽहं मोहं श्लथय कथय क्वेन्दुवदना ॥ KA., p. 231

14. अवचनं वचनं प्रियसंनिधा- द्रुतविलम्बित SK.514, SM.88.18
वनवलोकनमेव विलोकनम् । SR.502, SV.2052 (वामनस्वामिन्)
अवयवावरणं च यदञ्चल- SP.3957 (Do)
व्यतिकरेण तदङ्गसमर्पणम् ॥ Z., p. 306., SPK., p. 169
KVS., p. 31, KH., Index, p. 12

15. अविवेकमतिर्नृपतिर्मन्त्री गुणवत्सु वक्रितग्रीवः । आर्या
यत्र खलाश्च प्रबलास्तत्र कथं सज्जनावसरः ॥ BP., p. 26

16. [अशीतेनाम्भसा स्नानं पयःपानं वराः स्त्रियः । अनुष्टुप् BP., p 78
एतद्वो मानुषाः पथ्यं] स्निग्धमुष्णं च भोजनम् ॥ SM. 109.110
(अश्विनीकुमारयोः)

17. अहो मे सौभाग्यं मम च भवभूतेश्च भणितिं शिखरिणी
तुलायामारोप्य प्रतिफलति तस्यां लघिमनि । BP., p. 56
गिरां देवी साक्षाच्छ्रुतिकलितकह्लारकलिका- Z., p. 311
मधूलीमाधुर्यं क्षिपति परिपूर्त्यै भगवती ॥ KVS., p. 33
KH., Index, p.14

---

14. [(a) गुरु for प्रिय.
(c) यदंशुक for यदञ्चल.]

16. [(a) नवाः for वराः ,
(b) मानवाः for मानुषाः]

Note : Kālidāsa is stated to have composed the last foot by way of *Samasyā-pūraṇa*.

17. [(a) भणितं for भणितिं.
(b) घटायां for तुलायां.
(c) सद्यः for साक्षात्.]

Note : The occurrence of the name of Bhavabhūti, who flourished in the seventh or eighth century, is a clear testimony against the authorship of Kālidāsa the lower terminus of whose date is generally placed in about 400 A. D.

18. उपचारः कर्तव्यो यावदनुत्पन्नसौहृदाः पुरुषाः । आर्या
उत्पन्नसौहृदानामुपचारः कैतवं भवति ॥ BP., p. 15

19. उपार्जितानां वित्तानां त्याग एव हि रक्षणम् । अनुष्टुप्
केदारोदरसंस्थानां परीवाह इवाम्भसाम् ॥ SV. 3037
Z., p. 307
KVS., p. 33
KH, Index, p.22

20. एतस्याः स्तनभारेण को नाम न जितो बली । अनुष्टुप्
सप्तद्वीपकरग्राही भवान् यत्र करप्रदः ॥ SR. (परिशिष्ट)-
विक्रमादित्य-
कालिदासयोः ।

21. एतानि निःसहतनोरसमञ्जसानि वसन्ततिलक SP. 3410
शून्यं मनः पिशुनयन्ति गतागतानि । Z., p.307, KVS., p.33
एते च तीरतरवः प्रथयन्ति ताप- KH., Index, p. 24
माल्म्बितोज्झितपरिग्लपितैः प्रवालैः ॥ SKA., p. 158, II. 28

22. एषा धारेन्द्रपरिषन्महापण्डितमण्डिता । अनुष्टुप् (defective)
आवयोरन्तरं वेत्ति राजा वा शिवसंनिभः ॥ BP., p. 55

23. कचभारात्कुचभारः कुचभाराद्भीतिमेति कचभारः । आर्या
कचकुचभाराज्जघनं कोऽयं चन्द्रानने चमत्कारः ॥ BP., p. 65

24. कविमतिरिव बहुलोहा सुघटितचक्रा प्रभातवेलेव । आर्या
हरमूर्तिरिव हसन्ती भाति विधूमानलोपेता ॥ BP., d. 69

25. [कवीनां मानसं नौमि तरन्ति प्रतिभाम्भसि ।] अनुष्टुप् BP., p.22
यत्र हंसवयांसीव भुवनानि चतुर्दश ॥ SM.4.3 (राजशेखरस्य)

---

19. [(a) अर्थानां for वित्तानां.
(b) तटाक (तडाग, तडाक) for केदार.]

21. [(b) पदानि तस्याः for गतागतानि.
(c) मार्ग for तीर.
(d) तरु for परि.]

25. Note : Kālidāsa is stated to have composed the last line by way of *Samasyā-pūraṇa*.

26. कश्चिद्वाचं रचयितुमलं श्रोतुमेवापरस्तां — मन्दाक्रान्ता
कल्याणी ते मतिरुभयतो विस्मयं नस्तनोति । — SR 1723
न ह्येकस्मिन्नतिशयवतां संनिपातो गुणाना- — SK. 1384
मेकः सूते कनकमुपलस्तत्परीक्षाक्षमोऽन्यः ॥ — Z., p. 307
KVS., p. 31
KH., Ihdex, p.26

27. किं पौरुषं रक्षति यो नवार्ता-
न्किं वाधनं नार्थिजनाय यत्स्यात् । — इन्द्रवज्रा
सा किं क्रिया या न हितानुबद्धा — BP.। p. 31
किं जीवितं साधुविरोधि यद्वै ॥

28. कीर्तिस्ते नृप दूतिका मुररिपोरंकेस्थितां भारतीं — शार्दूलविक्रीडित
मां चाकृष्य ददौ तवेति गिरिशः श्रुत्वार्धनारीश्वरः। — SR.(परिशिष्ट)
ब्रह्माभूच्चतुराननः सुरपतिश्चक्षुःसहस्रं दधौ — –विक्रमादित्य-
स्कन्दो मन्दमतिश्चकार न करस्पर्शं स्त्रियाः शङ्कितः॥ — कालिदासयोः

29. कुर्वीथाः श्वशुरस्य भक्तिमधिकां श्वश्र्वाश्च पादानतिं — शार्दूल
स्नेहं भृत्यजने प्रतीच्छ रभसाद् द्वारंगतान् बान्धवान् । — विक्रीडित
भर्तारं सुखदुःखयोरविकृतप्रेमानुबन्धोदया — SK. 526
गेहे वा विपिनेऽपि वा सहचरीवृन्देन नित्यं भज ॥ — Z.,p.312

30. कृतोपकारं प्रियबन्धुमर्कं — उपजाति
मा द्राक्ष्म हीनांशुमधः पतन्तम् । — KVS., p. 65
दूतीव मत्वा नलिनीवधूभि- — SV. 1900
र्निमीलितान्यम्बुरुहेक्षणानि ॥ — SP. 3589
(भोजनरेन्द्रस्य)

---

26. [(a) वाचः for व चं; वोढुं for श्रोतुं; ताः for तां.
(b) सा कल्याणी for कल्याणी ते; उभयथा for उभयतो.
(c) ननु for न हि; संनिवेशो for संनिपातो.
(d) अनल for उपल.]

29. [(d) वृत्तेन (कृत्येन) for वृन्देन.]

Note : Some MSS. of SK. ascribe it to Kālidāsanandin.

31. क्रमसरलितकण्ठं प्रक्रमोल्लासितारं — मालिनी
तरलितवलिलेखासूत्रसर्वस्वमस्याः । — SR. 523 (राजशेखरस्य)
स्थितमतिचिरमुच्चैरग्रपादाङ्गुलीभिः — SK. 936
करकलितसखीकं मां दिदृक्षोः स्मरामि ॥ — KVS., p. 31
KH., Index, p. 30

32. क्काकृत्यं शशलक्ष्मणः क्क — शार्दूलविक्रीडित
च कुलं भूयोऽपि दृश्येत सा — SK. 999, SV. 1343
दोषाणामुपशान्तये श्रुतमहो — KH., p. 223, Z., p. 308
कोपेऽपि कान्तं मुखम् । — SD. Under III. 240
किं वक्ष्यन्त्यपकल्मषाः कृत- — KP.,IV.53,KVS., p.p.31-33
धियः स्वप्नेऽपि सा दुर्लभा — DH., p. 165-166, DHL., p. 66
चेतः स्वास्थ्यमुपैहि कः खलु — EV., p. 109, KA., p. 104
युवा धन्योऽधरं पास्यति ॥ — KU., p. 186, SKA., p. 127
SPK., p. 354

33. क्षीरोदाम्भसि मज्जतीव दिवस-
व्यापारखिन्नं जगत् — शार्दूलविक्रीडित
तत्क्षोभाद् जलबुद्बुदा इव — SK. 390
भवन्त्यालोहितास्तारकाः । — (विक्रमादित्यचण्डाल-
चन्द्रः क्षीरमिव क्षरत्य- — विद्याकालिदासानाम्)
विरतं धारासहस्रोत्करै- — SR. 927
रुद्ग्रीवैस्तृषितैरिवाद्य कुमु- — (चतुर्णाम्)
दैर्ज्योत्स्नापयः पीयते ॥

---

31. [(a) कण्ठ for कण्ठं; प्रक्रमोल्लासितोर for ० तारं.
(b) रेखा for लेखा; सर्वाङ्ग for सर्वस्व.]

Note : The verse occurs in Rājaśekhara's *Viddhaśālabhañjikā* (iii.3).

32. [(a) क्काकार्यं for क्काकृत्यं.
(b) दोषाणां प्रशमाय मे for दोषाणामुपशान्तये; शान्तं for कान्तं.
(c) रेखैव for स्वप्नोऽपि; सान्यादृशी for सा दुर्लभा.
(d) जनो for युवा; धुरं for धरं; धास्यति for पास्यति.]

[(b) तरन्त्या for भवन्त्या.]

Note : The order of lines in S R. in c d a b.

34. छिन्नमिन्दुमण्डलमैन्दवं विलुलितं स्रग्भारनद्धं तमः
प्रागेव प्रथमानकैतकशिखा लीलायितं सुस्मितम् । शार्दूल-
शान्तं कुण्डलताण्डवं कुवलयद्वन्द्वं तिरोमीलितं विक्रीडित
वीतं विद्रुमसीत्कृतं न हि ततो जाने किमासीदिति ॥ BP., p.56

35. चेतोभुवश्चापलताप्रसङ्गे
का वा कथा मानुषलोकभाजाम् । उपजाति
यद्दाहशीलस्य पुरां विजेतु- BP., p. 16
स्तथाविधं पौरुषमर्धमासीत् ॥

36. जगति विदितमेतत्काष्ठमेवासि नूनं
तदपि च किल सत्यं कानने वर्धितोऽसि । मालिनी
नवकुवलयनेत्री पाणिसङ्गोत्सवेऽस्मि- BP., p. 59
[न्मुसल किसलयं ते तत्क्षणाद्यन्न जातम् ॥]

37. जम्बूफलानि पक्वानि पतन्ति विमले जले । अनुष्टुप्
कपिकम्पितशाखाभ्यो [गुलुगुग्गुलुगुग्गुलु ॥ BP., p. 67

38. जाते जगति वाल्मीकौ शब्दः कविरिति स्थितः । अनुष्टुप्
व्यासे जाते कवी चेति कवयश्चेति दण्डिनि ॥ SM. IV. 75
KVS., p.32, p 33
KH., Index, p 36

39. तथैव संकल्पशतैरनङ्ग उपजाति
प्रसह्य नीतोऽस्यनयातिवृद्धिम् । SR. (परिशिष्ट)
आकृष्य चापं श्रवणोपकण्ठे –विक्रमादित्यकालिदासयोः
मयैव मुक्तस्तव बाणमोक्षः ॥

40. तारतारतरैरेतैरुत्तरोत्तरतो रुतैः । अनुष्टुप्
रतार्ता तित्तिरो रौति तीरे तीरे तरौ तरौ ॥ SP.544, Z., p.308
KVS., p. 33
KH., Index, p.48

---

36. Note : Kālidāsa is stated to have composed the first three feet by way of *Samasyā-pūraṇa*.

37. Note : Kālidāsa is stated to have composed the first three feet by way of *Samasyā-pūraṇa*.

38. [(a) याते for जाते; कविरित्यभवद्ध्वनिः (कविरित्यभिधाभवत्) for शब्दः··· स्थितः .

(b) कवी इति ततो व्यासे for व्यासे ··· कवी; त्वयि for चेति.]

41. ते यान्ति तीर्थेषु बुधा ये शम्भोर्दूरवर्तिनः । अनुष्टुप् (defective)
यस्य गौरीश्वरश्चित्ते तीर्थं भोज परं हि सः ॥ BP., p. 62

42. त्यज मनसिज चापाकर्षणक्लेशमुच्चैः मालिनी
त्रिभुवनविजयस्ते साधितो वेधसैव । SR. (परिशिष्ट)
इयमनुनयलीलासङ्गिनीरन्ध्रपीन- –विक्रमादित्य-
स्तनभरदरनम्रा निर्मिता यन्मृगाक्षी ॥ कालिदासयोः

43. दिनेषु गच्छत्सु मधूकपाण्डुरं
तदीयमाश्याममुखं स्तनद्वयम् । वंशस्थविल
समुद्वयोर्वारणदन्तकोषयो- SV. 1543
र्बभार कान्ति गवलापिधानयोः ॥

44. [दिवा काकरुताद्भीता] रात्रौ तरति नर्मदाम् । अनुष्टुप्
[तत्र सन्ति जले ग्राहाः] मर्मज्ञा सैव सुन्दरी ॥ BP., p. 68

45. दिवापि जलदोदयादुपचितान्धकारच्छटा- पृथ्वी
जटालिततटीमिमां विशति विस्मरन्ती भयम् । SK.788, Z., p.308
तमालतरुमण्डितावटनिरस्तभानुद्युति KVS., p. 31
धृताभिसरणव्रता शबरसुन्दरी कन्दरीम् ॥ KH , Index, p.53

46. द्वित्रिमुचुकुन्दमुकुल- आर्या
स्त्रिचतुरकुसुमक्रमेणलवलीषु । KVS., p. 32
पञ्चषफलिनीकलिको KH., Index, p. 55
जयति हिमर्तुर्नवावतारः ॥ SM., p. 232, V. 4 (कस्यापि)

47. न वक्ति प्रेमार्द्रं न खलु परिरम्भं रचयति शिखरिणी
स्थितौतस्यां तस्यां करकमललीलां न सहते । SK. 504
स्मितज्योत्स्नाकान्तं मुखमभिमुखं नैव कुरुते Z., p. 308
तथाप्यन्तःप्रीतिं वपुषि पुलकोऽस्याः कथयति ॥ KVS., p. 31
KH., Index, p.57

---

43. Note : This verse appears to be an imitation, by a later poet, of the *Raghuvaṃśa*, iii.8.

44. Note : To Kālidāsa are attributed the second and the last feet said to have been composed by way of *Samasyā-pūraṇa*.

45. [(c) मण्डितां वट for मण्डितावट.]

48. पयोधराकारधरो हि कन्दुकः — वंशस्थविल, SM. 66.5
करेण शेषादपहन्यते मुहुः । — Z., p. 308, BP., p. 69
इतीव नेत्राकृतिभीतमुत्पलं — KVS., p. 32, p. 33
तस्याः प्रसादाय पपात पादयोः ॥ — KH., Index, p. 61
Verity–SP. 3927

49. पादन्यासं क्षितिधरगुरोर्मूर्ध्नि कृत्वा सुमेरोः
क्रान्तं येन क्षपिततमसा मध्यमं धाम विष्णोः । — मन्दाक्रान्ता
सोऽयं चन्द्रः पतति गगनादल्पशेषैर्मयूखै- — SV. 561
र्दूरारोहो भवति महतामप्युपभ्रंशनिष्ठः ॥

50. पिनष्टीव तरङ्गाग्रै- — अनुष्टुप्
रर्णवः फेनचन्दनम् । — SR. 935
तदादाय करैरिन्दु- — KU., p. 37, p. 197 (anonymous)
र्लिम्पतीव दिगङ्गनाम् ॥ — SM., p 263, V. 23 (व्यासस्य)

51. प्राप्य प्रमाणपदवीं को नामास्ते तुलेऽवलेपस्ते । — आर्या
नयसि गरिष्ठमधस्तात्तदितरमुच्चैस्तरां कुरुषे ॥ — BP., p. 25

52 प्रियायां स्वैरायामतिकठिनगर्भालसतया — शिखरिणी
किराते चाकर्णं धृतधनुषि धावत्यनुपदम् । — SK 1863
प्रियाप्रेमप्राणप्रतिभयवशाकूतविकलो — SR. 1169
मृगः पश्चादालोकयति च मुहुर्याति च मुहुः ॥ — Z., p. 308
KVS., p, 31
KH , Index, p. 68

---

48. [(b) अभि for अप; इव ताड्यते for अपहन्यते.
(d) स्त्रियः for तस्याः .]

50. [(b) उदधिः (समुद्रः) for अर्णवः .
(d) दिगङ्गनाः for दिगङ्गनाम्.]

52. [(a) यातायां (Aufrecht धीरायां) for स्वैरायां.
(b) चाकर्णीकृत for चाकर्णं धृत.
(c) प्राणः for प्राण; वशाज्जातविवशो (रसाज्ञानविवशो) for वशा — विकलो.]

53. बहूनामल्पसाराणां समवायो दुरत्ययः । अनुष्टुप्
तृणैर्विधीयते रज्जुर्बध्यन्ते तेन दन्तिनः ॥ BP., p. 28
SP. 1326 (Included among the stanzas stated to have been culled from works on Rājanīti and Smṛtī as well as from the epics.)
Sm. 110 (Anonymous)
SV.2742(व्यासमुनि)

54. [भोजनं देहि राजेन्द्र घृतसूपसमन्वितम् ।] अनुष्टुप्
माहिषं च शरच्चन्द्रचन्द्रिकाधवलं दधि ॥ BP., p.17
SM. 109. 131

55. मत्तानां कुसुमरसेन षट्पदानां प्रहर्षिणी
शब्दोऽयं परभृतनाद एष धीरः । KVS., p. 34
कैलासे सुरगणसेविते समन्तात् KH., Index, p. 72
किंनर्यः कलमधुराक्षरं प्रगीताः ॥ DR. under iii. 16
(Citae from *Vikramorvaśīya.*)
Z., p. 309

---

53. [(a) अप्यसाराणां for अल्पसाराणां; हि दारुणः (दुर्जयः) for दुरत्ययः.
(b) दन्तिनश्च तैः for तेन दन्तिनः S M. reads the line thus :—
तृणैरविद्यते रज्जुर्यया (तया) नागोऽपि बध्यते.]

54. [(a) शाकसूपघृतान्वितम् for घृत ··· समन्वितम्.]

Note : To Kālidāsa is attributed the latter half of the verse by way of *Samasyā-pūraṇa.*

55. [(a) आकाशे for कैलासे.
(d) किंनार्यः for किंनर्यः .]

Note : The verse occurs in the northern recension of the *Vikramorvaśīya* (I.3) of Kālidāsa.

56. मण्डलाभोगिनस्तुङ्गाः स्तनाः स्त्रीणामसाधवः । अनुष्टुप्
यतो दत्तकरेऽद्यापि गोपल्लीग्रहणोद्यतः ॥ SR.(परिशिष्ट)
विक्रमादित्य-कालिदासयोः ।

57. मधु तिष्ठति वाचि योषितां सुन्दरी
हृदि हालाहलमेव केवलम् । KH., Index, p. 72.
अत एव निपीयतेऽधरो SV. 3380
हृदयं मुष्टिभिरेव ताड्यते ॥ (कालिदासमाघयोः)

58. महाराज श्रीमन् जगति यशसा ते धवलिते
पयःपारावारं परमपुरुषोऽयं मृगयते । शिखरिणी
कपर्दी कैलासं करिवरमभौमं कुलिशभृ- BP., p. 16
त्कलानाथं राहुः कमलभवनो हंसमधुना ॥

59. [मुद्गदाली गदव्याली कवीन्द्र वितुषा कथम् ।] अनुष्टुप्
अन्धवल्लभसंयोगे जाता विगतकञ्चुकी ॥ BP., p. 27

60 मुहुरङ्गुलिसंवृताधरोष्ठं
प्रतिषेधाक्षरविक्लवाभिधानम् । मालभारणी
मुखमंसविवर्ति पक्ष्मलाक्ष्याः SV. 1273
कथमप्युन्नमितं न चुम्बितं नु ॥

61. मेरौ मन्दरकन्दरासु हिमवत्सानौ महेन्द्राचले
कैलासस्य शिलातलेषु मलयप्राग्भारभागेष्वपि । शार्दूलविक्रीडित
सह्याद्रावपि तेषु तेषु बहुशो भोज श्रुतं ते मया BP., p. 62
लोकालोकविचारचारणगणैरुद्गीयमानं यशः ॥

62. यत्त्रैलोक्यमनोरथस्य परमं पात्रं मनोजन्मना शार्दूलविक्रीडित
यच्चास्त्रं हरनिर्जितेन जगतीं जेतुं चिरादर्जितम् । SK. 811
यन्मे श्रोत्ररसायनं कथमहो प्राप्तं तदेतन्मया Z., p. 31
रूपं लोचनपीयमानविगलल्लावण्यपूरं पुरः ॥ KVS., p. 31
KH., Index, p. 76

63. यत्त्वन्नेत्रसमानकान्तिसलिले मग्नं तदिन्दीवरं शार्दूलविक्रीडित
मेघैरन्तरितः प्रिये तव मुखच्छायाभिरामः शशी । SK. 976

---

59. Note : To Kālidāsa is attributed the latter half of the verse by way of *Samasyā-pūraṇa.*

62. [(d) वपुः for पुरः .]

ये च त्वद्गमनानुकारिगतयस्ते राजहंसा गता- SV.1366
स्त्वत्सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते ॥ (यशोवर्मणः)
KU, p.12 (anonymous)
SD. ST., p. 47
SPK., p. 412, p. 553

64. यस्यास्ति सर्वत्र गतिः स कस्मा-
त्स्वदेशरागेण हि याति खेदम्।
तातस्य कूपोऽयमिति ब्रुवाणाः
क्षारं जलं कापुरुषाः पिबन्ति ॥

उपजाति
BP., p. 25
SV. 2902 (पञ्चतन्त्रके)

65. यं यं नृपोऽनुरागेण संमानयति संसदि।
तस्य तस्योत्सारणाय यतन्ते राजवल्लभाः ॥

अनुष्टुप्
BP., p. 26

66. रक्तस्त्वं नवपल्लवैरहमपि
श्लाघ्यैः प्रियाया गुणै-
स्त्वामायान्ति शिलीमुखाः
स्मरधनुर्मुक्ताः सखे मामपि।
कान्तापादतलाहतिस्तव
मुदे तद्वन्ममाप्यावयोः
सर्वं तुल्यमशोक केवलमहं
धात्रा सशोकः कृतः ॥

शार्दूलविक्रीडित SR. 770
(anonymous) SV. 1364
(यशोवर्मणः) KVS., p.34, p.76
KH., p. 223, KK., p. 157
DH. p.p. 90-91 (anonymous)
KA., p. 24 (Anonymous)
KU., p.65 (anomymous)
RG., p. 476

67. रक्ताशोक कृशोदरी क नु
गता त्यक्त्वानुरक्तं जनं
नो दृष्टेति मुधैव चालयसि
किं वातावधूतं शिरः।
उत्कण्ठाघटमानषट्पद-
घटासंघट्टदष्टच्छद-

शार्दूलविक्रीडित SM. 43.35
(वसुनागस्य) KP. Chap. VII,
V. 29s, KH., p. 224
KA., p. 203 (Anonymous)
See Vik., cl. Panlit. p. 127

---

63. [(b) अन्तरितं for अन्तरितः; छायानुकारी (०नुकारः) for छायाभिरामः.
(c) योपि for ये च; छायानुसारि for ० नुकारि,
(d) देवेन for दैवेन.]

64. [(b) नाशं for खदेम्.]

66. [(b) तथा for सखे.
(c) सत्यं for तद्वत्.]

स्तत्पादाहतिमन्तरेण भवतः
पुष्पोद्गमोऽयं कुतः ॥

68. राजाभिषेके मदविह्वलाया — उपजाति
हस्ताच्च्युतो हेमघटो युवत्याः । — BP , p. 75
सोपानमार्गं प्रकरोति शब्दं — SPK., p. 374
टटं टटं टंट टटं टटं टम् ॥

69. लक्ष्मीक्रीडातडागो रतिधवल- — स्रग्धरा
गृहं दर्पणो दिग्वधूनां — SP. 3644, SV. 2005
पुष्पं श्यामालतायास्त्रिभुवन- — (Anonymous) BP., p. 58
जयिनो मन्मथस्यातपत्रम् । — Z., p. 309, KVS., p. 33
पिण्डीभूतं हरस्य स्मित- — KH., Index, p 82
ममरसरित्पुण्डरीकं मृगाङ्को
ज्योत्स्नापीयूषवापी जयति
सितवृषस्तारकागोकुलस्य ॥

70. वनिताकरतामरसाभिहतः — तोटक SM. 66.7 (दण्डिनः)
पतितः पतितः पुनरुत्पतसि । — Z., p. 310, KVS., p. 32
ध्रुवमस्ति हि कन्दुक ते हृदयं — KH., Index, p. 83, p. 85
दयिताधरसङ्गमलुब्धमिव ॥ — BP. ? p. 68

---

67. [(a) त्यक्त्वां for त्यक्त्वा.
(b) यत् for किं; वाताभिभूतं for ० वधूतं.
(c) घृष्य (घृष्ट) for दष्ट.]

68. [(a) तव for राजा; मदनातुराया for मदविह्वलाया.
(c) लुठन् स सोपानपथे करोति.]

69. [(a) तडागं for तडागो.
(b) पुष्प for पुष्पं; विजये for जयिनो.
(c) स्मरस्य for हरस्य; अमृत for अमर; धुनी for सरित्; शशाङ्को for मृगाङ्को.
(d) नयति for जयति; गोलकस्य for गोकुलस्य.]

70. [(b) उत्पतितः for उत्पतसि.
(c) खल (खलु) ते कटुकं (कठिनं) हृदयं.
(d) वनिता (प्रमदा) for दयिता.]

71. ववुरेव मलयमारुतो जगुरेव | आर्या
पिकाः परारि च परुच्च । | SK. 497, Z., p. 310
उत्कण्ठाभरतरलं सखि | KVS., p. 31
मानसमेषमः किमिदम् ॥ | KH., Index, p. 83.

72. वेणी विडम्बयति मत्तमधुव्रताली- | वसन्ततिलक
मङ्गीकरोति गुणमैन्दवमास्यमस्याः । | SP. 3378, Z., p. 310
बाहू मृणाललतिकाश्रियमाश्रयेते | KVS , p 34
पुंखानुपुंखयति कामशरान् कटाक्षः ॥ | KH., Index, p. 87

73. व्यसनिन इव विद्या क्षीयते पङ्कजश्री-
र्गुणिन इव विदेशे दैन्यमायान्ति भृङ्गाः । | मालिनी
कुनृपतिरिव लोकं पीडयत्यन्धकारो | BP., p. 15
धनमिव कृपणस्य व्यर्थतामाति चक्षुः ॥

74 शिवशिरसि शिरांसि यानि रेजुः
शिव शिव तानि लुठन्ति गृध्रपादे । | पुष्पिताग्रा
अयि खलु विषमः पुराकृतानां | BP., 71
भवति दि जन्तुषु कर्मणां विपाकः ॥

75. संभोगभृष्टताडङ्कः कर्णस्तस्या विराजते । | अनुष्टुप्
नेत्रनीलोत्पलस्येव नालकं द्विगुणीकृतम् ॥ | SK. 830
(विक्रमादित्य-कालिदासयोः)

76. [सर्वस्य द्वे] सुमतिकुमती संपदापत्तिहेतू | मन्दाक्रान्ता
[वृद्धो यूना] सह परिचयात् त्यज्यते कामिनीभिः । | BP., p. 72
[एको गोत्रे] प्रभवति पुमान्यः कुटुम्बं बिभर्ति | SV. 2362
[स्त्री पुंवच्च] प्रभवति यदा तद्धि गेहं विनष्टम् ॥ | (Anonymous)

---

71. [(a) च omitted.]
72. [(d) पुंखा न for पुंखानु.]
75. [(a) एष for भृष्ट; तस्य for तस्या.]
76. Note : (1) To Kālidāsa are attributed the portions outside brackets, by way of *Samasyā-pūraṇa.*
(2) S V. reads the verse as follows :--
सर्वस्य द्वे जगति नियते संपदापच्च जन्तो-
र्वृद्धो यूना सह परिचयात् त्यज्यते कामिनीभिः ।
एको गोत्रे भवति पुरुषः संपदामाश्रयो यः
स्त्री पुंवच्च व्यवहरति चेद्विद्धि गेहं प्रनष्टम् ॥

77. सुकविद्वितयं जाने निखिलेऽपि महीतले ।
भवभूतिः शुकश्चायं वाल्मीकिस्त्रितयोऽनयोः ॥

अनुष्टुप्
BP., p. 41

78. सुतं पतन्तं प्रसमीक्ष्य पावके
न बोधयामास पतिं पतिव्रता ।
तदाभवत्तत्पतिभक्तिगौरवा-
[द्धुताशनश्चन्दनपङ्कशीतलः ॥]

वंशस्थविल
BP., p. 66

79. स्नाता तिष्ठति कुन्तलेश्वर-
सुता वारोऽङ्गराजस्वसु-
र्द्यूते रात्रिरियं जिता
कमलया देवी प्रसाद्याधुना ।
इत्यन्तःपुरसुन्दरीजन-
गुणे न्यायाधिकं ध्यायता
देवेना [प्रतिपत्ति मूढमनसा
द्वित्राः स्थिता नाडिकाः ॥]

शार्दूलविक्रीडित
BP., p. 70
SK. 877
(Anonymous)
SKA (NSP, 1934).
V. 364
DR. under II. 7
SD. under III. 42

80. स्वप्न प्रसीद भगवन् पुनरेकवारं
संदर्शय प्रियतमां क्षणमात्रमेव ।
दृष्ट्वा सती निविडबाहुनिबन्धलग्नं
तत्रैव मां नयति सा यदि वा न याति ॥

वसन्ततिलक
SK. 948, SR. 806
Z., p.310 KVS. p.31
KH., Index, p. 102

---

78. Note : To Kālidāsa are attributed the first three feet by way of *Samasyā-pūraṇa*.

79. [(b) द्यूतैं for द्यूते; प्रसाद्याद्य च for प्रसाद्याधुना.

(c) सुन्दरीभिरसकृत् विज्ञापितेन क्रमात् (सुन्दरीः प्रति मया विज्ञाय विज्ञापिते) for सुन्दरी ... ध्यायता.

(d) स्थितं for स्थिता.]

Note : To Kālidāsa are attributed the first three feet and the first three initial letters of the last foot, by way of *Samasyā-pūraṇa*.

80. [(a) क्षणं for पुनः .

(c) दृष्ट्वा for दृष्टा.]

81. हंसः किस्विद्विरश्चेरवतरति तटं पश्चिमस्याम्बुराशेः
क्षिप्तो व कर्णशङ्खः प्र.. ....माद्यदैरावतेन । स्रग्धरा
इत्यूहन्ते सुधांशुं मम तु मतमिदं त्वद्भयादेव देव SRK.
प्रत्यङ्मुक्तं मघोना पतति गगनतः श्वेतमत्रातपत्रम् ॥ (परिशिष्ट)

82. हाधिक् सा किल तामसी शार्दूलविक्रीडित
शशिमुखी दृष्टा मया यत्र सा KH., p. 224
तद्विश्लेषरुजान्धकारितमिदं KP. Chap. VII.
दग्धं दिनं कल्पितम् । v. 149
किंकुर्मः कुशले सदैव KA. p. 194
विधुरो धाता न चेत्तत्कथं (Anonymous)
तादृगयामवतीमयो भवति
मे नो जीवलोकोऽधुना ॥

83. हेमाम्भोरुहपत्तने परिमलस्तेयी वसन्तानिल- शार्दूलविक्रीडित
स्तत्रत्यैरिव यामिकैर्मधुकरैरारब्धकोलाहले । Z., p. 311
निर्यातस्त्वरया व्रजन्निपतितः श्रीखण्डपङ्कद्रवै- KVS., p. 34
र्लिप्ते केरलकामिनीकुचतटे खञ्जः शनैर्गच्छति ॥ KH., Index, p. 104

---

82. [(b) विच्छेद for विश्लेष.]

Note : Acc. to commentator, Maheśvara Nyāyālaṃkāra (on K. P.), this stanza is uttered by Purūravas who saw Urvaśī in a dream. The verse is, however, not found in the extant recensions of the *Vikramorvaśīya.*

83. [(a) स्तेनो for स्तेयी.
(b) प्रारब्ध for आरब्ध; कोलाहलः for ० ले.
(c) त्वरितो for त्वरया.
(d) लिप्तः for लिप्ते; तटात् for तटे.]

PART III

TRANSLATION
of
the minor poetical works and the stray verses attributed to Kālidāsa.

[As the *Maṅgalāṣṭaka* lacks charm, being a list of certain objects and gods, etc., we have not translated it. The *Navagraha-stotra* has also been left untranslated for the same reason; it invokes the *Grahas* in the trite fashion.]

BRAMARĀṢṬAKA

(As in Adyar MS.)

1. Having seen the large painted lotus, that bee became swollen. Wonderful, wonderful, what's this, what's this—thus saying it fell upon it. There was neither fragrance nor any honey-drop, nor indeed that tenderness. While turning round with its head, alas, it, with its face downcast, went out in shame.
2. That *Ketakī*, rich in fragrance and renowned in the world, is of golden hue. The hungry bee fell into the flower, mistaking it for a lotus. Blinded by the pollens of the flower, and, with its wings rent by the thorns, the bee could neither stay nor leave.
3. The bee having left the *Navamallikā*, rich in fragrance, went to the *Yūthikā*. By chance, having forsaken that too, it went afterwards to the lotus. There, being confined by the moon, that foolish creature is wailing. A fool, without contentment, is subjected to humiliation.
4. Those bees which, since (your) budding, resorted to you, are wandering outside the fruits. You, alas, do not greet them at the sight of them. Those worms, which have not come within the range of your vision, are inside your fruits. O mango tree, fie on you; you are devoid of the knowledge of who is your own and who is not your own.
5. He, who spent his life in the host of fresh lotuses, drank honey to heart's content, indulged easily in constant sport among the blossoms of *Mālatī*, resorts to the *Guñjā* plant with the mind attracted by the smell of honey. Alas, to what conditions has that very bee not come through fate ?
6. That bee, the lover of the host of lotuses, charmed by sport among the multitude of lilies, having, through ill luck, arrived in a foreign land, sets much store by the juice of *Kuṭaja* flowers.
7. This bee falls on the parrot's beak taking it to be a *Palāśa* flower. The parrot, too, wants to kill it mistaking it for a rose-apple.
8. The night will peter out, fine morning will come, the sun will rise, and the beauty of the lotus will smile—alas, alas, while the bee inside the closed lotus was thinking in this way, an elephant uprooted the lotus-plant.

Here ends the *Bhramarāṣṭaka* composed by Kālidāsa.

CĀTAKĀṢṬAKA

1. O cloud, shake it with winds, frighten it with terrible rumbling or crush it with hails. Of the *Cātaka*, whose life is saved by drops of your water, there is no other resort.

2. The *Cātaka*, when thirsty, prays to the cloud for three or four drops of water. He, too, fills it with copious water. It is strange. Here, it is the generosity of the great.

3. One can subsist by any means of livelihood. But, the prospect of the breach of family-vow is extremely unbearable.

4. O cloud, you rumble but do not give water. I, *Cātaka* bird, am perturbed. If, by chance, the south-wind blows, then where shall be I, where you and where will be a shower ?

5. Scanty water, in large tanks, is full of fibres of lotus-stalks; the lake has its shallow water gone down. The great ocean, extremely reduced, is only one handful of the sage (Agastya). Rivers like the Ganges have flowed into the ocean. So, having forsaken them, the *Cātaka* desires the water of the clouds high up.

6. While the cloud is pouring water, the seeds have sprouted up, the rivers have swollen, the creepers have blossomed, the trees have put on leaves, and people have been delighted. O *Cātaka*, I do not fully know what sin you have (committed) that only two or three drops of water fall into this beak of yours.

7. Other birds drink water from rivers as well as lakes. But, O cloud, you are the only support of the *Cātaka*.

8. O cloud, by the *Cātaka*, suffering supportless for a long time in the sky and that too with the beak upturned, even your sweet rumbling has not been heard, let alone a shower.

Here ends the *Cātakāṣṭaka* composed by Kālidāsa.

GAṄGĀṢṬAKA

होता तु ऋत्विगादौ स्याज्जामाता दुहितुः पतिः ।
पित्रादावप्येदमेव पिताजनकमेघयोः ॥ (84)
राजादौ राज्ञि देवेन्द्रे दुहिता तनया रमा ।
गौरी वाणी रती रामा लताश्रिमदनादिषु ॥ (85)
ज्योतिस्तेजसि कान्तौ च किरणादौ सुतादिके ।
लतादौ रघुवीरादौ रामा रजितादिके ॥ (86)

धान्ताः

मधु क्षौद्रे माक्षिके च नवनीतसुधादिषु ।
मधुर्वसन्ते दैत्ये च माधवे मकरध्वजे ॥ (87)
33B विधुरग्नौ वायुदेवे काले चन्द्रे रसाकरे ।
शुभ्रे दस्ये महाश्वेते जले शुक्लादिके तथा ॥ (88)
गृधुः कामे महादेवे माधवे मधुसूदने ।
पृथुर्वेनसुते राज्ञि विस्तीर्णे श्रेष्ठयज्ञयोः ॥ (89)
माधस्सिहे सर्पभेकपक्षी सामान्यमूकयोः ।
निधस्तुब्राह्मणे धर्मशीले राशि पुरन्दरे ॥ (90)
समुद्रे वारिदे वायौ शङ्करे मकरध्वजे ।
ब्रह्मादौ च नरादौ च स्थिरादौ च समुन्नयेत् ॥ (91)
रथो याने शरीरे च क्षीरे वृक्षे पतत्रिणि ।
चीनीचीनाम्बरादौ च कामसोमहरादिषु ॥ (92)

गाधस्समुद्रे बाणे च खेचरे च चरे तथा ।
गाधावृत्तान्तवीणाम्बा चिञ्चरीकादिषु स्मृता ॥ (93)
जरूधं वत्सरे मांसे वार्धक्ये जीर्णपूलयोः ।
वरूधः कङ्कटाद्यौ स्याद्बले पार्श्वस्थखड्गयोः ॥ (94)
वसनाशनयोश्चैव संघाते रथगोपने ।
पीधं जले पिधश्शम्भौ विष्ण्वाद्यौ मदनादिके ॥ (95)
तीर्थं पुण्यादिके तीर्थश्शङ्कराग्निवरादिषु ।
तुद्रं खड्गादिके रम्येऽप्यञ्जनाद्यौ मनोभवे ॥ (96)
उक्थं सामनिवेदान्ते रिक्थं शाश्रे धने हरे ।
सिक्थं मधूच्छिष्टं पुर्योर्मृत्यौ काले च भेषजे ॥ (97)
सार्थस्तु गच्छताः(तां)सघे नद्याद्यौ च चरादिके ।
गोपिधस्तु समुद्रे स्यात्तीर्थे नेत्रे जले खगे ॥ (98)
प्रत्यूषकाले मरुति श्रोत्रे जिह्वाविलासयोः ।
अधावगध आनन्दे प्रातस्सवनरामयोः ॥ (99)
समिधोऽग्नौ च तद्द्रव्ये गायके जलदे जले ।
सद्वृत्तौ साधुभावे च सङ्गीते मुरजध्वनौ ॥ (100)

दान्ताः

34A तिथिः काले महाकाल शङ्करे मकरध्वजे ।
पृथस्तु सेचिते द्रव्ये जलदग्नौ निशाकरे ॥ (101)
गृथस्त्वहीने तद्देशचर्मरूपपुटान्तरे ।
यूथस्तु युगले वृन्दे स्नेहे सत्यङ्गवारिणोः ॥ (102)
प्रोथः प्रभौ च देवेन्द्रेऽप्यश्वानां नासिकाव्ययोः ।
मद्ये च नाद्यां मधुनि प्रभायां चन्द्रसूर्ययोः ॥ (103)
स्वादुचन्दनवाग्वाद्यौ फलादावमृतादिषु ।
धर्मशीले चन्द्रभूषे चरे चाप्यचरे सुरे ॥ (104)
क्लिदुश्चन्द्रे च नक्षत्रे सच्चित्ते चन्द्रशेखरे ।
इन्दुश्चन्द्रे च धवले पारदे मानुषे मृते ॥ (105)
कन्दुः पक्षिमृगाद्यौ स्यात्पाकस्थाने हरादिके ।
भिदुर्वज्रे परश्वाद्यौ वीराद्यौ शङ्करादिके ॥ (106)
मृदुस्तु मार्दवे चन्द्रे शिवकृष्यादिके तथा ।
पादुः स्थाल्यां च शक्तौ चाप्यायुधे पादधारिका ॥ (107)

दोर्बाह्वौ शान्तपुरुषे सुधान्नजलदादिषु ।
सद्भिः भूमौ च चित्ते चाप्याचार्यं राज्ञि भूभृतौ ॥ (108)

धान्ताः

बन्धुस्तु स्वजने चित्ते सिन्धुर्देशे नदे सुरे ।
विधुः कालाग्निवाय्वादि चन्द्रमादिषु कथ्यते ॥ (109)
गृधुः कामे च चित्ते च पामरे धनमूलके ।
माघो मनुष्ये पश्वादौ राक्षसादौ सरीसृपे ॥ (110)
सानुस्तु पर्वतप्रान्ते खड्गादौ रशनादिके ।
जानुर्मनुष्ये जन्त्वादौ मानसादौ मनीषिते ॥ (111)
तनुश्शरीरे शैले च सूक्ष्मे चित्ते धनादिके ।
धनुर्मनसि खड्गादौ राश्यादौ च बहुश्रुते ॥ (112)
श्येनः पक्षिमनश्चापि स्त्येनश्चोरे च जन्तुषु ।
अविनो विहगेऽध्वर्यौ आर्येऽप्यश्वादिके तथा ॥ (113)
34B वृजिनं दुरिते कष्टे कुटिले मूकमानुषे ।
दारिद्र्ये व्यवसायादौ धर्मादौ नीचसेवने ॥ (114)
अजनं पादपे पादे चर्ममूषकवारिषु ।
कुटिलः पर्वते गेहे परिभागादिकेऽश्मके ॥ (115)
विपिनं कानने कंपे कातरे नीचवस्तुनि ।
तुहिनं घातुके सत्ये नीहारे पामरेऽपि च ॥ (116)
माहिनं बाणशय्यायां ब्रह्मचिन्तनमोक्षयोः ।
सवनं यागमात्रे च जनमात्रे रदादिके ॥ (117)
यवनस्तु तुरुष्के स्यात्पिष्टादौ मानवादिके ।
रशनारज्जुमात्रे स्याद्भोज्यवस्तुनि मानुषे ॥ (118)
ओदनोऽन्ने शिवादौ च पदादौ वनितादिके ।
द्योतनोऽग्नौ शिवादौ च सर्वश्रेष्ठादिके तथा ॥ (119)
स्यन्दनं सलिले चित्ते रथादौ पामरादिके ।
रोचनाकिरणे कान्तौ सूर्यादौ मानसादिके ॥ (120)
रञ्जनारोचनद्रव्ये रागे चापि मनोहरे ।
भुवनं पञ्चभूतेषु शिवादौ सत्कथादिके ॥ (121)
सुवनं गर्भमोक्षे स्यान्मरणे चापि सङ्गतौ ।
धुवनं धूपमात्रे स्याद्वने वृक्षादिके तथा ॥ (122)

भृञ्जनं पाकपात्रे स्याद्भ्राष्ट्रे कुत्सितमानसे ।
पुरणं पालने राज्ये सन्तोषादिषु भूसुरे ॥ (123)
वृजिनं गगने तोये पापादौ कामुकादिके ।
मदनामोदने स्तोत्रे स्वप्ने कान्तौ खगादिके ॥ (124)
निधनं पोषणे रात्रौ पर्वतादौ सुरादिके ।
शवपानस्तु मार्गे स्याज्ज्वलने परमात्मनि ॥ (125)
जरसानस्तु पुरुषे वृक्षादौ पाञ्चभूतिके ।
आयुष्येऽपि च सङ्कल्पे विकल्पेऽपि च रोधसि ॥ (126)
35A भुजसानस्तु मेघे स्यात् स्थाने मानसि शङ्करे ।
सहसानो मयूरे स्यात्क्षमावति महाजने ॥ (127)
वृधसानस्तु पुरुषे याचके परमात्मनि ।
मन्दसानोऽग्निचन्द्रार्कस्वप्नसंहारकान्तिषु ॥ (128)
आशुसानोऽग्निचन्द्रार्कब्राह्मणादिषु संस्तुते ।
संस्तुवानस्तोतरि स्यान्माधवादौ शुकादिके ॥ (129)
युजानस्सूर्यचन्द्राग्निशिवादिहरितादिके ।
बुधानो मुनिदेवाब्रगुरुशम्भुसुरादिके ॥ (130)
दृशानो ब्राह्मणे सूर्ये चन्द्रे ज्योतिषि माधवे ।
मुमुचानो यमे दैत्ये कामे शम्भौ महात्मनि ॥ (131)
युयुधानो युद्धशौण्डे खड्गादौ रशनादिके ।
पापिष्ठे कठिने दैत्ये यमे मोक्षे सुराधिपे ॥ (132)
जुहुरानोऽग्निधर्मेन्द्रवयोवृद्धिमठादिके ।
धमनीकण्ठसामीप्य नाडिरन्ध्रादिकेऽपि च ॥ (133)
अह्ननिस्त्वग्नि चन्द्रार्कशिवदेवादिकेऽपि च ।
वर्तनिः परिमार्गे च देवतानाम्नि शङ्करे ॥ (134)
रिपुश्शत्रौ महाकाले यमे शास्त्रज्ञपण्डिते ।
अम्बुरोगे जले पाने मृत्यौ चन्द्रार्कशम्भुषु ॥ (135)
अलाबूः स्रंसने खड्गे तुम्बीसलवसन्तयोः ।
बम्बूस्तु भक्षणद्रव्ये वृक्षभेदे मृतेऽपि च ॥ (136)
दम्भूस्तु स्यात्सर्पजातौ कुटिले यमदैत्ययोः ।
शम्भुस्तु शङ्करे चोले माधवे मदनादिके ॥ (137)

अर्माक्षिरोगे रोगे च नित्याभावे नृतेऽपि च।
स्तोमसंघातखड्गादि - क्षयादि - हरिणादिके ।। (138)
सोमश्चन्द्रे च मेघे च महिषादौ फलादिके।
होमस्त्वाहुति - जिह्वादि - पश्वादि - घटनादिषु ।। (139)
35B सर्मफत्रे जले जन्तौ नरादौ च खगादिषु।
धर्मः पुण्ये चाभ्युदये यमे दैत्ये महेश्वरे ।। (140)
क्षेमः पापे च धर्मे च निर्भये चनरादिके।
क्षौमं वस्त्रे च कण्ठे च ध्वनिमात्रे नरादिके ।। (141)
भौमस्सूर्ये च चन्द्रेऽग्नौ शिवादौ क्षोदमात्रके।
यामो रात्रौ च सेतौ च मोक्षे रामादिके तथा ।। (142)
पद्मं तु कमलादौ स्यान्निध्यादौ ललितादिषु।
यक्ष्मरोगे च जलदे नेमो वायो जलादिके ।। (143)
ग्रामो जनपदे भक्ष्यद्रव्ये चापि मनोहरे।
ऊमो नभसि देवेषु नगरे चन्द्रमादिषु ।। (144)
स्यूमस्तु रज्जौ जलदे जले वाय्वर्कधेनुषु।
शुष्मो वायौ बले सूर्ये इष्मस्सूर्यवसन्तयोः ।। (145)
युग्मश्शरदि युद्धे च इध्मस्स्यात्समदि प्रिये।
काले चापि च दस्मस्तु यजमाने प्रभावपि ।। (146)
स्त्यामश्चन्द्रे गतौ सूर्ये चरादौ मनुजादिके।
धूमोऽग्निभेदे चलिते नरे मेघे च वाहने ।। (147)
सूमश्चन्द्रेऽन्तरिक्षे च क्षीरे भानौ महेश्वरे।
युग्मं योगे च सत्ये च धर्मे पापविरोधके ।। (148)
रुग्मं सुवर्णेऽग्नौ चापि सूर्ये चन्द्रावतंसके।
तिग्मतीक्ष्णे च सूर्ये च वह्नौ पापात्मके सुरे ।। (149)
हिमं तुषारे पापे च घातुके यमदैत्ययोः।
भीष्मं भयङ्करे शान्ते नवे चन्द्रावतंसके ।। (150)
भीमोऽपि पाण्डवे चित्ते भयङ्करवसन्तयोः।
शामश्शान्ते च नक्षत्रे मधुपेयमदैत्ययोः ।। (151)

मान्ताः

पायुः पाने गले पानदेशे पापात्मनि प्रिये।
वायुर्महेश्वरे वायौ गोमायुर्मृगधूर्तके ।। (152)

36A सिंहे भयङ्करे दैत्ये शङ्करादावपीष्यते ।
आयुरायुष्यमौद्गर्यं जनभान्वापि केषु च ॥ (153)
जरायुरुल्वङ्गर्भाशये चापि कफपार्थसि ।
शयसर्पे च सिंहे च गजे ब्रह्मणि मानुषे ॥ (154)
मयुस्तुरङ्गवदने नावे मन्मथदीपयोः ।
पियुः काले महाकाले गजे कण्ठे च भा····नि ॥ (155)
मृगयुर्व्याधमार्यक्षक्षत्रियेश्वरभानुषु ।
देवयुर्धार्मिके राज्ञि स्यात्केवलयुराशुगे ॥ (156)
मानयुक्ते वरिष्ठे च दासे रम्ये मनोहरे ।
गुह्यायुर्सिंहवाताग्निमुनिसर्पादिके तथा ॥ (157)
मित्रयुर्वत्सले रम्ये मुनौ चन्द्रे च शंकरे ।
अध्वर्युर्याजके सूर्ये चन्द्रे शेखरचित्तयोः ॥ (158)

यान्ताः

कारु इन्द्रे शिल्पिकारे विश्वकर्मशिवादिके ।
दारुः काष्ठे महाकाले भेद्यमात्रे महाकृतौ ॥ (159)
भरुर्भर्तरि धर्मे च स्वामिचित्तखगादिके ।
मरुर्गिरौ जलाभावदेशे दैत्ये च पापिनि ॥ (160)
तरुर्वृक्षे प्लवे मत्स्ये जलजन्तौ सुमोक्षके ।
चरुः पूते च पाके च चरमात्रे रवावपि ॥ (161)
त्सरुः खड्गैकदेशे स्याद्वारबाणे मनोहरे ।
शरुः खड्गे शरे क्रोधे पापिष्ठे दैत्यकीलयोः ॥ (162)
स्वरुर्बाणादिके मेघे सूर्येऽद्रौ घातुकादिके ।
बितभ्रुस्तु पिङ्गले विष्णौ नकुलेऽपि बिडालके ॥ (163)
पुरुस्तु धर्मलोके स्याद्राज्ञि योग्यसमुद्रयोः ।
कुरुर्देशे क्षत्रिये च मुनावेकत्र सुन्दरे ॥ (164)
हरिद्रुवृक्षभेदे स्यान्मृगभेदे खगादिके ।
मित्रद्रुस्तु समुद्रे स्यान्मधुपे यमदैत्ययोः ॥ (165)
36B शतद्रुस्तु नदेऽब्धौ च लवणे यमवारिणोः ।
भीरुस्तु पुरुषे जन्तौ परमात्मनि शङ्करे ॥ (166)
मन्दुरावाजिशालायां मङ्गलादौ फलादिके ।
स्वाप्नलावण्यमार्गादि-शङ्करादि-खगादिके ॥ (167)

वाशुरारात्रिजीमूतझिल्ली - पत्रखगादिके ।
चतुरो दक्षरक्षादि - मुन्यादि - वरणादिके ॥ (168)
चङ्कुरो भूधरे रम्ये मण्यादावपि माधवे ।
अङ्कुरोध्वजजीवात्मबीजभाग्यसुरादिषु ॥ (169)
विदुरो राक्षसे राक्षसभये यमदैत्ययोः ।
मुकुरो दर्पणे मेघे मत्स्ये पुष्पे निमीलिते ॥ (170)
दुर्दुरोऽश्वा च मण्डूकः कामी गोमायुरित्यपि ।
असुरो दैत्यनावाडगदुष्टलोकपुरादिके ॥ (171)
मसुरो धान्यभेदे स्यात्पुण्यस्त्री - परमात्मनोः ।
श्वशुरो दम्पतिपिता रम्यश्चन्द्रशिखामणिः ॥ (172)
इविरोऽग्निमयूरार्यकाममानुषजन्तुषु ।
मदिराभूमिगौरीशसुराकान्तापुरादिषु ॥ (173)
मन्दिरो मेघदेवेशफालाक्षरविभूतिषु ।
चिन्दिरो भानुचन्द्राग्निदिनमूषकजन्तुषु ॥ (174)
छिदिरोऽग्निर्मयूरश्च बलशस्त्रखगादिके ।
भिदिरं वज्रमूर्त्यौ स्यान्मन्दिरं गृहजन्तुषु ॥ (175)
चन्दिरो गजढौकाश्ववनितापालकादिषु ।
तिमिरस्तमसीन्दौ च मेघमानसवारिषु ॥ (176)
मुहिरो मूर्खकामार्यचित्तशम्भुहरादिषु ।
मिहिरस्सूर्यचन्द्राग्निसज्जनार्यखगादिषु ॥ (177)
मुचिरं ज्ञानवैराग्यमोक्षमेघहरादिषु ।
रुचिरस्सुन्दरे चन्द्रे सूर्यादौ परमात्मनि ॥ (178)
37A रुधिरं रक्तमायान्नदैत्यशम्भुसुरादिषु ।
उशिरस्सूर्यचन्द्राग्नि भोजनार्थखुरादिषु ॥ (179)
अजरं वायुमातङ्गप्राङ्गणादिषु शङ्करे ।
शिशिरं ऋतुदध्यन्नहिमचन्द्रादिके हरे ॥ (180)
सेनानिवेशस्थाने तु शिविरं याचकांशुषु ।
स्फीरं गंभीरमातङ्गबहुसाधनजन्तुषु ॥ (181)
खदिरः खाद्यमात्रे स्यात्खदिरे मांसजन्तुषु ।
कठोरं कठिने नीचे दरिद्रेऽपि पिशाचके ॥ (182)

चकोरः पक्षिबाणार्थघातुकाम्बरशम्भुषु ।
किशोरोऽश्वेऽपि बालेऽपि चन्द्रशम्भुसुरादिषु ॥ (183)
है राशि न निमित्ते स्यात्सन्मार्गे साधुसम्मते ।
मयूरः पक्षिसर्पाग्निसूर्यदैत्यविरोधिषु ॥ (184)
कशेरुर्घातुकादौ स्यान्मयूरे परमात्मनि ।
स्फारस्समुद्रे संघाते तक्रं तक्रे मृदादिषु ॥ (185)
शक्रो देवेन्द्रमातङ्गराजशम्भुभवादिके ।
क्षिप्रं तीव्रे च सामुद्रे लवण मूषकादिषु ॥ (186)
क्षुद्रो दिने पिशाचे च राक्षसादौ हरादिषु ।
सुप्रश्चन्द्रे सुरादा च मनुष्यादौ मनादिके ॥ (187)
तृप्तश्चन्द्रे पुरोडाशे चोदने भक्ष्यमात्रके ।
दृप्तस्तु दर्पणे चन्द्रेऽप्याचार्ये शङ्करे भवे ॥ (188)
पन्द्रस्तु पूजके दैत्ये दासे शम्भौ कुमारके ।
समुद्रो मत्स्यहन्ता स्यात्सरित्पतिहरादिके ॥ (189)
श्वित्रं वर्णे कुष्ठभेदे साम्बमूर्तौ च मातरि ।
वृत्रस्तु दैत्ये दीने च पापकारादिके तथा ॥ (190)
वीरस्तु निर्जले पद्मे ग्रामे वरादिके तथा ।
भद्रं देशे मङ्गले च राशि माधवशम्भुषु ॥ (191)
मुद्रा तु मुद्रिकास्वर्णं जरा रजितमेव च ।
खिद्रो रोगे च सूर्ये च चरादौ मदिरादिके ॥ (192)

37B छिद्रस्तु दासे चापेऽपि माधवादौ कुमारके ।
मन्द्रस्तु गम्भीरमृतशम्भुमाधवकम्बुषु ॥ (193)
चन्द्रस्सोमे रमायां च रमण्यां भक्तवत्सले ।
सूर्येऽग्नौ माधवादौ च महिष्यादावपीष्यते ॥ (194)
दहन्देवे रवौ वह्नौ फालाक्षे कुपितादिके ।
दस्रस्तुरङ्गमेरश्यावश्वनीदेवतान्तरे ॥ (195)
दभ्रस्समुद्रेऽप्यल्पेऽपि नीचमाधवशम्भुषु ।
उस्रस्तु किरणे चन्द्रे गविरामादिके तथा ॥ (196)
वाभ्रस्तु रोगे सैन्ये च संसारे परमात्मनि ।
शिरश्शिरसि सर्पादौ बुद्धिहीनमुखादिषु ॥ (197)

हस्रस्तु दैत्ये गोविन्दे शङ्करे माधवादिके ।
उपद्रवे च सिद्रस्तु साधौ शङ्करभानुषु ॥ (198)
शुभ्रश्शम्भौ शोभने च समीचीनेऽपि माधवे ।
निद्रा निद्रामन्दमाया दैत्यमाधवशम्भुषु ॥ (199)
चुक्रस्तु तिन्त्रिणिफले सुधाम्रवदनादिके ।
रम्रो रम्ये विनाशेऽपि विकस्रश्चन्द्रसूर्ययोः ॥ (200)
आम्रश्चूते रोगयुक्ते दीने मन्दादिके मधौ ।
ताम्रौ दयायां नक्षत्रे दैत्ये सेर्ष्ये हरादिके ॥ (201)
शूद्रोऽन्त्यवर्णे दीने च वह्नौ मायादिके मधौ ।
दूरं गतौ महादेवे मनुष्यादौ भवादिके ॥ (202)
रुद्रः प्रचण्डे फालाक्षे निर्दुःखे ज्ञानिसूर्ययोः ।
जीरोऽग्नौ वरुणे बाणे वृद्धापश्वे महेश्वरे ॥ (203)
सुरा तु मदिरा देवास्सूरस्सूर्ये महात्मनि ।
गृध्रस्तु कामुके चन्द्रे सेवे मानुष्यवित्तयोः ॥ (204)
शूरस्समुद्रे वीरे च चीरं वल्कलमांसयोः ।
मीरस्समुद्रे पापे च कामुकादौ हरादिके ॥ (205)
विध्रन्तु गगने भानौ चन्द्राग्निशिवभानुषु ।
38A वध्रस्तु चन्द्रे बाले च वप्र प्राकारगेहयोः ॥ (206)
भुभ्रः कामे च चित्ते च कामुकादौ खगादिके ।
न्याये महेश्वरे भानौ वसिष्ठादावपि स्मृतः ॥ (207)
अभ्रस्तु दैत्ये मायायां पापात्मनि बहुश्रुते ।
वज्रश्शुक्रायुधे रत्ने बाणादौ मानसादिके ॥ (208)
विप्रो ब्राह्मणमायूरनेत्रमाधवशम्भुषु ।
कुप्रः कोपकरे शम्भे दैत्ये दारुणकर्मणि ॥ (209)
चुप्रो जगरपक्ष्यादि मयूरादिहरादिषु ।
खुरस्तु खड्गे बाणे च पतङ्गादिरवादिके ॥ (210)
खुरः खड्गे भटे सौख्ये कल्याणे चन्द्रशेखरे ।
भद्रं तथैवमानाथ बह्मचन्द्रभवादिके ॥ (211)
उग्रश्शम्भौ प्रचण्डे च मिलिते माधवे रवौ ।
भेरो भयङ्करे शम्भौ ढक्कादुन्दुभिमादिषु ॥ (212)

शुक्रो ग्रहे रेतसि च वर्णे च परमात्मनि ।
शुक्लोऽपितादृशार्थस्स्यात्किञ्च सर्वार्थकोऽपि च ॥ (213)
गौरो वर्णे युद्धकारे सत्प्रयत्ने हरादिके ।
इरा भूम्यां महादेवशक्तिमाधवगौरिषु ॥ (214)

इति रेफान्ताः

आलुर्गजे महाश्वेते रामागमनशीलयोः ।
हिलुर्जाले समुद्रे च मायावरिहरादिषु ॥ (215)
मालुर्गन्धे च मालायां वस्त्रादौ रमणीमुखे ।
सलिलं जलवाय्वग्निमायावारिधिजातिषु ॥ (216)
कलिलं गगने तोये गहने संघबालयोः ।
अनिलो वायुमातङ्गशंकरादिभवादिषु ॥ (217)
भण्डिलो माधवे धूर्ते परिहास्ये शुभादिके ।
भटिलो भृत्यमातङ्गवामनाचार्यबन्धुषु ॥ (218)
शण्डिलो रोगयुक्ते स्यान्मुनौ मूर्खेऽसतीर्थयोः ।
38B पिण्डलो गगने स्थूलजंघे माधवचन्द्रयोः ॥ (219)
तुण्डिलो माधवे शिष्ये बहुभाषिणि शङ्करे ।
कोकिलः कलकण्ठे स्यान्मधुरे भोज्यवस्तुनि ॥ (220)
भविलस्तु गृहे रम्ये कपिभर्व्यविभूतिषु ।
कपिलो वर्णभेदे स्यान्मुनौ मारशिवादिषु ॥ (221)
त्रिपला मेघपुष्पादि लतादि खदिरादिषु ।
कमलं गगने तोये मण्डलं चन्द्रभूषयोः ॥ (222)
कुण्डलं कर्णभूषायां सूर्यादौ पर्वतादिके ।
शबलो वर्णभेदे स्यादाक्रोशे माधवादिषु ॥ (223)
वृषलो नीचपापीठवहिष्कृतहरादिषु ।
देवलो मुनिदेविग्य जनमाधवचोरिषु ॥ (224)
मलं पापे च किट्टे च मसूरादौ हरादिके ।
चपलश्चञ्चले चित्ते माधवे वाहनादिके ॥ (225)
शमलं शान्तवैराग्या शुचिचित्तसुरादिषु ।
भ्रमलो नेत्ररोगे स्यान्नेत्रे चित्तेऽनवस्थिते ॥ (226)
मुसलो दण्डशम्भुरु कुरु देवमहिन्दुषु ।
स्यालं तु भाजने चित्ते मोक्षे वैराग्यचिह्नयोः ॥ (227)

चात्वालं पात्रभेदे स्याद्याचके देवतादिके।
पातालं चरमात्रे चाप्यधोलोकेऽनवस्थितौ ॥ (228)
चण्डालः क्रूरकर्मा स्याच्छङ्करो दैत्यसर्पयोः।

इति लान्ताः

पृथिवी भूमिगौरीशवसुदानमुखादिषु ॥ (229)
अश्वस्तु रङ्गमे मेघे चन्द्रमादौ खगादिके।
पुष्वो वराहे दैत्ये च वह्नौ सूर्यादिके परे ॥ (230)
लट्वा बाल्ये मुरारौ च मूर्खे चण्डविरुद्धयोः।
कण्वो निमीलिते चित्ते मुनौ माधवदेवयोः ॥ (231)
खट्वा तु शयने रामे रमायां मारुतादिके।
39A विश्वं गृहे रमण्यां च वनादौ जगदादिके ॥ (232)
रुष्वो पांसुः पतङ्गादौ लष्वो नर्तकमानुषौ।
शिवं क्षेमे मङ्गले च पद्मा भूमिकुसुलयोः ॥ (233)
प्रह्वेऽनुकूले रम्ये च इष्व आर्ये मनोहरे।
शिवलिङ्गाकृतौ स्थाणौ मुनिसर्पशिलादिषु ॥ (234)
यह्वा बुद्धौ शिवे ग्रामे गौर्यां माघवभूमिषु।
सङ्गते करणे दाने मनुष्यादौ भवादिके ॥ (235)
जिह्वा ज्वाला च रसना खङ्गादिः कामभूभृतौ।
ग्रीवागलश्च चतुरो याचको वारिधी रविः ॥ (236)
भामीवा गगने तोये शङ्करादौ भवादिके।
कर्वो गर्वे वायुसर्पसूर्याग्निशिवभानु च ॥ (237)
गर्वोऽभिमाने धिक्कारे राक्षसादौ हरादिके।
शर्वश्शङ्करदैत्येन्द्रो विष्णुमायाविभूतिषु ॥ (238)
दर्वः कन्याराक्षसश्च परश्वादौ सुरादिके।
धन्वा निर्जलदेशे स्यात्कठिने रौद्रचित्तयोः ॥ (239)
ध्रुवा गृहे रमण्यादौ वसिष्ठादौ हरादिके।
देवादेवे प्रभायुक्ते सूर्यादौ मरुतादिके ॥ (240)
श्वा खङ्गे च वराहे च शुनके मानसादिके।

इति वान्ताः

आशुस्सूर्ये मनुष्ये च वाय्वादौ वरुणादिके ॥ (241)

जलादौ हिमहेमादौ खड्गादौ सवनादिके ।
शिशुर्बाले कुमारे च बालवृक्षादिके हरौ ॥ (242)
द्रशुस्सूर्ये कठोरे च रम्ये शङ्करमूलके ।
पशुर्ग्राम्ये नाशके च मृगादौ कठिनादिके ॥ (243)
हिंशुः पापे रजः कान्तिलेशादौ मरुतादिके ।
परशुस्तु कुठारे स्याद्धिस्त्रादौ राक्षसादिके ॥ (244)
आविषस्तु समुद्रे स्यादुत्तरिक्षे शिवादिके ।
39B महिषी राजपत्नी स्याद्राक्षसे पशुमुख्ययोः ॥ (245)
आमिषं भक्ष्यमात्रे स्यादध्वरे कुटिलादिके ।
रौहिषो बीजमातङ्गलतामृगहरादिषु ॥ (246)
तविषस्ताविषश्चापि देवकन्याहरिद्रयोः ।
भूम्यां स्वर्गे महादेवे परमात्मनि भासुरे ॥ (247)
स्यादप्यधिष आदित्ये सुखे स्वर्गे शिवादिके ।
भूम्यां निशायां वन्ध्यायां रमागौर्योश्च रागिणि ॥ (248)
किल्बिषं गगने तोये देवेन्द्रादौ रमादिके ।
पामरे परशौ जन्तौ वरुणादौ हरादिके ॥ (249)
असुः प्राणे महाकाले दैत्ये मूर्खे विकारिणि ।
वसुद्रव्ये महेन्द्रे च भवादौ शङ्करादिके ॥ (250)
कासूर्बुद्धौ गवाध्यक्षे विकलाङ्गे च पातिते ।
सूर्यादौ मानसादौ च खगादौ गरुडादिके ॥ (251)
राहुर्ग्रहे राक्षसादौ दुरितादौ भवादिके ।
स्नेहुर्मित्रे च रोगे च मलिने माधवादिके ॥ (252)
यक्षस्तु भक्षके दैत्ये देवयोनौ सुरादिके ।
पक्षस्समर्थे शारादौ देवादौ शङ्करादिके ॥ (253)
एवं रूपार्थविन्यासा वैखरी सम्प्रदर्शिता ।
लिङ्गार्थादि विभागस्तु तत्तद्योग्यं समुन्नयेत् ॥ (254)

इति श्रीकालिदासमहाकविविरचिते नानार्थ-
शब्दरत्ने कादिक्षान्तवर्णाद्यन्तार्थवच्छब्द-
प्रकरणे एकैकधात्वर्थविचाररमणीये
प्रथमं निबन्धनम्

—: o :—

40A कर्कोऽग्नौ दर्पणे वैद्ये बालभावयुतेऽपि च ।
श्वेताश्वे शास्त्रकारे च महादेवे विभावसौ ॥ (1)
चन्द्रे विष्णौ महाकाले विषवैद्ये सुयोधने ।
मायूराङ्गे प्रतारे च सोधादौ मरुदादिके ॥ (2)
दाकस्तु यजमाने स्याद्दानशीले महाक्रतौ ।
जारे महेश्वरे चोरे चन्द्रे शाकान्तरे मृते ॥ (3)
ब्राह्मणे बडबाग्नौ च गजादौ दानवादिके ।
धाकस्तु वृषभे मृत्यौ स्वरूपादौ मरुस्थले ॥ (4)
वैरानुबन्धे चतुरे गोपाले परमात्मनि ।
अन्ने पाचकभेदे च परं ज्योतिषि भास्वरे ॥ (5)
महितादौ करिण्यादौ महिषादौ सुरादिके ।
राका तु पौर्णमास्यां स्याज्जलूकायां मृतादिके ॥ (6)
वरहादौ वसिष्ठादौ पुरो भागादिवर्तके ।
आतपे चतुरे रोगिण मोहितादौ शिवादिके ॥ (7)
अर्कस्सूर्ये महाकाले चन्द्रे विष्णौ मधुव्रते ।
शिवादौ जतुकादौ च मन्दादौ मरुदादिके ॥ (8)
कल्कः परंतपे मृत्यौ विहारादौ विरोचने ।
विभावादौ महेशादौ परमात्मनि चित्तके ॥ (9)
सृकस्तु गरले वायौ महादेवे क्रतावपि ।
निरामये द्विषच्छक्रे फलाक्षे बन्धिते मृते ॥ (10)
सरटादौ मृगादौ च नद्यादौ पर्वतादिके ।
वृकश्वरावेऽप्यादित्ये श्वापदे मरुदन्तरे ॥ (11)
महिषादौ विरूपादौ दीपादौ ज्योतिरादिके ।
भूकश्छिद्रक्रियाकाले चित्रे चित्राङ्गनादिषु ॥ (12)
भूम्या महत्त्वे नद्यादौ नागादौ गगनादिके ।
किष्कुः कदल्यां मेघे च धनञ्जयवसन्तयोः ॥ (13)
40B वायौ दयायुते श्रेष्ठे सूर्यकान्तदुरात्मनि ।
कठिनादौ कठोरादौ वनितादौ प्रभाकरे ॥ (14)

मुष्कोधिके च वृषणे वृक्षके पापकर्मणि ।
मूर्खादौ भूभृदादौ च वरेण्यादौ च भूपतौ ॥ (15)
शुकस्तु वानरे दैत्ये पक्षिभेदे पवावपि ।
शुकपुत्रे करीरे च कुलकादौ परात्मनि ॥ (16)
वल्कं पश्वण्डके पुत्रे मात्सर्ये वारिदेच्छले ।
महितादौ वरेण्यादौ महिष्मत्यादिकेऽपि च ॥ (17)
उल्कः पिशाचे वैद्ये च वानरादौ निशाचरे ।
अग्नौ महात्मनि प्रेते वाय्वादौ मरुदादिके ॥ (18)
एकः संनहने बिल्वे दैत्यान्तरमहेशयोः ।
संख्याभेदे प्रधाने च नरवाहन इत्यपि ॥ (19)
नारायणे परायत्ते वैद्युतादौ विरोचने ।
भेकस्तु वारिदेवायौ परमात्मनि पूरुषे ॥ (20)
वरेण्ये वमनादौ च वरुणादौ महेश्वरे ।
काकस्तु दैत्यभेदे स्यात्पक्षिभेदेऽपि वायसे ॥ (21)
विषवैद्ये महासत्वे कालकूटे पुरादिके ।
अत्कश्चन्द्रे महादेवे परमात्मनि भञ्जने ॥ (22)
पुरुहूते परंज्योतौ खट्वादौ काञ्चनादिके ।
मर्कस्तु चतुरे वैद्ये पूतकर्मणि गोपुरे ॥ (23)
पुरीषे महितादौ च मरणादौ पुरातने ।
नीहारो मारुते पुष्पयुते पुष्करवर्णके ॥ (24)
गोधायाममले पूर्णे मदनादौ महोत्पले ।
शमीको वल्मीके मोहकारणि पुण्यकर्मणि ॥ (25)
परमात्मनि मूल्ये च परं ज्योतिषि पूरुषे ।
परुषे पामरे नीचे महेशादौ प्रदातरि ॥ (26)
41A यूका वराहे तैले च परमात्मनि मारुते ।
पुरुषे मेघवरजौ राजित्ये कुटिलात्मनि ॥ (27)
नीरे कुलिरे काकोले बडवाग्नौ सुरादिके ।
धूका तु कंपने वायौ भीकरे विषदातरि ॥ (28)
परिपूर्णे मनोज्ञे च महितादौ जलाशये ।
निकावतारे वेरे च वरणादौ सुखादिके ॥ (29)

वासन्त्यां चन्द्रमकुटे पुलाके कोकिलादिके।
प्राकं विरोधे वैराग्ये वारिदे मूर्खबालयोः ॥ (30)
पीतने च रथे कूले महिष्यादौ च माधवे।
कठाकुः कुटिले सर्पे दरिद्रे यमदैत्ययोः ॥ (31)
विरूपाक्षे कटोले च पतगे परमात्मनि।
रावणे देवहरणे यज्ञवैरिणि गोपतौ ॥ (32)
सुरादौ पद्नादौ च मनोज्ञे महितादिके।
कुपाकुरग्नौ कल्लोले पूतात्मनि पुरोहिते ॥ (33)
आदित्ये मकराक्षे च मनोज्ञादौ जगत्पतौ।
पृदाकुर्वृश्चिके सर्पे सरले संयुते दिवि ॥ (34)
परमात्मनि बाह्ये च पुरादौ मरणादिके।
शयनकश्च रमणे महिते मसुरेऽपि च ॥ (35)
निद्रायुते महिष्यादौ घर्घरे मुदिरादिके।
भयानको विरूपे स्यादसारे मधुसूदने ॥ (36)
महेश्वरे च मदने मारुतादौ विलोडिते।
लवानकं दरिद्रे स्याद्दात्रे लूता हरिद्रयोः ॥ (37)
मूषके मुदिरे मेघे सुरूपादौ सुरादिके।
पूतात्मनि पुराणे च मर्दिते विरुतादिके ॥ (38)
धानकं धमने द्रव्ये पूतात्मनि मरुस्थले।
सचिवादौ वरेण्यादौ पुरुहूतादिकेऽपि च ॥ (39)
उल्मूकं विमलद्रव्ये पायसे चैत्यभेदके।
अलाते परमेशे च परिपूर्णे शिवादिके ॥ (40)
41B वर्तिका वमने रम्ये मनोज्ञे मदनालये।
लेखोपकरणे चित्ते वाविले निरुपद्रवे ॥ (41)
कृत्तिकानक्षत्रदैवदैत्यनारादिकेऽपि च।
वरानुबन्धे चतुरे कुण्डादौ गोलकादिके ॥ (42)
भित्तिका तु शिशिरे स्यादसारे गुरुकारके।
कुठारे गोकुले पुरे पूले विषाणे देवतालये ॥ (43)
स्वरूपादौ विचारादौ विमानादौ कठोरके।
लत्तिका वलने मेघभेदे मूले विरोचने ॥ (44)

महादेवे परात्मादौ मुष्कादौ परिचारिते ।
वृष्टकाधान्यभेदे स्यादसारे मधुदैवते ॥ (45)
मृद्धिकारे वराहे च महिषादौ मनोहरे ।
अष्टका पितृकार्ये स्यादविद्या मूलकर्मणोः ॥ (46)
खमिन्द्रिये महासत्त्वे वरुणे यमदैत्ययोः ।
स्वर्गे खड्गे पुराणे च वैराग्यादौ च शंकरे ॥ (47)
यवागूः पुत्रिकायां स्यादसारे वैद्यमूर्खयोः ।
प्रभावयुक्तिचतुरे गोकुलादौ सुरादिके ॥ (48)
शघः पूतात्मनि प्रेते देशान्तरविनिद्रयोः ।
कूश्माक्षे गोविशेषे च चन्द्रे लोकान्तरादिषु ॥ (49)
शार्ङ्गस्ते प्रक्रियाकारे मदनाख्यौषधेऽपि च ।
परिपूर्णे विहारादौ विरोधादौ शिवादिके ॥ (50)
पचुः पुच्छे पुण्यकरे महिषो भेदकारयोः ।
महात्मनि प्रयुक्ते च सूत्रादौ वनितादिके ॥ (51)
विच्छस्तु पूतनादौ स्यान्मुनिचन्द्रे विरोधके ।
श्वाखिदे परिपाके च परमात्मादिकेऽपि च ॥ (52)
यज्युः पुरातने चित्ते वित्तनाथे प्रजापतौ ।
चन्द्रशेखरवैराग्यमहोदधि भवादिषु ॥ (53)
42A चिरुतादौ विशेषादौ भूम्यादौ मारुतादिके ।
मजझस्तु माधवे मत्स्ये परं ज्योतिषि पूरुषे ॥ (54)
विभावसौ विरुद्धादौ मरादौ भावनादिके ।
लोष्टः पुरातने सर्पे मधुपे परमात्मनि ॥ (55)
मये यमे महाकाले चतुरादौ नरादिके ।
पिठस्स्वरे परेण्ये च कुमारे याजकद्विजे ॥ (56)
यजमाने मनोज्ञे च भवादौ वारिदादिके ।
मृडश्शर्वे मधुद्रव्ये मांजिष्ठे प्रणतादिके ॥ (57)
पुण्यनाथे प्रकोर्तादौ प्रमाणे मूलकारणे ।
विधः प्रचण्डे खद्योते विपरीते प्रमर्दके ॥ (58)
प्रणुते रविवारे च विकारिणि मदादिके ।
कृष्णाप्रपञ्चिते मुख्ये प्रचुरे भास्वरेऽपि च ॥ (59)

वर्णभेदे वरेण्ये च मृगान्तरविशेषयोः ।
मासे नारायणे मूर्खे वैनतेयजलादिके ॥ (60)
लक्षणं नाम्नि देहे च परमात्मनि चन्द्रके ।
ज्योतिर्व्रते प्रपन्ने च प्रचुरादौ प्रभद्रके ॥ (61)
द्रोणोऽश्वत्थाम, पितरि प्रभद्रकविलीनयोः ।
परिमाणान्तरे मुख्यकार्यके चन्द्रमस्यपि ॥ (62)
विवाहिते प्रपूर्णे च महात्मनि पुरादिके ।
धनुरभ्यासयोग्ये च वरिते परिणाहिते ॥ (63)
तृष्णा पिपासा वैराग्यमनोज्ञवनितादिषु ।
प्रबलातुरपूर्णांशुपातालप्रणतादिषु ॥ (64)
शुष्णः प्रपञ्चे वैद्ये च मत्स्यादौ मरुदादिके ।
सूर्यादौ सूपकारादौ चतुरादौ ज्वरादिके ॥ (65)
विष्णुर्वरेणे शास्त्रज्ञे सङ्गीताश्रयवारिषु ।
प्रपन्ने प्रस्तुते शब्दे वैरोचनि पुराणयोः ॥ (66)
दिष्णुः परं परायातप्रभुः प्रणतसारिषु ।
42B पिपासातुरवैमाननेत्ररोगप्रभादिषु ॥ (67)
अक्षणस्तुषे खण्डके च खण्डे पूतात्मजंतुनोः ।
मणिप्रभादौ मन्दादौ कलविङ्कादिकेऽपि च ॥ (68)
स्याणुस्तु शङ्करे दैत्ये वीरभद्रे विरोधके ।
रावणादौ महात्मादौ निश्चलादौ द्रुवादिके ॥ (69)
वेणुश्शलाका वैराग्ययुक्तवंशादिकेऽपि च ।
दौत्यादौ देवतानाथे नारदादौ विरोचिषि ॥ (70)
वेणुप्रमोदिते पूते शरीरे चतुरादिके ।
नद्यादौ नरवाहादौ गजादौ च महेश्वरे ॥ (71)
वेणुः पुरातने सूक्ष्मेऽपि रागे पांसुले क्रतौ ।
विष्णुर्नारायणे पूर्णे मधुसूदनवारिणोः ॥ (72)
शम्याकादौ शुभाङ्गादौ वृद्धदेवादिकेऽपि च ।
नारायणो मुनौ दैत्ये गानान्तरविशारयोः ॥ (73)
मनुष्यादौ महेशादौ मत्स्यादौ वारिदाधिषु ।
करुणा नरकेयानेऽप्यद्वये मूके दयावति ॥ (74)

दयादौ रमणादौ च दानवादौ विभावसौ ।
गरणो दारुणे क्रूरे चैत्यप्रासादमालयोः ॥ (75)
पादुकादौ पुराणादौ वरेण्ये परमात्मनि ।
तरुणः शङ्करादौ स्याद्धर्मे मौनीन्द्रचन्द्रयोः ॥ (76)
क्षुधा ते यौवनयुते चतुरे परमात्मनि ।
अरुणश्चन्द्रपाषाणसूर्ये सारथिभूतिषु ॥ (77)
कान्तिकल्याणवैशाखपरादौ मनुजादिके ।
धरुणो वरुणे सूरौ जन्त्वादौ पनसादिके ॥ (78)
काकुमारे विधिप्रायकायपूतादिकेऽपि च ।
वरेण्यश्शङ्करादौ स्याद्वरुणादौ विलोलिते ॥ (79)
वप्रादौ परमात्मादौ परमार्थे विरोधके ।
43A अरण्यं मानसे वायौ खड्गादौ सरितां पतौ ॥ (80)
गहने वैरभेदे च बाणादौ वपनादिषु ।
शकुन्तश्च शकुन्तिश्च मारुते महितादिषु ॥ (81)
मधुरे पारये सूरौ पतङ्गादौ महेश्वरे ।
हस्ते नक्षत्रभेदे स्यादाचार्ये युद्धदुर्मदे ॥ (82)
वरुणे चरदैवे च मणे मोहक्रियादिषु ।
करुणादौ करादौ च वालादौ च महिम्नि च ॥ (83)
मत्कः पुरीषे मनुषे पुण्डरीकाक्षपुष्कयोः ।
वराहे दन्तदीनारचरमार्कक्रियादिषु ॥ (84)
गर्तश्चरवणे मूर्छावलग्नादौ विशेषके ।
कुरङ्गादौ वसिष्ठादौ पूलादौ च महोत्पले ॥ (85)
रातस्समरदेवाण्डजातभेदमुरादिषु ।
वार्ता' पिशाचमातङ्गमारुताहारकादिषु ॥ (86)
अन्तो मृत्यं प्रभाहीननाशनायासकादिषु ।
दन्तोऽम्बुजे कुलीरे च कुञ्जे कुन्ते जगद्गुरौ ॥ (87)
रदने द्विविलेतैलपक्वभेदार्यमादिषु ।
लोतः खड्गादिके वायौ पुन्नागे परमात्मनि ॥ (88)
असृकालेभलीने च सुरपूज्यादिकेऽपि च ।
पोतोऽभिशायके पूज्ये पात्रभेदे परात्परे ॥ (89)

बाले विलीनेऽभिज्ञे चानभिज्ञे विरुतादिषु ।
धूर्तशठे कुमारे च दुस्पूरे वरुणादिके ॥ (90)
ततं वाद्यादिके भानौ पुन्नागप्रलयादिषु ।
व्याप्तवीरुद्विरुद्धाश्वपूर्णकुम्भादिकेऽपि च ॥ (91)
मृतः जीवितनाशे स्याद्विपर्यासार्यभूतिषु ।
भक्तं विरुद्धदेवेन्द्रघत्समत्स्यादिकादिषु ॥ (92)
दूतः प्रचण्डमार्तण्डसन्धिविग्रहकारकाः ।
विरूपाक्षप्रभाकारमैरावणविभाकराः ॥ (93)
43B तातास्तरुणपूत्कारवायुजन्तुकुलादिकाः ।
प्रचुराचारवैराग्ययोगवेनसुतादिकाः ॥ (94)
फलितं चरुभेदे स्यादाकाराकृतिभाविषु ।
पाण्डुकेशादिके चित्ते दलद्रव्ये वरादिषु ॥ (95)
हरितो वर्णभेदे स्यादसारे कुटिलादिके ।
रोहितो वारुणच्छत्रमत्स्यमारुतभाविषु ॥ (96)
पिशतश्चश्चलाद्दीनवारिजातप्रभादिषु ।
मांसमाहिष्यदेवेन्द्रकर्णभूषणदेहिषु ॥ (97)
भरतो राजदेवेन्द्रशम्भुमाधवनादिषु ।
चन्द्रसूर्याग्निकान्त्यार्याभ्रमाणान्तरकादिषु ॥ (98)
यजतोऽग्निप्रभापूर्णकोमलप्राणरादिषु ।
पचतः पृथुले काले मृत्यौ प्रद्योतनादिके ॥ (99)
अमरश्चश्चले नीरे चमत्कारादिकेऽपि च ।
वय्यतः पर्वते वज्रे विमलादौ शरादिके ॥ (100)
खलतं संशये वित्ते शौर्ये दानवनादिषु ।
शयथस्सर्पजलजमीनप्राणाकरादिषु ॥ (101)
शपथश्चन्द्रकुल्माषपोलकादिषु पूरुषे ।
रवथश्चरणे कुम्भभेदे पुण्यकरादिषु ॥ (102)
गमधः पण्डिते मूल्ये विशाले वैद्युतादिके ।
पञ्चधः पिशुने पूर्णे वनिताभूतराजके ॥ (103)
जीवधः कोकिले फेने मरुद्वृन्दे वरादिषु ।
प्राणधस्सोमविष्णिवन्द्रशम्भुमारुतवाजिषु ॥ (104)

स्यादावसथश्चर्वंमूकभरादिषु ।
शमधः कुटिलाचारशमपूर्णादिकेऽपि च ॥ (105)
दमधः परमार्थे स्याद्विद्याकारकादिषु ।
भरथश्चन्द्रशम्भ्वर्कवह्निजन्त्वादिकेऽपि च ॥ (106)
44A रुवथश्च कुक्कुटश्च मारुतः पशुराशुगः ।
सुधः परम्परायातवैरशामकदादिषु ॥ (107)
प्रद(ध?)श्चतुरवैय्याघ्रचन्दनाचलतन्तुषु ।
विधस्सुभाङ्गमालूरविमलप्राणधारिषु ॥ (108)
मुधः पाहलारतालपौरपुत्रमुखादिषु ।
इनस्सूर्ये नृपे दैत्ये ईश्वरे परमादिषु ॥ (109)
सिनं शरीरे पोतादौ सूनृते विकचादिके ।
ऊनं शान्तेऽप्यपूर्णं च विशालादौ विलोचिते ॥ (110)
फेनश्चरुविशेषे स्यादाविले विमलादिषु ।
मीनो मत्स्ये पृथुद्रव्ये कोकिलादौ विचोरके ॥ (111)
धानाः प्रचण्डभृष्टान्नतण्डुलादि मरुस्थले ।
पन्नं विचित्रे द्रव्ये च विपुलादौ महेश्वरे ॥ (112)
अत्नं वयस्के गोपाले दैवे चित्तादिकेऽपि च ।
कर्णं फलित्रे चलिते रोगार्तिवैद्युतेऽपि च ॥ (113)
श्रोत्रे दारगृहीते च राजपूरुषजन्तुषु ।
धेनस्सुमुद्रे वदने वरदे पुण्यकारिणि ॥ (114)
शङ्करे करुणाकारे माहिष्यादिक्रियाकरे ।
सूना दुहिता दीना वनिता मद्दतादिषु ॥ (115)
स्तनयित्नुर्मुकुन्दाङ्घ्रिवरुणालयमादिषु ।
पोषयित्नुः कोकिलाक्षिपूर्णमारुतवेणुषु ॥ (116)
गादयित्नुः पुष्पवासवकुलाम्बरशम्भुषु ।
मादयित्नुर्वसिष्ठा .... चन्द्रदेवार्यभूरिषु ॥ (117)
कृत्नुर्विश्वप्रिये शिल्पिविश्वकर्मादिकेऽपि च ।
उपमात्नुर्मरीच्यत्रिव्याधिप्रवरणादिषु ॥ (118)
जगत्नुः प्रलयाभासदेवेन्द्राग्निसुरादिषु ।
वग्नुर्विरोचने वैन्ये मुकुन्देऽप्यद्रिभेदके ॥ (119)

44B वाचालके मदस्रावगजे प्रव्राजितादिषु ।
क्षुधुनश्चतुरे म्लेच्छे व्याघ्रादौ शङ्करादिके ॥ (120)
पयसं मत्स्यदेवाण्डवारिणाधार्यकारिषु ।
यमुनश्चतुरे शान्ते दुर्विनीते प्रियेऽपि च ॥ (121)
नदीपर्वतकालिङ्गशिशुपागोविभूतिषु ।
वेतनं वितसश्चापि भृतदानादिधेनुषु ॥ (122)
पापश्चराले माङ्गल्ये वितुन्ने परमार्थके ।
दुर्विनीतेऽपि किट्टेऽपि वामनादौ वनादिषु ॥ (123)
मेपः पुरोहिते दाने मारुदे ध्वनदम्बुदे ।
विष्पः कूपे दुराचारे विरुद्धादौ परादिके ॥ (124)
व्युपो वायौ परानन्दे चन्दने वामनादिषु ।
स्तूपो विरूपे खड्गादौ वनितादौ विरोधके ॥ (125)
सूर्पः प्रलयगेहाङ्गप्रमाणपटहादिषु ।
खिट्वश्च वारिदे बाले दुर्विनीते वृकादिके ॥ (126)
तल्पं कलत्रे देवेशे मानवादिषु भूतले ।
सर्षपश्चर्वणद्रव्यभेदे मारुतदेवयोः ॥ (127)
ओषधिद्रव्यमालूरचन्द्रवारिधि(द?)भूमिषु ।
डषपश्चन्द्रमकुटे सूर्ये चन्द्रेऽन्धकारके ॥ (128)
कुटपः प्रस्थतुर्यांशमणिमालादिकेषु च ।
दलपश्शाश्वते पूर्णे माधवे मदनादिके ॥ (129)
कच्छपश्चटुले मान्ये प्रमाणे देवतादिषु ।
कुणपस्तु शवे नीचे बहुभक्षकजन्तुषु ॥ (130)
उलपः पट्टणे शैले तृणमूलप्रभादिषु ।
रेफश्शरीरे मरुदे भूभृतौ परमेश्वरे ॥ (131)
माधवादौ मदारातिजलशर्मसुरादिषु ।
45A रिबः प्रलयकाश्मीरपुलकामलवारिषु ॥ (132)
अब्बशरावे महिते जलजे चैत्यपूलयोः ।
दल्भश्चर्वमहीपालवामनाचार्यवीथिषु (133)
दर्भः प्रबलनीवारकुशचीनादिकादिषु ।
अर्भश्शिशौ महाकालकोकिलालकबन्धुषु ॥ (134)

गर्भः कुक्षिपुराणार्यराजभूजादिकेऽपि च ।
करभश्चोष्ट्रपातालहस्तप्रान्तार्तवादिषु ॥ (135)
शरभश्चशिकल्याणमारुतार्यमृगादिषु ।
शलभः कपिचण्डालपतङ्गप्राणवादिषु ॥ (136)
कलभः पृथुदेवेन्द्रकरिपोतादिकेऽपि च ।
गर्दभो गार्दभोऽपि स्याद्चातुर्यक्रियाकरे ॥ (137)
खरे वराहे मेघेऽब्धौ दुष्पूरुषहरादिषु ।
ऋषभो गोपवनिता गोपतीश्वरदेहिषु ॥ (138)
वृषभश्चतुरे गोर्दे गोपतौ पवनादिके ।
लुशभो मातुलुङ्गे स्याद्गजेऽश्वे प्रणतादिषु ॥ (139)
रासभः पुण्यकरणपूर्णजन्तुपरादिषु ।
सुमश्शारीरपुष्पाण्डवृषवारिददेहिषु ॥ (140)
मध्यमश्चमवे दक्षे महादेवे भवादिके ।
भवाय्यो यज्ञभागे स्याद्यागपश्वादिकेऽपि च ॥ (141)
मधुपे माधवे शम्भौ कुलिरे पावनादिके ।
दक्षाय्यो ग्रन्थचातुर्यपूरुषाभ्रखगादिषु ॥ (142)
दधिषाय्यः पयः पूरे घृते मुद्गविरुद्धयोः ।
पूरुषेव मितद्रव्ये मणिते पूर्णकर्मणि ॥ (143)
स्तुपक्षीयः पशुपतौ गोमूलेन्द्रसुरादिषु ।
षित्वरपशुकरे दैन्यजीविते मरुतादिके ॥ (144)
चत्वरः परमप्रीतवेदमेरुगुहादिषु ।
45B धीवरो मत्स्यघातार्यमणिभद्रार्भकादिषु ॥ (145)
पीवरः कपिमातङ्गजलराशिप्रभादिषु ।
मीवरः पशुदौर्भाग्यपृथुरोगाक्षिकादिषु ॥ (146)
चिवरं भिक्षुकावासवारिनाधरवादिषु ।
तिवरो म्लेच्छपुष्पारपुण्यगोभूवृषादिषु ॥ (147)
नीवरो भूपदेवेन्द्रशम्भुमुक्तादिकादिषु ।
गह्वरः पुरुषाहतनिकुञ्जाभ्रकरादिषु ॥ (148)
कटपरः स्त्री वस्त्रभेदद्रव्यमायाविकारिषु ।
सांय्यद्वरः पुरप्रेतदेहसोढस्वरादिषु ॥ (149)

अमत्रं भाजने चैत्ये प्रासादे वामनादिके ।
परिपूर्णे महादेवे प्रयत्नाकरवारिषु ॥ (150)
नक्षत्रं रजोवीरदैत्यक्षत्रियभादिषु ।
यजत्रं योक्तपाषाणशम्याफालाक्षजन्तुषु ॥ (151)
वरणे माधवे देहे परिपूर्णादिकेऽपि च ।
बन्धत्रं भास्वरायत्तमर्मघातादिकेऽपि च ॥ (152)
मधूकमुरवैद्याजनादिकादिषु कर्मठे ।
गलत्रं च कलत्रं च क्रूरभार्याविहारिषु ॥ (153)
श्रोणिवामननाख्याममर्मवारिदभादिषु ।
वरत्राजगदुत्पातगजबन्धकदेहिषु ॥ (154)
सुविदत्रं बन्धमूलमहिजोतार्यकन्तुषु ।
अररः पावके सूरौ रणे गोपालफालयोः ॥ (155)
चन्द्रे शशिकलानाथे सूर्यपुत्रमरीचिषु ।
कवाटवीरमाळूरकपित्थकवितादिषु ॥ (156)
कमरः कामुके दैत्ये रावणे गोपभूपयोः ।
माधवे मदने सूर्ये विरुद्धादौ स्वरादिषु ॥ (157)
चमरश्चन्द्रकीनाशप्रलयातुरजन्तुषु ।
46A भ्रमरः पन्नगावासनरकालयदेहिषु ॥ (158)
देवरः प्रणते दैवभेदे गन्धर्वचित्तयोः ।
पतिभ्रातरि वानीरे वारे भावे महाक्रतौ ॥ (159)
वाशरः कुजने मूर्खे दुःखार्ते प्रबलादिषु ।
मधुसूदनहेमाङ्गशङ्करादिषु पूरुषे ॥ (160)
वासरः कुटिले काले विषवेत्ये महीधरे ।
वस्त्रभेदे विरावे च पशुनादे जगत्पतौ ॥ (161)
कुररः पक्षिभेदे स्यादसारे मोहनेऽपि च ।
गरुडे कुक्कुटे श्वभ्रे वारिदे सावभेदके ॥ (162)
अङ्गारश्चन्द्रशैवालकाष्ठभेदजवादिषु ।
मदारश्चापि मन्दारः पुण्यभूगृहयोनिषु ॥ (163)
पारिभद्रकदेवेन्द्रभूपगोपादिकेऽपि च ।
भृङ्गारश्चम्पके देवे काञ्चनाम्बरदैत्ययोः ॥ (164)

भोज्यपात्रे विशुद्धे च कुम्भश्वेताश्वरोरिषु ।
शृङ्गारः पन्नगे शम्भौ रसभेदे महात्मनि ॥ (165)
कङ्कारश्शैवभेदे स्यादविद्या मोहकेऽपि च ।
जले ग्रहे विशुद्धादौ विपुलादौ महेश्वरे ॥ (166)
मार्जारः प्रतिपाषण्डढक्कब्रह्माण्डदेहिषु ।
जन्तुशशिरकान्त्यादिपुरुहूतप्रियादिषु ॥ (167)
कुमारः प्रथमे वायौ महादेवे पृथुव्रते ।
गुहे च मन्मथे हेमव्योमनामादिकेऽपि च ॥ (168)
तरिरश्वे महादेवे माधवे विपिघण्डके ।
नौकाम्बरार्यपूत्कारवराम्रप्रणतादिषु ॥ (169)
स्तरिर्यापे महाकाले कराले पापचिन्तके ।
दुर्विनीते बन्धुहीने विहीने चतुरादिषु ॥ (170)
तम्रिर्विरूपे वाय्वादौ महितादौ प्रगल्भके ।
प्रवीणे ज्योतिषि प्राये कपोते चन्द्रमादिषु ॥ (171)
46B मात्रमाधवजम्बालपृथुकालवसारिषु ।
पियालुवृक्षभेदे स्यादसारे मधुरेऽपि च । (172)
वमनादौ महासत्त्वकोमलाहारभूतिषु ।
अविः प्रकाशे सूर्ये च परमात्मनि भास्वरे ॥ (173)
वैद्युतेऽग्नौ महादेवे चतुर्मुखनरादिके ।
नशा विरामे परमे चक्राधारे महाशये ॥ (174)
गुरौ महाक्रतौ छेदे विरोधकविहारयोः ।
वर्षोऽब्धौ वारवाणे च संवत्सरवसन्तयोः ॥ (175)
जम्बूद्वीपादिके वायौ पण्डिते परमात्मनि ।
तर्षस्सूर्ये प्रपन्ने च प्लवे चोत्तारके हरे ॥ (176)
राशि दातरि गोविन्दे वानरादौ तरीमुखे ।
हर्षस्थाने तुरङ्गादौ सून्या(र्या?)दौ पवने रिपौ ॥ (177)
सिंहे वराहे गोपाले दैत्यमात्रादिके पवौ ।
हंसः परात्मसूर्येन्दुयतिभूपप्रियादिषु ॥ (178)
पक्षे वर्णाशनादीनहरवैराग्यकादिषु ।
कंसस्सर्पे च गरुडे पात्रभेदे च पण्डिते ॥ (179)

दैत्यान्तरे विरुद्धे … वसिष्ठादौ रमादिके।
ग्रहः प्रज्ञायुते शम्भौ फेने फाले परात्मनि ॥ (180)
ग्रहराजे पशौ धीरे सुवर्णादौ पुरादिके।
अक्षः पतङ्गमनुजपाशकाहारभूतिषु ॥ (181)
दैत्यनेत्रादिमूलादिफलादिफलदादिषु ।
वृक्षश्शङ्करवाराम्बुचन्द्रवृक्षसुरादिषु ॥ (182)
ऋक्षश्शरीरफल्लूकगोविन्दार्याम्बुभूतिषु । (183)

इति श्रीकालिदासमहाकविविरचिते नानार्थशब्दरत्ने
कादिक्षान्तवर्णाद्यन्तार्थवच्छब्दप्रकरणे
एकैकधात्वर्थविचाररमणीये
द्वितीयं निबन्धनम्

47A कल्याणा… …कोदण्डः कल्याणानि करोतु नः।
सर्वमङ्गल… …युक्तस्सर्वमङ्गलदश्शिवम् ॥ (1)
श्रीशङ्करमहादेव देवदेव जगत्प्रभो।
विरूपाक्ष विशालाक्ष शुभाक्षाक्ष विकाक्षकृत् ॥ (2)
खजाकः करिने… …मरविन्दे मदोत्कटे।
महिते चन्द्रभूषे च वैद्ये मूलादिकेऽपि च ॥ (3)
बलाकः पक्षिभेदे स्यादशरीराम्बुदादिषु।
देवेन्द्रयममातङ्गशर्वगोपुच्छकादिषु ॥ (4)
मनाका कामिनि जायामेघलीश्वरिभादिषु।
गुवाकश्चर्मणि शिवे परमार्थे महात्मनि ॥ (5)
पशुजातौ कुलीरे च शङ्खे जलचरादिषु।
श्यामाकश्चम्पके सस्ये मदने श्यामलादिषु ॥ (6)
तटङ्कः कुण्डभूषाश्वजनदन्तिषु मारिषु।
शलाकालेखिन्ननारीमृदन्नकवचारिषु ॥ (7)
पताकौ तु ध्वजे चित्यां भुवान्तरविहङ्गयोः।
गरुडे पन्नगे मूर्खे तपश्शालिनि भूभृतौ ॥ (8)
पिनाकश्शिवकोदण्डे पांसुवृक्षे महात्मनि।
मारुते तेजसि व्योम्नि चण्डाले कवचादिके ॥ (9)

नभाकः पुच्छशैवालमाधवाचार्यखादिषु ।
काके वरिष्ठे रोमान्ते भुवने देवतादिषु ॥ (10)
स्याच्छर्करि कटीदण्डे चन्द्रशेखरवैश्ययोः ।
अश्वे च वनितादौ च सुकुमारे रमापतौ ॥ (11)
स्यात्पर्वलिक आनन्दे मुकुन्दे गोकुले त्वयि ।
अग्नौ वराहे शम्याके जितेन्द्रियसुरादिषु ॥ (12)
ललिकं वलये श्वभ्रे देवान्तरमनीषयोः ।
अलिकन्त्वनृते चित्ते ललाटे पृथुलादिके ॥ (13)
परिकं तेजसि सुमे वैराग्ये मत्तवारिणोः ।
नेत्रे मधूकेऽण्डे च भाषे मत्से भवादिके ॥ (14)
मरूकः पवने देहे पृथुराजे विरोचने ।
वित्तनाथे कुलुदूघे च कविदेपट्टमादिषु ॥ (15)
47B अणूकः काकदेवेन्द्रगौतमार्वशिवादिषु ।
वल्लूकः कृष्णजम्बूकजलदेहगृहादिषु ॥ (16)
उलूकः पृथिवीपालशचीपतिसुरादिषु ।
पक्षिभूभृत्कुलाचार्यदेवभेदाब्धिसादिषु ॥ (17)
पुल्लूकः पृथिवीपालखगमातङ्गदेहिषु ।
शालूकं जलजे चन्द्रे मूके गोविन्दफालयोः ॥ (18)
मण्डूकश्वेतवाराहभेकवज्रिप्रभादिषु ।
वृक्षभेदशुकप्राणपधुपारिद्वरादिषु ॥ (19)
किकिः पक्षिविशुद्धात्मवायुपूरुषचारिषु ।
स्तबकः पुष्पसन्दोहखड्गप्राकारनामसु ॥ (20)
करकः पृष्ठभागा(स्थि?)घटप्रोधसुरादिषु ।
चरकः वैद्यशास्त्रे स्यादविद्यासारयोरपि ॥ (21)
नरकं पाकदुष्कर्मदुर्गत्यादिषु निस्तने ।
सखामित्रे सुन्दरे च चन्द्रशेखरमुख्ययोः ॥ (22)
माधवे पारियात्रे च दोहदान्तरचैत्ययोः ।
शिखाज्वालाचूडचेलशाखान्ताग्निशिखादिषु ॥ (23)
शाखाविटपभूपालकृपणार्तक्रियादिषु ।
मुखं तु लपनाचारदौर्जन्यां हननादिषु ॥ (24)

मूर्खः पिशाचदुष्टात्मपटादिषु महाक्रतौ ।
नखं पुनर्भवे नीचे दारिद्र्ये पापकर्मणि ॥ (25)
मात(मूले?)विरिञ्चे कामे च महेशाह्लादनादिषु ।
मुखः क्रतौ पुलोमे च मनुजे चन्द्रमस्यपि ॥ (26)
शङ्करादौ महाशब्दमुनिगोवृन्दवारिषु ।
भरगः पृथुले हेमे कामपात्रे बलाहके ॥ (27)
कुलाले मंशगे देवे महेशादिसुरादिषु ।
नगः पतङ्गशैलेन्द्रभूजमूलशरादिषु ॥ (28)
48A अर्घ्या पूजा महासत्त्वक्रियादेविगृहादिषु ।
सङ्गा पूतिगन्धभेदजातीकुसुमवारिषु ॥ (29)
मरीचिर्मुनिमाणिक्यकान्तिचित्रीहरिदादिषु ।
कणिचिः पुण्यकृद्व्योमभेकवालप्रियादिषु ॥ (30)
खरे वराहे देवेन्द्रे सुकुमारादिकेऽपि च ।
श्ववीचिर्विपुलाहार्यमणिकोकिलकोतुषु ॥ (31)
पुरुषे कपिलेऽग्नौ च माणिभद्रे परश्वधे ।
आदित्ये वरुणे क्रोडे पञ्चके पारिभद्रके ॥ (32)
अश्विश्वतुरसेनाग्रव्याघ्रमण्डलनादिषु ।
तच्छश्शरीरवाताग्निगोवृन्दाब्धादिशमादिषु ॥ (33)
राजश्रेणिरमानारी महिला कदलीषु च ।
द्वाजिरादित्यपातालकूर्मवेतालशम्भुषु ॥ (34)
विश्वभोजश्शशाङ्के स्याद्दायुधादौ प्रमातरि ।
शकटः कुटिलागाररथभेदाम्बरीषयोः ॥ (35)
दैत्यान्तरमहेशाण्डजातिप्रेमास्पदादिषु ।
अवटश्चर्मरज्जौ स्यात्कण्ठगर्तविलासयोः ॥ (36)
देवटः पशुचण्डालभकव्याध्यक्तकादिषु ।
शिखिपञ्चास्यपिष्टान्तरादित्याकारकादिषु ॥ (37)
कमटः कुटजे चन्द्रे वारिवाहादिकेऽपि च ।
कङ्कटं वारवाणे स्यादविद्या सारयोरपि ॥ (38)
गरटिः कुङ्कुमे ज्योतौ भूभृतान्तरमत्स्ययोः ।
कुटिर्विशालहेरम्बमहोत्पलविनिद्रयोः ॥ (39)

किरीटं मकुटे हारे चर्वणे पर्वणि प्रिये ।
हेमे विषादे निद्रायां चन्दनाचलदेहयोः ।। (40)
तिरीटं मुष्करे कोशे पराजितविशालयोः ।
कृपीटं जलपाषण्डभूतिक्रोधाग्निभादिषु ।। (41)
48B जटामौनिशिखाभेदजननीजनकादिषु ।
पनिष्ठुरर्भके पुत्रे मनीषाहीनवैद्ययोः ।। (42)
परमेष्ठी ब्रह्मशम्भुमदनाचार्यविष्णुषु ।
कठिः पर्वतदेवेन्द्रमूकसर्पपुरादिषु ।। (43)
सुटः पञ्चास्यकेदारपरमातृष्ठभादिषु ।
वृढः पीडाकरे व्योम्नि शरजन्मप्रकाण्डयोः ।। (44)
अश्रिष्णुरभ्रपुष्पाण्डभेकगोकुलदेहिषु ।
कर्णिश्शिरीषचित्ताङ्कज्योतिपाठीनकान्तिषु ।। (45)
कर्णमातरकान्ताभिप्रायादिषु सुरान्तरे ।
वेणिः प्रवाहे गोविन्दे केशबन्धान्तरादिषु ।। (46)
जूर्णिरग्निशशातार्थसूर्यमारुतभस्मसु ।
वृष्णिर्विरागगोपालभेदसाहसवीचिषु ।। (47)
सृणिः खड्गेऽङ्कुशे व्योम्नि प्राणादिषु विरोधके ।
श्रेणिः पङ्क्तिः कालरात्रौ नदीभेदान्तरादिषु ।। (48)
श्रोणिर्नदीतटीदेशप्राकारावार्यशम्भुषु ।
तूर्णिर्विनते संपन्ने समाख्ये सहजादिषु(सहोदरादिषु)।। (49)
भूर्णार्भके विशालाक्षे महिषे व्याघ्रधीरयोः ।
उरणः पशुवाय्वग्निमेषदावानलादिषु ।। (50)
रमतिस्स्वर्गहेरम्बरतिपतिशिवादिषु ।
पतिर्भर्तरि भूपालेऽप्याचार्यादिषु सङ्कुले ।। (51)
अमतिर्भागपादान्तप्राणदेवगृहादिषु ।
अपतिश्चर्मकोदण्डखिलपाषाणहरिषु ।। (52)
अमात्यदुर्गभूपालज्वालामालादिषु प्रिये ।
वनतिः मलिने चित्रे गोकर्णे कमलादिके ।। (53)
अरतिः पृतनाहाभिप्रेतरोमादिकेऽपि च ।
49A अङ्कतिः पुत्रभूनाथपार्वतीपतिविष्णुषु ।। (54)

अंहतिश्शत्रुशयनसङ्कराहरकुम्भिषु ।
वस्तिस्तिरस्कारवीरखड्गमारुतवाचकः ॥ (55)
देहभेदप्रशान्तात्मभेरिभाण्डादिकेऽपि च ।
प्रत्तिः प्रकाशे लशुने कार्पासे कम्बलादिषु ॥ (56)
रुचितं मोहने ज्ञाने मनोज्ञे मन्मथादिषु ।
उचितं युक्तिदेवेन्द्रप्रभाकरशिवेन्दुषु ॥ (57)
कुषितं कृषिभूषाश्वगतिकान्तिभ्रमादिषु ।
अंतिश्चातिर्वायुमृगे प्रेमे व्योमादिकेऽपि च ॥ (58)
अतिथिस्सूर्यभूपालमणियाचकवाचकः ।
मन्थाः मन्थनमारीचद्युतिदेवेन्द्रख्यातिषु ॥ (59)
पन्थाः प्रचारमार्गाङ्कमृगत्वत्वक्षणिमन्तुषु ।
शब्दः कादौ ध्वनिब्रह्मरमणीमरुतादिषु ॥ (60)
शादः पीताम्बरादित्यकलिविद्रुमबन्धुषु ।
तृणभेदार्यपाषण्डनिषादादिषु निस्तृहे ॥ (61)
स्यन्दने मन्मथे स्वर्णे मधुपे मत्स्ययन्त्रयोः ।
मन्दो दैत्यविरूपाक्षविमलादिषु भूरुहे ॥ (62)
बृन्दा बृन्दावनारूढदैत्यकान्तादिषु प्रिये ।
कन्दस्तुन्दिलचम्पाकनीवाराकारभाविषु ॥ (63)
कुन्दः पुष्पवनाराष्ट्रविष्णुचन्द्रादिके परे ।
वेदस्सुवर्णकान्तारप्रियायशाङ्ककादिषु ॥ (64)
भिदि छिदि पदे वह्निकुठाराक्रान्तमूर्च्छिषु ।
दाश्चन्द्रपवनाचार्यफालाक्षकटिधेनुषु ॥ (65)
सारथिः करदप्रेतक्षत्ताभ्रष्टविरोधिषु ।
स्कन्धश्चतुरवैय्याघ्रशर्मनौकाग्निकान्तिषु ॥ (66)
पयोधाः कुटिले कामे परमात्मादिकेऽपि च ।
49B पुरो रोधाः पुरोधाश्च पुरोहितवसन्तयोः ॥ (67)
वर्णाश्वमूकदावाग्नियशाङ्गादिषु कर्मणि ।
करञ्जः कं तु गोविन्दकमलासनभादिषु ॥ (68)
कलशश्चाशोकवेगवायुभूपालजातिषु ।
कलशः पूतनाभेदपतद्ग्रहजिरादिषु ॥ (69)

कडम्नः पवने चन्द्रे शय्यायां वर्तुलादिके ।
कदम्नश्चटिले मस्मे गोबिले शकटादिके ॥ (70)
निषिद्धवीरचण्डाश्वप्रलयाङ्काम्रशम्भुषु ।
ज्यानिरग्निमहासत्त्वयोग्यवारिधिजादिषु ॥ (71)
हानिर्विहारत्यागादिनागादिशरभादिषु ।
योनिः कारणदेवेशभागपुच्छभवादिषु ॥ (72)
ग्लानिरादित्यकष्टाब्धदुर्गन्धादिषु चन्द्रके ।
मुनिश्शशाङ्के कमठे सिंहे गोमायुवारिषु ॥ (73)
खनिर्द्रव्ये च नक्षत्रे कमले भूपदेहिषु ।
ध्वनिर्महेश्वरे सत्ये नादश्वापदधारिषु ॥ (74)
वनिर्वनमनोजातमृतवाराहकादिषु ।
समिस्संसारखड्गादिमृगराजादिकेऽपि च ॥ (75)
दमुनः पन्नगेऽश्वे च गृहे मृतादिकेऽपि च ।
अमनः कालवोम्भाणमर्थमातङ्गचारिषु ॥ (76)
वापिर्जलाशये चित्ते वक्त्रे कुटिलपूरुषे ।
कपिः कल्यालचित्तेशवानराचार्यजन्तुषु ॥ (77)
कुल्फं पिपीलिकालेख्यस्वर्णकारादिकेऽपि च ।
गुल्फं प्रतीकाम्बष्टादिमुरादिप्रलयादिषु ॥ (78)
शम्बा चारित्रकल्माषपीठबुद्धिद्रुमादिषु ।
उल्बस्मृणविशेषे स्यादविद्याकप्रियादिषु ॥ (79)
कुल्बं विरोधिपातालघटकाठिन्यवस्तुषु ।
50A रज्जौ चाधस्तम्ब इष्टे भोज्ये मौख्यादिकेऽपि च ॥ (80)
नाभिरादित्यदेहाङ्गकस्तूरिपनसादिषु ।
वातत्रमी मृगे चन्द्रे सिंहे गोपाले मण्डले चिते ॥ (81)
पचेलिमाः प्रपन्ने च पुरादिषु विरोचने ।
हर्षे घने निर्भित्यां स्यादसारे कुङ्कुमादिषु ॥ (82)
भूमिर्भूमण्डलाकारश्वभ्रजोलादिकेऽपि च ।
क्रिमिः कुटिलजन्त्वण्डछायापुत्रादिकेऽपि च ॥ (83)
गिमिर्मातङ्गचण्डालदेहपूत्कारवारिषु ।
निमिरादित्यभूपालतरुणार्कादिकेऽपि च ॥ (84)

तिमिः पञ्चास्यनीवारशाश्वताहार्यकादिषु ।
कर्मपाश्चातुवरुणक्रियकौशलजन्तुषु ॥ (85)
वर्मप्रसङ्गपुच्छाङ्गद्वीपनारिद्रुमादिषु ।
चर्मदेहप्रभाढङ्कसर्पनाराचकादिषु ॥ (86)
शर्मस्वर्गसुखारामदेवघातादिकेऽपि च ।
जन्मचिन्तनपाषण्डवैशाखादिषु वारुणि ॥ (87)
'ब्रह्मप्रजापतौ बोधा प्रचारसुरक्कादिषु ।
शक्मा चिन्तानलापूपसुधर्मादुष्टशारिषु ॥ (88)
भारिमाचूतपुष्पादौ हरिहशङ्करादिषु ।
खरिमा वानरादौ स्याद्धरिमा वनितादिषु ॥ (89)
स्तरिमा मेघगगनकल्पादौ बनिहह्वदि ।
मनुष्यादौ सुखे चन्द्रे वेमांशुककरादिषु ॥ (90)
नामसत्त्वादिके साद्ध वेदादौ हेमभर्मणि ।
रोहितादौ लोमकेशन्दौ व्योमगगनादिके ॥ (91)
बेहखटकमुख्यादौ सुधर्माचन्द्रमादिषु ।
सुशर्मापरदादौ स्यादात्मब्रह्मादिकेऽपि च ॥ (92)
इन्द्रे च पुरुषेऽग्नौ च वेदरामादिके तथा ।
50B माया रहस्ये सत्ये च गौर्यादौ च प्रभादिके ॥ (93)
चामातपादौ वेत्रादौ जायाकन्याप्रियादिषु ।
पुत्रिकादौ प्रियालवादौ म(वं?)ध्याम(वं?)ध्यादिकेऽपि च ॥(94)
भाण्डाधारकरञ्जा स्याच्छक्यं गोत्रादिकेऽपि च ।
रुचिष्यं मित्रपुष्पादौ भुजेषुस्सेवकादिषु ॥ (95)
शर्करागुपशैलादौ मुकुरादौ च पुष्करम् ।
वरुणादौ च पद्मादौ कुटरः कुङ्कुमादिषु ॥ (96)
देहल्यादौ च पक्ष्यादौ करीरं घटिकादिषु ।
सुवर्णादौ शरीरं तु देहपात्रादिके तथा ॥ (97)
कुटिरं कुटिशल्यादौ पटिरं तु घनादिषु ।
शशिरः पावकादौ च सूर्यादौ शङ्करादिषु ॥ (98)
कुलीरं मैथुने वारि कम्बुकादौ च गाधिजे ।
गभीरश्चापि गम्भीरो वारिधौ गोकुलादिषु ॥ (99)

खर्जूरः पावके सूर्ये रजितादौ प्रगल्भके ।
कर्पूरः कञ्चुके हेम्नि पटिरादौ महेश्वरे ॥ (100)
कण्डूरश्चेकिताने स्याद्भिलेशयशरादिषु ।
मयूरः कपिचन्द्रार्कशिखिगोपालमूर्तिषु ॥ (101)
मेरुः पर्वतशैलाग्रदेवश्रेष्ठादिकेऽपि च ।
पेरुरर्काश्वमहिषभूजकन्तुसरादिषु ॥ (102)
शित्रवृक्षमयूखाग्रवर्षविष्कनखादिषु ।
श्मश्रुश्चुबुककेशाण्डकेशवानङ्गमादिषु ॥ (103)
शत्रुर्दूषणभूपालचारद्वीपालिकेषु च ।
रुरुर्मृगमयूराङ्कवलीवर्धा(दी?)दिकेऽपि च ॥ (104)
शारिर्भुजङ्गभूपालपाशकाङ्गादिकेषु च ।
शिरस्सौभाग्यसौन्दर्यसंवत्सरलखादिषु(पांस्त्विषु)॥(105)
भरिर्विष्णौ महेशाने कुक्षिम्भरकुठारयोः ।
51A तरिः पर्वतशैलाग्रतटकुम्भस्वरादिषु ॥ (106)
तिरवः राहुमातङ्गमहोदधिशिवादिषु ।
गिरिः कुटिलशर्वाणि वाणिगोत्रादिके सुरे ॥ (107)
पुरिर्भूधरभूपालनगरार्ककिवाचकः ।
वस्त्रं विलोलने वस्त्रे हरनेत्रादिकेऽपि च ॥ (108)
भस्त्रादमन्नं वन्यण्डजातिकोकिलवारिषु ।
राष्ट्रं राज्यविमाद्रङ्ककठिनार्कध्वनादिषु ॥ (109)
आष्ट्रं भ्रमकसद्बन्धुमङ्गलाचारकारिषु ।
वेष्कञ्जं जीरनीहारपनसाच ग्रिभूतिषु ॥ (110)
आष्ट्रं पातालगगनवडबाङ्गारकादिषु ।
उष्ट्रः पिशाचकरभप्रोत्रिपुटिकरादिषु ॥ (111)
छत्रं कलत्रवैराग्यातपत्रादिषु सामनि ।
तन्त्रं विचित्रसन्तानमन्त्रमायविहारिषु ॥ (112)
पात्रं पद्मप्रतीकारयोग्यभूचिह्नितादिषु ।
नेत्रं लोचनपाश्चात्यदेशभेदादिकेऽपि च ॥ (113)
गात्रं शरीरकण्ठाम्रफलचैत्यादिकेऽपि च ।
हात्रं निरोगनिर्भाग्यशौर्यत्यागादिवाचकम् ॥ (114)

नात्रं नलिनकोशाण्डतिन्त्रिणीपूतिकादिषु ।
स्नात्रं द्युतिविशालाञ्छश्वरुस्वर्गादिकेऽपि च ॥ (115)

मूत्रं सामुद्रलवणमूलमात्रादिकेऽपि च ।
होत्रं हेममरीच्यंघ्रिभूषाभेदादिवाचकम् ॥ (116)

यात्रा प्रयाणचमनपुरीमरणवाचका ।
मातृक्रियायां भार्यायां जनन्यादिषु जानुनि ॥ (117)

अत्रं भागे पुरोडाशे स्तोत्रे स्तोमादिकेऽपि च ।
धर्त्रं धरणिकूश्माण्डबीजक्षीरार्णवादिषु ॥ (118)

गेहे चाथ तु वक्त्रं स्याद्गार्हपत्ये शिखादिषु ।
51B वेत्रं लताचिनाम्भोजानन्दिनामज्वरादिषु ॥ (119)

सत्रं वने दवाग्नौ च यागादौ गोत्रभृतोः ।
योत्रं रज्जुक्रियाहीनमात्रमायक्रियादिषु ॥ (120)

सूरिः पण्डितदेवाब्जजातव्योवादिवाचकः ।
शिरस्सहमहाराजशम्भुमस्तकवाचकम् ॥ (121)

पठरो वज्रहीराश्च जिह्वा देवाङ्गनादिषु ।
मठरः पूज्यशैवालयो .... व्यासार्कवाचकः ॥ (122)

ऊर्धको दैत्यकमलमृगव्योमाब्जवाचकः ।
अङ्गिरास्सर्पशमनमुनिहेमाथर्ववाचकः ॥ (123)

अप्सराः स्वर्णपिकान्ता देवकान्तास्वरादिषु ।
अद्रिशैलविरूपाक्षविरिञ्चिप्रियजन्तुषु ॥ (124)

शुभ्रिस्सत्ये ब्रह्मणि च वंक्रिः कुटिलदीनयोः ।
उम्रिरादित्यकेदारदैत्यप्रेतादिवाचकः ॥ (125)

विभ्रिर्भये(गे?) महाकाये कबन्धे कामुकादिषु ।
अद्रिरब्धौ विशालाक्षे पञ्चाङ्गुलविहारयोः ॥ (126)

रात्रिस्त्रियामाजननि शिवा देवाङ्गनादिषु ।
अत्रिर्मुनिमुखारामयोग्यफालादिवाचकः ॥ (127)

भावित्रं वमने नेत्रे त्रैलोकये विमलादिषु ।
वादित्रं वाद्यहोमेशध्वनिचर्मादिवाचकम् ॥ (128)

गादित्रं गमने दैन्ये मूल्ये मोहविशालयोः ।
चारित्रं चरिते नीरे गोबृन्दे बृंहितेऽपि च ॥ (129)

अध्मित्रं(अच्मित्रं?)चारुपिशुननीलकण्ठाग्रजादिषु ।
कुटित्रं दन्तकेशान्तफलकाङ्गारहेतिषु ॥ (130)
वहित्रं खड्गशैवालपूगबोधायनादिषु ।
यानपात्रे च बन्धित्रश्चतुरे मन्मथादिषु ॥ (131)
त्रोत्रं स्यादभये वीर्ये शौरिदेहप्रहारयोः ।
52A लोत्रं हृतद्रव्यभेदे स्पर्शे पादुकचैद्ययोः ॥ (132)
अञ्जलिः पतगे देहे कुटिले कोकिलादिषु ।
अङ्गुलिर्वेत्रगोविन्दकलविङ्कध्वजादिषु ॥ (133)
पुष्कलं गर्तगहनसमृद्धाभूदिकेषु च ।
शैवलं जलनील्यादौ हेम्नि कुन्ते कलिद्रुमे ॥ (134)
पिञ्जालं पिञ्छमहिषशृङ्गहेरम्बवाचकः ।
वल्लूलं मांसमस्तिष्कशशजाजिसुमादिषु ॥ (135)
कण्डोलः कामुकेश्चित्रे गोघृतादौ विकारिणि ।
कुड्मलं मुकुले चित्ते कुसुमान्दे विभावसौ ॥ (136)
कुष्मलं काष्ठपाषाणनीरजारिवृहादिषु ।
कुल्मलं नाम्नि चिह्ने च विरावाकारयोरपि ॥ (137)
चरुलश्शन्तने शूरे प्रीते पोते विलोचके ।
लोटिलः पन्नगे हेतौ तटित्स्तनवसन्तयोः ॥ (138)
तडुलः पुण्यघट्वाङ्गपुत्रिकादैत्युतादिषु ।
तण्डुलः कणबिन्द्वङ्कज्योतिः काकाक्षिकुक्षिषु ॥ (139)
उदलं चोदरे भोज्ये जठने क्षीरवैकृतौ ।
अन्तरिक्षे च वरुणे महेशे पामरेऽपि च ॥ (140)
दर्विर्विश्वासके चन्द्रे(चेन्द्रे?)पात्रभूषाविकारिषु ।
वर्विश्शुकाम्बरे भाषे शकले तिन्त्रिणि भिदि ॥ (141)
